लवैषम्यात् शोकवस्त्वाद्यनुस्मृतेश्च तज्जन्यं दैन्यमभास्वरत्वं मनसोऽवसाद इति तद्विपर्ययोऽनवसादः । नायमात्मा बलहीनेन लभ्यः (मु. ३।२।४) इति निर्वचम् । तद्विपर्ययजातुष्टिरुद्धर्षस्तद्विपर्ययोऽनुद्धर्षः । ऐतैरुपायैर्यतते यस्तु विद्वान् यस्यैष आत्मा विशते ब्रह्मधाम (मु. ३।१।४) शान्तोदान्त (मु. ४।४।३) इत्यादि निर्वचनम् । (आनन्दभाष्यम् १।१।१) इत्यादिकम् । एतादृशीभक्तिर्भगवति कर्तव्येति श्रीपराशरादयोमुनिपुङ्गवाः कथयन्तीतिभावः ॥१३॥

'रामस्यभक्तिं परमां प्रकुर्यात्' एतादृश वाक्य से कथित कायिक वाचिक तथा मानसिक रूप जो भगवान् की पराभक्ति है उसका स्वरूप क्या है ? तथा तादृश पराभक्ति का साधन क्या है ? इस बात को बतलाने के लिये आचार्यजी कहते हैं **'सा तैलधारेत्यादि'** जो विवेक प्रभृति अर्थात् विवेक, विमोक अभ्यास, क्रिया, कल्याण अनवसाद तथा अनुद्धर्ष-इन सात प्रकारक बोधायनवृत्ति प्रतिपादित कारणों से उत्पन्न है तथा जिसके यम प्रभृतिक अर्थात् यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि-ये आठ प्रकार के कारण समुचित रूपसे बोध कराने में कारणात्मक अङ्ग है । तैलधारा के सदृश नित्य संस्मृति अर्थात् अविच्छिन्न स्मरण प्रत्यक्षाकार ज्ञान से जायमान जो भगवान् श्रीरामजी में परम अनुराग है उसी को अनन्या भक्ति कहते हैं । इस अनन्याभक्ति से ही मोक्ष होता है । 'भक्त्यात्वनन्यया लभ्योऽहमेवं विधोऽर्जुन' 'अनन्याश्चिन्तयन्तोमां' इत्यादि वचन प्रमाण से ॥१३॥

उदारकीर्तेः श्रवणं च कीर्तनं हरेर्मुदासंस्मरणं पदश्रितिः ।
समर्चनंवन्दनदास्यसख्यान्यात्मार्पणं सा नवधेति गीयते ॥१४॥

येयमनन्याभक्तिःमोक्षकारणतया कथिता सा श्रवणादिभेदादनेकप्रकारेति दर्शयितुमाह 'उदारकीर्तेरित्यादि' उदारा अत्यधिकाकीर्तिर्विद्यते यस्य भगवतो रामस्य-

यस्यामलं नृपसदस्सु यशोऽधुनाऽपि गायन्त्यघघ्नमृषयो दिगिभेन्द्रपट्टम् ।
तं नाकपालवसुपालकिरीटजुष्टपादाम्बुजं रघुपतिं शरणं प्रपद्ये ॥

इतिभागवते श्रीशुकार्योक्तेः सुयशसः श्रीमद्रामायणादिग्रन्थस्य श्रवणं श्रवणविषयतापादनम् तथा तद्गुणानां कीर्त्तनमन्यं प्रतिकथनम् मुदाहर्षपूर्वकं हरेः श्रीरामस्य संस्मरणमनुक्षणं स्मरणं कर्त्तव्यम् तथा भगवतः पदयोः श्रितिः

Scanned by CamScanner ankurnagpal108@gmail.com

पादसंसेवनम् तथा तदीयपादयोः षोडशोपचारादिप्रकारेणार्चनं पूजनम् वन्दनम् तस्यैव नमस्कारकरणम् दास्यं भगवत एव किंकरोहमिति बुद्ध्यातत्सेवनम् सख्यं सच्चिदानन्दत्वेन समानताज्ञापनम् मित्रभावम् 'सयुजा सखाया' इति श्रुतेः। आत्मसमर्पणञ्च आत्मनिवेदनम् स्वस्य भगवदधीनताबोधनम् एवं प्रकारेण सा भक्तिर्नवधा गीयते पूर्वाचार्यश्रीव्यासप्रभृतिभिरितिशेषः ॥१४॥

भगवान् श्रीरामजी की जो उदारकीर्ति है उसका श्रीमद्रामायणादि द्वारा श्रवण करने को श्रवण भक्ति कहते हैं। उदारकीर्ति का यह अर्थ है कि सकल साधारण के ऊपर सब प्रकारक सहृदयता रखना तथा धर्मादि मोक्षान्त पद देने का सुयश को उदार कीर्ति कहते हैं। तथा भगवान् के गुण, कथन, भगवान् के गुणों का अनवरत स्मरण करना षोडशोपचारादि विधि से भगवान् श्रीरामजी का पूजन करना, तथा वन्दन करना अर्थात् दण्डवत् प्रणाम करना, भगवान् के प्रति अपने को दास किंकर समझना। सखाभाव का ग्रहण आत्मसमर्पण करना–ये नौ प्रकार की भक्ति है तदुक्तम्–

'श्रवणं कीर्तनं विष्णोः स्मरणं पाद सेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनमिति ॥१४॥'

卐 अथैकादशी व्रतनिर्णयः 卐

**एकादशीत्यादिमहाव्रतानि वै कुर्याद्विवेधानि हरिप्रियाण्यथ।
विद्धादशम्या यदि साऽरुणोदये स द्वादशींतूपवसेद्विहायताम् ।१५।**

मोक्षस्य साक्षात्कारणतया भक्तिः प्रतिपादिता ततो मोक्षाभिलाषिभिर्विष्णुपरायणैर्भगवद्भक्तैरेकादशीप्रभृतिकानि भगवत्प्रीतयेऽनुष्ठेयानीति तानि निर्णेतुमुपक्रमते। तत्रैकादशीव्रतम् कीदृशं कर्त्तव्यम् तदेव दर्शयितुमाह एकादशीत्यादिमहाव्रतानीत्यादि। अथ हरिप्रियाणि हरेर्भगवतो रामस्य संतोषफलकानि विवेधानि दशमीवेधरहितानि एकादशीव्रतानि वैष्णवैरवश्यमेव कर्त्तव्यानि अर्थाद्दशमीवेधरहितैकादशीव्रतं कुर्यान्नतुवेधसहितैकादशीव्रतमनुतिष्ठेदिति। यदि कदाचिदरुणोदयकाले सैकादशी अरुणोदयकाले दशमीविद्धाभवेत्तदा दशमीविद्धां तामेकादशीं विहाय द्वादशीमेवोपवशेत् द्वादश्यामेव व्रतं तत्पारायणं च कर्त्तव्यम् वैष्णवैरितिसारः ॥१५॥

मुक्ति के परमसाधन भक्ति का भेद सहित निरूपण करके तदनन्तर भक्ति का

Scanned by CamScanner ankurnagpal108@gmail.com

उपोद्बलक, एकादशी प्रभृतिक व्रतों का निर्णय करने के लिए कहते हैं उसमें भीं सर्व प्रतिष्ठित एकादशी व्रत के विषय में एकादशी का निर्णय करने के लिए कहते हैं **'एकादशीत्यादि महाव्रतानि'** इत्यादि । भगवान् की प्रसन्नता के लिए उपासक वैष्णव, भगवान् श्रीरामजी के संतोषप्रद एकादशी महाव्रत का अनुष्ठान करें । यदि कदाचित् एकादशी, एकादशी के सूर्योदय से पूर्व अरुणोदयकाल में स्व पूर्ववर्ती दशमी तिथि से स्पृष्ट-अर्थात् विद्धा हो तो, दशमी विद्ध उस एकादशी को छोड करके द्वादशी को ही उपवास करें । अर्थात् विद्धा एकादशी का उपवास न करके तदव्य वहितोत्तरकालिक द्वितीय सूर्योदयकालिक शुद्ध द्वादशी में ही उपवास करें । उपवास का अर्थ है-अहोरात्रावच्छेदेन चतुर्विध भोजन निवृत्ति, आधुनिक धर्मशास्त्रानभिज्ञ भात रोटी न खा करके तदितर फलादिक का यथेच्छ सेवन करके अपने को व्रती समझते हैं । इसका विशेष विवरण इसी प्रकरण में आचार्य स्वयमेव करेंगे । तथा स्थलान्तर में भी देखें ॥१५॥

शुद्धादशम्यासुयुतेतिभेदभागेकादशीसाद्विविधा प्रबुध्यताम् ।
वेधोऽपि बोध्यो द्विविधोऽरुणोदये सूर्योदये वा दशमीप्रवेशतः ॥१६॥

या कर्त्तव्या एकादशी सा दशमीविद्धाशुद्धाचेतिभेदाद् द्विविधाप्रबुध्यताम् तत्र शुद्धा अणोदयसूर्योदयवेधरहिता दशमीयुक्ता च । तथा अरुणोदयकाले सूर्योदयकाले वा दशमी प्रवेशतः सम्बन्धाद्, वेधोपि द्विप्रकारको भवतीति बुधैर्ज्ञातव्यः, वेधजनकस्यद्वित्वेन, वेधस्यापि द्विप्रकारकत्वादिति ॥१६॥

कर्त्तव्य अनुष्ठेय जो एकादशीतिथि है वह शुद्धा तथा दशमी विद्धा, इस प्रकार दो प्रकार की है । अर्थात् एकादशी दो प्रकार की है । शुद्धा तथा दशमी विद्धा । अरुणोदय तथा सूर्योदय इन दो कालों में दशमी का प्रवेश होने से वेध भी दो प्रकार का होता है । ऐसा पण्डितों को जानना चाहिए ॥१६॥

स पञ्चपञ्चप्रमितो ह्युषो बुधैः कालस्तुषट्पञ्चमितोऽरुणोदयः ।
प्रातस्तु सप्तेषु मितो निगद्यते सूर्योदयस्स्यात्तु ततः परं तथा ॥१७॥

अथारुणोदयादिवेधरहितैकादशीज्ञानाय परम्परयाऽरुणोदयादिस्वरूपज्ञानस्य कारणतया तत्स्वरूपनिर्णयायोपक्रमते-'स पञ्च पञ्चप्रमितः' इत्यादि । **पञ्च**

Scanned by CamScanner ankurnagpal108@gmail.com

पञ्चप्रमितः पञ्चपञ्चाशद्दण्डात्मकसमयात्, उपरितनोभागात्मककाल उषः पदेन विद्वद्भिः कथितः । तथातिथेः प्रवेशकालादारभ्य षट्पञ्चपरिमितः षट्पञ्चाशत् दण्डरूपकालादूर्ध्वकालिकः कालः सोऽरुणोदयकालः, ततः सप्तेषु परिमितः सप्तपञ्चपरिमितः सप्तपञ्चकदण्डात्मककालादूर्ध्वकालिकः कालः प्रातः कालः, ततः परमासूर्योदयकालः सूर्योदयकालः । ततश्चोषः कालारुणोदयकालः प्रातः कालः सूर्योदयकाल इति चत्वारः कालाः कथिता भवन्ति, तथोक्तम्-'पञ्चपञ्च उषः कालः षट्पञ्च अरुणोदयः । सप्तपञ्चभवेत्प्रातः शेषः सूर्योदयः स्मृतः' इति । एतेषु वेधरहितकालात्मकशुद्धैकादशीति तत्रोपोषणं कर्त्तव्यमिति संक्षेपः ॥१७॥

वेधरहित उपोषणीय एकादशी के स्वरूप को जानने के लिए उषः काल अरुणोदयकाल, प्रातःकाल और सूर्योदयादिकाल के स्वरूप को जानने के लिए आचार्य कहते हैं-'**स पञ्च पञ्चप्रमितः**' इत्यादि । हे सुरसुरानन्द ज्योतिः शास्त्र के ज्ञाता विद्वान् लोग कहते हैं कि दिन तथा रात्रि के जो ६० दण्ड प्रमाण काल है उसमें से ५५ दण्ड बीत जानेपर जो छप्पनवां दण्डात्मक काल है तादृश काल को उषाकाल कहते हैं । तथा अहोरात्र के छप्पनवां दण्ड के बीत जाने पर जो बांकी चार दण्डात्मक काल अवशिष्ट रह जाता है उसको अरुणोदयात्मक काल कहते हैं। और दिनमान के ५७ दण्डात्मक काल के बीत जाने पर अवशिष्ट तीन दण्डात्मक काल को प्रातःकाल प्रत्यूषकाल कहते हैं । और इसके बाद का अर्धसूर्य के उदय होने के अनन्तर सम्पूर्ण समय को सूर्योदयकाल है ऐसा प्राचीन मुनिलोग फरमाते हैं । ऐसा ज्योतिष शास्त्रों में कहा है-'**पञ्चपञ्च उषःकालः षट्पञ्च अरुणोदयः । सप्तपञ्चभवेत्प्रातः शेषः सूर्योदयः स्मृतः**' पचपन दण्ड का काल उषःकाल कह लाता है । अर्थात् दिनमान के पचपन दण्ड के वाद के काल को उषःकाल कहते हैं । तथा दिनमान के छप्पन दण्डात्मक काल को अरुणोदयकाल कहते हैं । तथा सत्तावन दण्डात्मक काल को प्रातःकाल कहा जाता है । और इसके वाद के काल को सूर्योदयकाल कहते हैं ॥१७॥

घटीचतुष्कं ह्यरुणोदयाभिधः प्रातर्विमृष्टः समयो महर्षिभिः ।
तथाऽत्रवेधप्रभृतेर्विपश्चितः प्राहुर्विभागान् चतुरोविवेकः ॥१८॥

Scanned by CamScanner ankurnagpal108@gmail.com

महर्षिभिः समयविभागज्ञैः पुरुषैः रात्रिशेषस्य प्रातःकालस्य चतुर्दण्ड प्रमाणकः कालोऽरुणोदयकाल इति कथितः तथा अत्रैकादशीप्रकरणे एव तैः कालविचारकैः वेधप्रभृतेः अरुणोदयसूर्योदयवेधयोश्चतुरोविभागान् विवेकतो हि प्राहुः प्रकर्षेण कथितः । अर्थात् चत्वारो वेधाभवन्तीति प्रतिपादितवन्तः तत् तथैवावगन्तव्यमितिभावः ॥१८॥

कालज्ञानी लोगों ने प्रभातकालिक चार दण्ड का समय जो कि अरुणोदय कालरूप से निश्चित किया है । महात्मा विद्वानों ने भी चारों तरह के वेध का जो विचार किया है वह उसी काल का कथन किया है । अर्थात् उसी आधार पर काल निरूपण किया है ॥१८॥

घटीत्रयं सार्द्धमथारुणोदये वेधोऽतिवेधः कथितोघटीद्वयम् ।
रविप्रभासस्य तथोदितेऽर्धके सूर्ये महावेध इतीर्यते बुधैः ॥१९॥

अथ अरुणोदयादिकालनिरूपणस्यपश्चात्, चतुर्दण्डप्रमाणकरात्रिशेषे रविप्रभासस्य सूर्यप्रभायाः दर्शनात् पूर्वम् सार्द्धं घटीत्रयम् अरुणोदयवेधो बुधै र्विद्वद्भिरीर्यते कथ्यते । तथा तत्रैवारुणोदयवेधे रविप्रभासस्य दर्शनादव्यवहित पूर्वकाले द्विघटिस्तु द्विदण्डात्मककालस्तुऽतिवेध इति बुधैः कथ्यते । तथा यथा रविप्रभासस्य दर्शनात् प्राक् अरुणोदयवेधो यथाऽतिवेधः कथितः तथैवरवि प्रभासस्य दर्शनात्परम् अर्द्धे सूर्ये उदिते सति महावेध इति कथ्यते इति अरुणो दयवेधत्रयस्य कथनं कृतमिति विवेकः ॥१९॥

कालवेत्ता विद्वान् लोग सूर्यप्रभा के दर्शन के पूर्वकाल में जो साढेतीन दण्डात्मक काल है उसमें जो वेध है उसे अरुणोदय वेध कहते हैं । तथा रविप्रभा दर्शन के दो दण्ड पूर्व के समय में जो वेध होता है उसको अतिवेध कहते हैं । और सूर्यप्रभा दर्शन से अर्धसूर्य उदित होने तक का जो अर्द्धदण्डात्मक समय है उसमें जो वेध होता है उस वेध को महावेध कहते हैं । इस प्रकार अरुणोदय कालिक वेध अतिवेध और महावेध का निरूपण हुआ ॥१९॥

योगस्तुरीयस्तुदिवाकरोदये तेंऽर्वाक् सुदोषातिशयार्थबोधकाः ।
सर्वेऽपि वेधा मुनिभिर्विनिश्चिता निर्णेतृभिस्तस्य तु तत्वदर्शिभिः ।२०।

Scanned by CamScanner ankurnagpal108@gmail.com

दिवाकरोदयेसूर्योदयेसति जायमानो वेधयोगस्तुरीयो योग इति कथ्यते वेधतत्वदर्शिभिर्निर्णेतृभिः श्रीपराशरादिमुनिभिः । अर्वाक् वेधकालात्पूर्ववेधे सु दोषातिशयार्थबोधकाः सर्वेपि ते वेधा निश्चिता इति ॥२०॥

दिवाकर सूर्य के उदय होने के अनन्तर सम्पूर्ण दिन तथा रात्रि के अन्तर्गत जो दशमी का वेध होता है तो उस वेध को **'योग वेध'** कहते हैं तत्व को जानने वाले जो लोग हैं उन्होंने उपर्युक्त सर्ववेध का अर्थात् चारों प्रकार के वेध का भिन्न विभाग, एक दूसरे में महान् दोषों की अपेक्षाकृत अधिक बोध कराने के लिए ही विशेष रूपसे निश्चित किया है। यद्यपि इसप्रकार के कालवेध का निर्णय करना इस श्रीवैष्णवमत में कोई खास उपयोगी नहीं है। तथापि मतान्तरों में तो उपयोगी है ही ॥२०॥

पूर्णेति सूर्योदयकालतः सा या प्राङ्मुहुर्तद्वयसंयुता च ।
अन्या तु विद्धा परिकीर्तिता बुधैरेकादशी सा त्रिविधापि शुद्धा ॥२१॥

इत्थमेकादशी उपजीव्यतया कालस्य वेधस्य च विचारं कृत्वानन्तरमेकादश्या आवान्तरभेदमाह-'पूर्णेति सूर्योदयकालतः' **इत्यादि । सूर्योदयकालतः प्राक् पूर्वं मुहूर्तद्वयसंयुता चतुर्दण्डयुक्ता या एकादशी, सा सम्पूर्णाप्येकादशी शुद्धा उपवासयोग्या । अन्या एतदतिरिक्ता एतद्भिन्ना या सा विद्धा दशम्या विद्धा ज्ञेया नोपाष्या सेति । यैकादशी शुद्धा सापि वक्ष्यमाणप्रकारेण बुधैः पण्डितैः त्रिविधा त्रिप्रकारा ज्ञातव्येतिभावः ॥२१॥**

सूर्योदयकाल से पूर्व दो मुहूर्त्त अर्थात् चार दण्ड से युक्त जो एकादशी है, वह पूर्णा अर्थात् सम्पूर्ण एकादशी शुद्धा है उपोष्या है ऐसा विद्वान् लोग कहते हैं। इससे भिन्न जो एकादशी है वह दशमी विद्धा कही गई है वह उपवास योग्य नहीं है। जो एकादशी शुद्ध है अर्थात् वेधरहित है वह वक्ष्यमाण प्रकार से तीन प्रकार की है ऐसा विद्वानों ने कहा है ॥२१॥

एका तु द्वादशीमात्राधिका ज्ञेयोभयात्मिका ।
द्वितिया च तृतीया तु तथैवानुभयात्मिका ॥२२॥
तत्राद्या तु परैवास्ति ग्राह्या विष्णुपरायणैः ।

Scanned by CamScanner ankurnagpal108@gmail.com

शुद्धाप्येकादशी हेया परतो द्वादशी यदि ॥२३॥
उपोष्यद्वादशीं शुद्धां तस्यामेव च पारणम् ।
उभयोरधिकत्वेतु परोपोष्या विचक्षणैः ॥२४॥

एकेत्यादि एका तु द्वादशीमात्राधिकाज्ञेया, तत्र द्वादशीमात्रं द्वादश्येवा धिकां यस्यां सा द्वादशीमात्राधिका । द्वितीयात्वेकादशी उभयात्मिका उभया धिकेत्यर्थः । तथैव अनुभयात्मिका तृतीया । एवं च शुद्धैकादशी त्रिविधा द्वा दशीमात्राधिका । उभयात्मिका अनुभयात्मिका चेति भेदात् । तत्राद्या तु परैव विष्णुपरायणैर्ग्राह्यास्ति । शुद्धाप्येकादशीत्याज्या यदि परदिने द्वादशी भवेत् । तत्र शुद्धां द्वादशीमेवोपोष्य तस्यामेव द्वादश्यां पारणं कर्तव्यम्, यदि कदाचित् उभयोरधिकत्वं तदा पण्डितैः परैवोपोष्येति विवेकः ॥२२-२४॥

प्रथम एकादशी तो वह है जिसमें द्वादशी तिथि का मात्रा अधिक हो । दूसरी एकादशी वह है जिसमें एकादशी तथा द्वादशी की दोनों की मात्रा अधिक हो तीसरी एकादशी वह है जिसमें दोनों की एकादशी द्वादशी की मात्रा कम हो । इन तीनों में, पहली एकादशी में परतिथि का द्वादशी का ही व्रतोपवास वैष्णवों को करने योग्य है । क्योंकि यदि द्वादशी अपने आगामी तिथि तक चली जाय तो इस अवस्था में शुद्धा एकादशी भी त्याज्य ही है । तब द्वादशी को उपवास करके द्वितीय द्वादशी में पारण करे । बुद्धिमान व्यक्ति उभय की अधिकता होमे पर द्वितीय एकादशी का ही उपोषण करते हैं । इस विषय पर अधिक विचार अन्यत्र करेंगे ॥२२-२४॥

उन्मीलिनी वञ्जुलिनी सुपुण्याः सात्रिस्पृशाथोखलुपक्षबर्द्धिनी ।
जयातथाष्टौ विजया जयन्ती द्वादश्य एता इति पापनाशनी ॥२५॥

एतावता प्रकरणेन सपरिकरामेकादशीं निर्णीय पारणाविषये कीदृशी समुपयुक्तेत्येकादशीसहचरेण द्वादशी विषयकनिश्चयमप्यत्रैवदर्शयति-'उन्मीलि नीवञ्जुलिनी' इत्यादि । अथ एकादशीव्रतनिर्णयानन्तरम् द्वादश्यो निरुप्यन्ते, ताश्चाष्टौ उन्मीलिनीवञ्जुलिनी त्रिस्पृशा पक्षवर्द्धिनी जया विजया जयन्ती तथा पापनाशिनीति भेदात्, एता उपरिनिर्दिष्टा सर्वा अपि सुपुण्यफलदायिन्य इति ज्ञातव्याः ।

Scanned by CamScanner ankurnagpal108@gmail.com

एतासां लक्षणं स्वरूपञ्च पुराणे प्रतिपादितम्-उन्मीलिनी वञ्जुलिनी त्रिस्पृशा पक्षवर्द्धिनी । जया च विजया चैव जयन्ती पापनाशिनी । द्वादश्योऽष्टौ महा पुण्या सर्वपापहराद्विज ? इति । तथैव पद्मपुराणे 'एकादशी तु सम्पूर्णा वर्द्धते पुनरेव सा । द्वादशी न च वर्द्धेत कथितोन्मीलिनीति सा' सम्पूर्णैकादशी यत्र द्वादशी च यथा भवेत् । त्रयोदश्यां मुहुर्त्तार्द्धं वञ्जुलि सा हरिप्रिया । शुक्ले पक्षेऽथवा कृष्णे यदा भवति वञ्जुली । एकादशी दिने भुक्त्वा द्वादश्यां कारयेत् व्रतमिति । विशेषतः प्रत्येकस्वरूपं यथाशास्त्रं ज्ञातव्यमिति संक्षेपः ॥२५॥

एकादशी का निर्णय करके एकादशी सहचरित द्वादशी का जो कि पारणोपयोगिनी है तादृश द्वादशी का स्वरूपादि को बतलाने के लिए कहते हैं **उन्मीलिनी** इत्यादि । उन्मीलिनी वञ्जुलिनी त्रिस्पृशा, पक्षवर्द्धिनी, जया, विजया, जयन्ती, पापनाशिनी इस प्रकार के आठ द्वादशी हैं । जो कि उत्तम पुण्यफल को देनेवाली हैं । इनका प्रत्येक का लक्षण तथा स्वरूपादिक को पद्मपुराणादि में देखें । यहाँ संक्षेप किया गया है ॥२५॥

आषाढभाद्रोर्जसितेषु संगता मैत्रश्रवोऽन्त्यादिगतद्युपान्त्यकैः ।
चेद्द्वादशी तत्र न पारणं बुधः पादैः प्रकुर्याद् व्रतवृन्दहारिणी ।२६।

अथ व्रतोपयोगिपारणयोग्यद्वादशीनां स्वरूपभेदादिकं दर्शयित्वा पारणानुपयोगिनिषिद्धद्वादशीनिर्णयमपिकर्तुमुपक्रमते-'आषाढ' इत्यादि । आषाढभाद्रोर्जसितेषु आषाढशुचिमासभाद्रमासकार्तिकमासीयशुक्लाद्वादशी यदि कदाचित्, मैत्रश्रवोऽन्त्यादिगतद्युपान्त्यकैः पादैः, यथाक्रममनुराधाश्रवणरेवतीनक्षत्रगतप्रथमद्वितीयतृतीयचरणैः समन्विता शुक्लाद्वादशी भवेत् तदा तादृशीद्वादश्यां धर्मशास्त्रभिज्ञो विद्वान् एकादशीव्रतपारणं न कुर्यात्-किन्तु संभवेच्चेत्तदा तत्राप्युपोषणीयमेव-'आभाकासितपक्षेषु मैत्रश्रवणरेवती । द्वादशी बुधवारेण हरेर्वासर उच्यते' इति वचनेन तदाहरिवासरयोगस्य सत्त्वात् । अयं च योगः कदाचिदेवोपलभ्यते । यातु द्वादशी अकर्तव्या सा पुनः कीदृशी ? तत्राह-'व्रतवृन्दहारिणीति' यथोक्तेयं द्वादशीव्रतवृन्दानामेकादशीव्रतसमूहानां हारिणी विनाशिनी कथिता । अत्र पारणे व्रतफलविलोपो भवति, तस्मात्तत्र पारणं न कर्त्तव्यमिति । तदुक्तं-'आभाकासितपक्षेतु मैत्र श्रवणरेवती ।

Scanned by CamScanner ankurnagpal108@gmail.com

संगमे नैवभोक्तव्यं द्वादशी द्वादशं हरे, दिति ॥२६॥

एकादशी व्रत पारणा में उपयोगी द्वादशी तिथि का निर्णय करके एकादशी व्रत पारणा में निषिद्ध जो द्वादशी तिथि है उसका निर्णय करने के लिए कहते हैं **'आषाढभाद्र'** इत्यादि । आषाढ मास भाद्रपद मास और उर्जस-कार्तिकमास-इन महिनों का जो शुक्लपक्ष है, उसकी जो द्वादशीतिथि है अर्थात् आषाढ, भादो तथा कार्तिक मास की जो शुक्ला द्वादशीतिथि हैं ये यदि अनुराधा, श्रवणा और रेवती नक्षत्र के यथाक्रम इन नक्षत्रों के प्रथम द्वितीय तृतीय चरणों से युक्त विद्ध हो तव धर्मशास्त्रवेत्ता विद्वान् एकादशी व्रत का पारणा, इन द्वादशी तिथि में न करें । क्योंकि एतादृश द्वादशीतिथि एकादशी व्रत समुदाय के पुण्यों को विनाश करनेवाली है । तदुक्तं-**'आभाकासितपक्षेषु मैत्रश्रवणरेवती । संगमे नैव भोक्तव्यं द्वादशी द्वादशं हरेदि** तिनिषिद्ध द्वादशी विचारः ॥२६॥

卐 अथ श्रीरामनवमीव्रतनिर्णयः 卐

मासे मधौ या नवमीसुयुक्ता शुक्लाऽदितीशेन शुभेनभेन ।
कर्केमहापुण्यतमासुलग्नेजातोऽत्र रमः स्वयमेव विष्णुः ॥२७॥

एकादशीव्रतपारणायोग्यां द्वदशीं तथा पारणानिषिद्धां च द्वादशीं स्व रूपतो भेदतश्च निरूप्य तदनु श्रीरामनवमीव्रतनिर्णयायोपक्रमते 'मासे मधौ या' इत्यादि । मधौ चैत्रे मासे, अदितिशेन, अदितिरीशः स्वामी यस्य स अदितीशः तेन भेन नक्षत्रेण, युक्ता या शुक्ला शुक्लपक्षीयानवमीति । अर्थात् मधुमासी यशुक्लपक्षीयपुनर्वसुनक्षत्रयुक्ता या नवमी श्रीरामनवमीतिलोके प्रसिद्धा सा 'महापुण्यतमा, यस्यामुपवासादिकरणेन महदतिशयमक्षय्यं पुण्यं भवति तादृशी, एतादृश्यां नवम्यां कर्के सुलग्ने एतन्नामकशुभलग्ने, विष्णुर्व्यापको रामोब्रह्म रूपः स्वयमेवजातः । तदुक्तं-'आविरासीत् सकलया कौशल्यायां परः पुमान्' इत्यगस्तिसंहितायाम् । अर्थात् यथोक्तमासस्य शुक्लपक्षीयशुभनक्षत्रशुभलग्न युक्तनवम्यां त्रिपाद्विभूतिनायको भगवान् श्रीरामः स्वयमेवावतरत् । एतावता तस्य भगवतः प्राकृतजन्मनिषेधः कृतः 'जन्मकर्म च मे दिव्य' मित्युक्तेः ॥२७॥

चैत्रमासीय शुक्लपक्ष की पुनर्वसु नक्षत्र सहित तथा अतिशयित पुण्यजनक कर्क लग्न से युक्त नवमी नामक तिथि के मध्याह्नकाल में कौशल्याजी से सकल

Scanned by CamScanner ankurnagpal108@gmail.com

लोक नायक त्रिपाद विभूति नियामक परब्रह्मरूप सर्वेश्वर भगवान् श्रीरामजी अवतरित हुये ॥२७॥

तामष्टमीवेधयुतां विहाय व्रतोत्सवं तत्र करोतु भक्तः ।
असङ्ख्यसूर्यग्रहतोऽधिका वै, या केवला, सा, नवमीप्युपोष्या ॥२८॥

भक्तः श्रीवैष्णवः अष्टमीवेधयुक्तां तां नवमीतिथिं परित्यज्य, तत्रोत्सवं भजनपूजनकीर्तनादिकं कार्यं श्रीरामभक्तः श्रीरामपूजनादिकमवश्यमेव कुर्यादिति । तथा या चैव शुक्लनवमी केवला अर्थात् पुनर्वसुनक्षत्रेणायुक्ता सा असङ्ख्यसूर्यग्रहतोऽपि फलदाने समधिका, इति सापि नवमी समुपोष्या तत्र व्रतं श्रीरामपूजनादिकं कर्त्तव्यम् । अर्थात् सनक्षत्रा तु अतीवशोभना यापि नक्षत्र रहिता सापि नत्याज्या, अपितु उपासनीयैव । 'तिथिः शरीरं देवस्य तिथौ नक्षत्र माश्रितम् । तस्मात्तिथिं प्रशंसन्ति न नक्षत्रं कदाचन' इति वचनेन नक्षत्ररहितापि व्रतादौ ग्राह्यैव नत्याज्या तिथावेव नक्षत्रस्य समावेशात् । इयं च नवमी मध्याह्न व्यापिन्येवग्राह्येति शास्त्रसारः ॥२८॥

श्रीवैष्णवगण अष्टमीवेधरहित नक्षत्रयुक्त यथोक्त नवमी में व्रत उपोषण तथा भजन कीर्तन सपरिवार श्रीरामजी का पूजन अर्चन करें । यदि नवमी पुनर्वसु नक्षत्रादि रहित हो तथापि तादृश नवमी भी असंख्य सूर्यग्रहण से अधिक महत्त्ववाली है । अतः श्रीवैष्णवगण तादृश नवमी का भी आराधना करें । अर्थात् तादृश नवमी में भी व्रतोपवास पूजनादि करें ॥२८॥

अत्र प्रकुर्वीत~~मुदा व्रतोत्सवं~~ रामार्चनं ~~जागरणं महाफलम्~~ ।
~~अनेकजन्मार्जितपापनाशनं~~ श्रीराम~~कीर्तेः श्रवणं च कीर्तनम् ॥२९॥~~

अत्र पूर्वोक्तसकलयोगयुक्तेः पुण्यतिथौ मुदा महताहर्षेण व्रतोत्सवं व्रतमुत्सवञ्च महाफलमतिफलप्रदं श्रीरामार्चनं सपरिकरसर्वेश्वरश्रीरामपूजनं रात्रौ जागरणादिकञ्च प्रकुर्वीत । अनेकजन्मार्जितनानाजन्मसङ्कलितपापसमूहनाशनं तन्नाशकर्त्तारं श्रीरामकीर्तेः-यस्यामलं नृपसदस्सु यशोऽधुनापि गायन्त्यघघ्न मित्यादिरूपेणमहर्षिभिः कीर्तितकीर्तेः श्रवणं तथैव कीर्तनञ्च श्रीवैष्णवश्रेष्ठः प्रकुर्वीत इत्यर्थः । तत्सायुज्यफलप्रदं भवतीतिभावः ॥२९॥

Scanned by CamScanner ankurnagpal108@gmail.com

पूर्वोक्त सम्पूर्ण योगयुक्त श्रीरामनवमी तिथि के दिन महांफल प्रदान करनेवाला श्रीरामचन्द्रजी का व्रत तन्निमित्त उत्सव श्रीरामचन्द्रजी की पूजा रात्रि जागरण अनेक जन्म से अर्जित पापसमूहों को नाश करनेवाली श्रीरामचन्द्रजी की कीर्ति अर्थात् कथा का श्रवण तथा कीर्तन श्रीवैष्णव श्रेष्ठों को अवश्य करना चाहिए ॥२९॥

卐 अथ श्रीजानकीनवमीनिर्णयः 卐

पुष्यान्वितायां तु कुजे नवम्यां श्रीमाधवे मासि सिते हलेन ।
कृष्टाक्षितिः श्रीजनकेन तस्याः सीताविरासीद्व्रतमत्रकुर्यात् ॥३०॥

श्रीरामनवमीव्रतनिर्णयं कृत्वा तत्र व्रतादिकं कुर्यादित्यादिश्य तदनुपरम शक्तिरूपा श्रीजानकीनवमी श्रीरामानन्यत्वात्तत्र व्रतादिकं कर्त्तव्यमिति दर्शयितु माह-'पुष्यान्वितायां तु कुजे' इत्यादि । श्रीमाधवे वैशाखेमासि सिते कृष्णेतर शुक्लपक्षे कुजेमङ्गलदिवसे पुष्यान्वितायाम् पुष्यनक्षत्रयुक्तायां नवम्यां तिथौ जनकेन विदेहाधिपतिना राज्ञा हलेन तदग्रेण क्षितिः पृथिवी कृष्टा पृथिव्याः कृत वान् कर्षणमित्यर्थः । ततः तस्याः पृथिव्याः सकाशात् सीता जगज्जननी श्री सम्प्रदायप्रवर्तिका श्रीरामाभिन्नरूपा आविरासीत् । कर्षितपृथिवीतः सर्वेश्वरी श्रीसीता प्रादुर्भूता एतावता एतस्या अयोनिजत्वमेवाभिव्यञ्जितम् । तस्मात् ईदृश शुभपुण्यतिथौ प्रतिवर्षमत्रव्रतोत्सवपूजनादिकम् श्रीरामपरायणः कुर्यादिति विधिः । अत्रापि तुल्यन्यायात् पूर्ववद्विध्यादिकम् ज्ञेयम् ॥३०॥

माधव वैशाख मास शुक्लपक्ष मङ्गल दिवस पुष्यनक्षत्रयुक्त नवमी तिथि में राजा जनकजी ने पृथिवी को पूजन कर हल से जोता । उस हल के जोतने से पृथिवी से श्रीसीताजी का प्रादुर्भाव हुआ । इसलिए इस पुण्य तिथि नवमी के दिन श्रीसीताजी का व्रत पूजनोत्सवादिक भक्तलोग करें । यह तिथि पूर्व तिथि के वेधरहित हो तथा मध्याह्न व्यापिनी हो उसमें व्रतोत्सवादिक किया जाय । यदि दोनों दिन में मध्याह्न व्यापिता हो तब परदिन में ही व्रतादिक करना चाहिए । पूर्वदिन में व्रतादिक न किया जाय ॥३०॥

卐 अथ श्रीहनुमज्जयन्तीव्रतनिर्णयः 卐

स्वात्यांकुजेशैवतिथौ तु कार्तिके कृष्णेऽञ्जनागर्भत एंव मेषके ।

Scanned by CamScanner ankurnagpal108@gmail.com

श्रीमान्कपीट् प्रादुरभूत् परंतपो व्रतादिना तत्रतदुत्सवंचरेत् ॥३१॥

श्रीसम्प्रदायसंप्रवर्तकपरम्पराक्रमेण श्रीसीतानवमीं निर्णीय तदनु श्रीहनुमज्जयन्तीव्रतोत्सवादिकं दर्शयितुमाह-'स्वात्यांकुजेशैवतिथौ' **इत्यादि । शुभे कार्तिके मासि कृष्णेपक्षे शिवस्वामिके चतुर्दश्यां तिथौ स्वातीनक्षत्रान्वितायाम् मेषके मेषलग्ने, सूर्यास्तादनन्तरम् परन्तपः श्रीमान् कपीश्वरोवानराणामधीशोऽञ्जनागर्भतस्वयमाविरभूत् प्रादुर्भूतो जातः 'ऊर्जे कृष्णचतुर्दश्यां भौमे स्वात्यां कपीश्वरः । मेषलग्नेऽञ्जनागर्भात्प्रादुर्भूतः स्वयं शिवः ॥' इत्यगस्त्यसंहिता वचनप्रमाण्यात् श्रीहनुमतः श्रीशिवावतारत्वं कार्तिकमासेऽवतारत्वञ्च सुव्यक्तं भवति । तादृशशुभतिथौ श्रीहनुमतोव्रतोत्सवादिकं कुर्यात् । इयं च चतुर्दशी सायाह्नव्यापिनी व्रतादौ ग्राह्या उभयदिने तथा त्वे परैव ग्राह्येतिसंक्षेपः ॥३१॥**

कार्तिकमास कृष्णपक्ष चतुर्दशी तिथि मंगलवार तथा मेषलग्न के उदय अर्थात् सायंकाल में शत्रु संतापक श्रीमान् कपीश्वर श्रीहनुमानजी अञ्जना के गर्भ से आविर्भूत हुये । इस शुभ तिथि में भक्तलोग श्रीहनुमानजी का व्रत पूजनादि करें श्रीअगस्त्य संहिता में भी स्वयं श्रीशिवजी का कार्तिक कृष्णचतुर्दशी को श्रीहनुमानजी के स्वरूप में प्रकट होना लिखा है तदनुसार ही श्रीअयोध्याजी में श्रीहनुमानगढी एवं अन्यत्र भी श्रीरामानन्दीय स्थानों में श्रीहनुमान् जयन्ती विशेष समारोह के साथ मनाई जाती है । यह चतुर्दशी सायाह्नव्यापिनी आराधनीय है । उस दिन में सायाह्न व्याप्ति न हो तो परा का ही ग्रहण करना चाहिए ॥३१॥

卐 अथ श्रीनृसिंहजयन्तीव्रतनिर्णयः 卐

वैशाखमासीयचतुर्दशीसिता निशामुखेयाऽनिलभेन संयुता ।
सोमेऽवतारोनृहरेरभूदथो व्रतोत्सवं तत्र मुदासमाचरेत् ॥३२॥

श्रीहनुमज्जयन्तीनिर्णयं कृत्वा तदनु श्रीनृसिंहजयन्तीतिथिं निर्णेतुमाह वैशाखमासीयेत्यादि । **वैशाखमासेभवा वैशाखमासीया, सिताशुक्ला चतुर्दशी तिथिः, या खलुः अनिलभेन स्वातीनक्षत्रेण संयुक्ता तादृशतिथौ सोमवारे निशामुखे सायंकाले भगवतो नृसिंहस्यावतारो जातः तद्दिने सोऽभिव्यक्तोऽभूत् । इति तादृशपुण्यदिने व्रतोत्सवादिकं कुर्यादित्यादेशः ॥३२॥**

Scanned by CamScanner ankurnagpal108@gmail.com

वैशाखमास शुक्लपक्ष स्वातीनक्षत्रयुक्त चतुर्दशी तिथि सोम के दिन सूर्य के अस्तमयकाल अर्थात् सायंकाल में भगवांन् श्रीनृसिंहजी का अवतार हुआ। इसलिए यथोक्त तिथि में प्रतिवर्ष भक्तलोग श्रीनृसिंह भगवान् का व्रत पूजन उत्सवादिक करें ॥३२॥

स्मरेण विद्धा तु चतुर्दशी यदा भवेद्धनापत्यविनाशिनी तदा ।
तत्रोपवासो न जनैर्विधीयतां महात्मभिर्विष्णुपरायणैरपि ॥३३॥

येयं नृसिंहचतुर्दशी सा यदि स्मरेण त्रयोदश्या अरुणोदयकाले विद्धा संयुक्ता तदा सा नोपोष्या यतो विद्धा कामेन सा धनापत्ययोर्विघातिनी विनाश कारिणी भवति व्रतकर्तुः । अतो विष्णुपरायणैर्महात्मभिश्च तत्र ताद्दशस्मरविद्ध तिथौ व्रतोपवासपूजनादिकं कदापि न समाचरणीयम् ॥३३॥

जब चतुर्दशी कामतिथि त्रयोदशी से अरुणोदयकाल में विद्धा संयुक्त हो तो वह धन एवं पुत्र का विनाश करनेवाली होती है। अतः उसमें व्रत पूजनादिक कार्य को विष्णु भक्तपरायण महात्मा लोगों को नहीं करना चाहिए ॥३३॥

卐 अथ श्रीकृष्णाष्टमीव्रतनिर्णयः 卐

भाद्रेऽसितेनिशीथेऽथ रोहिण्यामष्टमीतिथौ ।
सिंहमर्केगतेसौम्ये कृष्णोजातोविधूयते ॥३४॥

अथ नरसिंहचतुर्दशीव्रतादिकं प्रदर्श्य श्रीकृष्णाष्टमीव्रतनिर्णयं कर्तुमाह- 'भाद्रेऽसितेनिशीथे' इत्यादि । भाद्रमासे, असिते कृष्णपक्षे निशीथेमध्यरात्रौ अष्टम्यां तिथौ रोहिणीनक्षत्रेचन्द्रोदये जाते सति तथा अर्के सिंहगते अर्थात् सिंहराशिस्थितेसूर्ये, तस्मिन् सौम्ये शुभसमये मथुरायां वसुदेवगेहे देवकीतो भगवान् श्रीकृष्णो जातः प्रादुर्भूतो नतु तस्य प्राकृतपुरुषवज्जन्माभूत् तदीय विग्रहस्य लोकातीतत्वात् ॥३४॥

नृसिंह चतुर्दशी का विवेचन करके कृष्णाष्टमी व्रत का विवेचन करते हैं- '**भाद्रेऽसिते**' इत्यादि श्लोकद्वय से। भाद्रपद मास की कृष्णपक्ष मध्यरात्री में रोहिणी नक्षत्रयुक्त अष्टमी तिथि में सिंहराशी स्थित सूर्य के विद्यमानता में जब चन्द्रोय हो गया था तब मथुरा में वसुदेव के गृह में देवकी से भगवान् श्रीकृष्ण लोकों का

Scanned by CamScanner ankurnagpal108@gmail.com

उपकार करने के लिए जन्म ग्रहण किये अर्थात् यथोक्तकाल में देवकी से प्रादुर्भूत हुए ॥३४॥

कृष्णजन्माष्टमीसोक्ता तस्यां कृष्णव्रतोत्सवम् ।
कुर्वीत विधिसंयुक्तं चतुर्वर्गफलप्रदम् ॥३५॥

सेयं भाद्रकृष्णाष्टमी, कृष्णजन्माष्टमीतिशब्देन लोके प्रोक्ताव्यवहृता भवति, तस्या यथोक्तगुणविशिष्टायामष्टम्यां विधिसंयुक्तं कृष्णव्रतोत्सवम् भगवतः श्रीकृष्णस्य व्रतमुपवासादिकम्, भजनकीर्त्तनपूजनादिमहोत्सवं च वैष्णवैः कर्त्तव्यमिति । यतो विधिपूर्वकसम्पादितमुत्सवं धर्मार्थकाममोक्षाख्यचतुर्वर्गफलप्रदं भवति ॥३५॥

यथोक्त अष्टमी का नाम कृष्णजन्माष्टमी कहा गया है । इस कृष्णाष्टमी तिथि में भगवान् श्रीकृष्णजी का व्रत उपवास तथा अर्चन पूजनादिक विधिपूर्वक करना चाहिए । क्योंकि यथोक्त समय में भगवान् का यह व्रतादिक धर्मार्थ चतुर्वर्गफल को देनेवाला है ॥३५॥

त्याजाष्टमीचेदथवाजिविद्धा तथाग्निविद्धं विधिभं च हेयम् ।
चेदष्टमीनो विधिभेन युक्ता महात्मभिर्विष्णुपरायणैस्तैः ॥३६॥

अथ शुद्धव्रतार्हाष्टमीविचारानन्तरं त्याज्यामष्टमींदर्शयितुमाह-'त्याज्येत्यादि' चेत् यदि अष्टमी जन्माष्टमीवाजीविद्धा अरुणोदयकाले सप्तम्या संयुक्ता भवेत् तथा विधिभं रोहिणीनक्षत्रमग्निविद्धं कृत्तिकया संयुक्तं भवेत्, तदा, एतदुभयमपि हेयं त्याज्यमेव यदि कदाचित् कृत्तिका वेधरहितरोहिणीनक्षत्रेण युक्ताष्टमीवेधरहिताष्टमी भवेत्तदा विष्णुपरायणैर्महात्मभिर्नत्याज्या अर्थात् व्रतोपवासादौ ग्राह्यैवेति ॥३६॥

यदि कृष्णाष्टमी सप्तमी से तथा रोहिणी कृतिका वेधयुक्त हो तब विष्णुभक्त महात्मालोग तादृशाष्टमी तथा तादृशीरोहिणी नक्षत्र का व्रतोत्सव में त्याग कर दें और यदि वेधरहित अष्टमी तथा वेधरहित रोहिणी हो तब उसका त्याग न करें किन्तु उसमें व्रतोत्सवादिक करें । अर्थात् यह व्रत योग्य है ॥३६॥

विद्धा जयन्ती यदि सप्तमीयुता

Scanned by CamScanner ankurnagpal108@gmail.com

शुद्धा तथा सा नवमीयुता यदि ।
विद्धाऽथ वेद्याग्नियुता हि रोहिणी
ज्ञेया तु शुद्धा यदि सा परान्विता ॥३७॥

केयमष्टमीशुद्धा या समुपास्या का चाशुद्धा या नोपास्येति शङ्कायां 'जयन्तीद्विविधा ज्ञेया विद्धाऽविद्धाविधानतः । विद्धा तु सप्तमीयुक्ता शुद्धा तु नवमीयुता' 'रोहिणीकृत्तिकायुक्ताविद्धा शुद्धापरान्विता' इत्यादिनारदीयवचना नुसारेणशुद्धामशुद्धाञ्च विनिश्चेतुमुपक्रमते-'विद्धाजयन्ती यदि सप्तमीयुता' इत्यादि । यदा खलु अष्टमी स्वाव्यवहितपूर्वकालिकसप्तम्यायुक्ता भवेत्, तदा सा विद्धाजयन्ती ज्ञेया ज्ञातव्या, वेधश्चारुणोदयकालिको ज्ञातव्यः यदि साऽष्टमी स्व परकालिकनवम्यायुक्ता भवेत्तदा सा शुद्धाजयन्ती ज्ञातव्या, अत्र व्रतादिकं कर्तव्यम् । एवं या रोहिणी अग्निभेदकृत्तिकया युक्ता भवेत्तदासाविद्धाजयन्ती ज्ञातव्या, अथ यदा सैव रोहिणी परान्विता मृगशिरायुक्ता भवति तदा सा शुद्धा जयन्ती सैव व्रतादौ ग्राह्यानान्येति । वेधस्तु त्रिप्रकारको भवति क्वचित्तिथिवेधः क्वचिन्नक्षत्रवेधः क्वचित्तदुभयवेधः । अयमर्थः या सप्तमीविद्धाकृत्तिकाविद्धासप्तमीकृत्तिकाभ्यां च विद्धा, भाद्रकृष्णाष्टमी सा विद्धाजयन्तीतिबोद्धव्या, अथ तु या सप्तमी कृत्तिकावेधवियुक्ता नवमीमृगशिराभ्यां युक्ता सा भाद्रकृष्णाष्टमी शुद्धा ज्ञातव्या व्रतोपवासादिसमुपयुक्ता । तदुक्तम्-'अष्टमी कृष्णपक्षस्य रोहिणी ऋक्षसंयुता । भवेत्प्रौष्ठपदे मासे जयन्ती नाम सा स्मृतेति विष्णुधर्मोत्तरपुराणे ३७

कौन जयन्ती शुद्ध है तथा कौन अशुद्ध है ! इसका निर्णय करने के लिए कहते हैं-'**विद्धाजयन्ती यदि सप्तमीयुता**' इत्यादि । यदि अष्टमी तिथि सप्तमी से युक्त हो तथा रोहिणी नक्षत्र कृत्तिका नक्षत्र से युक्त हो तो तादृश जयन्ती को विद्धा जयन्ती समझना और यदि भाद्रमासीय कृष्णपक्षीय अष्टमीतिथि नवमी से युक्त हो तथा रोहिणी नक्षत्र मृगशिरा नक्षत्र से युक्त हो तो शुद्धा कृष्ण जयन्ती समझना चाहिए तदुक्तं-'जयन्तीद्विविधा ज्ञेया विद्धाविद्धाविधानतः । विद्धातु सप्तमी युक्ता शुद्धातु नवमीयुता ॥ रोहिणी कृत्तिकायुक्ता विद्धाशुद्धापरान्वितेति ।' इत्यादि वचनों से विद्धा तथा शुद्धा भेद को जानकर शुद्ध जयन्ती में भक्तलोगों को व्रतोपवास अर्चन पूजना

Scanned by CamScanner
ankurnagpal108@gmail.com

दि करना चाहिए ॥३७॥

卐 अथ वामनद्वादशीव्रतनिर्णयः 卐

भाद्रेऽथ शुक्लेऽभिजिति प्रभुर्हरिर्या द्वादशीवैष्णवभेन संयुता ।
तत्रादितावाविरभूच्च वामनो व्रतोत्सवं तत्र मुदा समाचरेत् ॥३८॥

कृष्णाष्टमीव्रतंनिर्णीय भाद्रमासे एव सम्पत्स्यमानवामनद्वादशीव्रतं निर्णेतु मुपक्रमते 'भाद्रेऽथशुक्ले' इत्यादि । अथ कृष्णजयन्तीव्रतनिर्णयानन्तरं भाद्रमा सि प्रौष्ठपदेशुक्लेपक्षे वैष्णवभेन-विष्णुस्वामिकभेन नक्षत्रेण श्रवणनक्षत्रेणे त्यर्थः एतादृशनक्षत्रेण संयुक्ता द्वादशीतिथिस्तादृशद्वादश्याम्-'अभिजिति' मध्याह्नकाले मध्याह्नकाल एवाभिजितः संभवान्नान्यदा, प्रभुः सर्वशक्तिसम्पन्नः 'परास्यशक्तिर्विविधैवश्रूयते' इत्यादिश्रुतेः हरिः हरति विनाशयति प्रपन्नानां पापं संसारभयञ्च यः हरिर्भगवान् श्रीरामचन्द्रः 'सर्वेषामवताराणामवतारी रघूत्तमः' इत्यागमोक्तेः अदितौकश्यपेन वामनरूपं धारयन् आविरभूत् आविर्भूतोजातः प्रकटित इत्यर्थो नतु प्राकृतपुरुषवत् समुत्पन्नः । एतादृशभाद्रशुक्लश्रवणनक्षत्र युक्तद्वादश्यां तिथौ मध्याह्नकाले मुदाहर्षेण समुत्साहयुक्तः सन् भगवतोवामनस्य व्रतोत्सवं कुर्यात् । तस्य व्रतमुपवासादिकमर्चनपूजनादिकं भक्तैः सदा कर्तव्य मितिभावः ॥३८॥

भाद्र पद शुक्लपक्ष के द्वादशीतिथि के श्रवण नक्षत्र से युक्त मध्याह्नकाल में-**'परास्यशक्तिर्विविधैवश्रूयते'** इत्यादि अनेक श्रुत्यनुमोदित सर्वसमर्थ सभी अवतारों के अवतारी परमब्रह्म भगवान् श्रीरामचन्द्रजी अदितिजी से वामन रूप को धारण करके आविर्भूत हुये, अर्थात् प्रगट हुए । इसलिए भक्तलोगों को चाहिए कि प्रति वर्ष यथोक्त द्वादशी तिथि में सोत्साह आनन्दपूर्वक भगवान् वामन का व्रतोपवास अर्चनपूजन वगैरह यथाविधि करें ॥३८॥

स्पृशत्येकादशी स्पृष्टा द्वादशी श्रवणेन चेत् ।
विष्णुशृङ्खलयोगोऽयं भाद्रशुक्ले प्रकीर्तितः ॥३९॥
श्रवणद्वादशी ह्येषा पुनरावृत्तिनाशिनी ।
तस्मादुपवसेदत्र यत्नतो मतिमान्नरः ॥४०॥

Scanned by CamScanner ankurnagpal108@gmail.com

भाद्रशुक्लद्वादशी यदि एकादशीस्पृशा एकादशीवद्धाश्रवणनक्षत्रेण युक्ताभवेत् तत्र तादृशतिथौ विष्णुश्रृङ्खलनामको योगो जायते इति ज्ञातव्यः । अतस्तादृशतिथौ मतिमान्नर उपवसेत् उपवासं कुर्यात् यत एषा श्रवणद्वादशी पुनरावृत्तिनाशिनी जन्ममरणजनितक्लेशं विनाशयति । तस्मादत्रव्रतोपवासादिकं बुद्धिमान् कुर्यात् ॥३९-४०॥

भाद्रशुक्लाद्वादशी एकादशी से विद्ध होकर के यदि श्रवण नक्षत्र से युक्त हो तो वह विष्णु श्रृङ्खला योग होता है ऐसा कहते हैं । एतादृश योगवती द्वादशी सर्वपाप को नष्ट कर देती है । इसलिए भक्तलोग इसमें व्रतोपवास करें । इसका वर्णन मत्स्य पुराण में भी किया है-'द्वादशीश्रवणस्पृष्टास्पृशेदेकादशीयदि । स एव वैष्णवो योगो विष्णुश्रृङ्खलसंज्ञकः ।' तस्मिन्नुपोष्य विधिवन्नरः स क्षीणकल्मषः । प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिर्दुर्लभाम्' इति । एवं विष्णु धर्म में भी कहा है-'एकादशी द्वादशी च वैष्णव्यमपितत्रचेत् । तद्विष्णुं श्रृङ्खलं नाम विष्णुसायुज्यकृद्भवेत्' इत्यादि वचनों से सिद्ध होता है कि विष्णुश्रृङ्खल योग अतिप्रशस्त है । तथा यह योग कदाचित् होता है । इसलिए इस द्वादशी में व्रतोपवास आवश्यक है ॥३९-४०॥

तथा यथाकालमतन्द्रितैस्तैरथाधिरोपादिकमुत्सवादिकम् ।
सदा विधेयं हरितोषणं परं शुभप्रदं तद् बहुशास्त्रसंमतम् ॥४१॥

अथ यथैकादशीप्रभृतिकव्रतादिकं भगवत्तोषकारकतया वैष्णवैरतन्द्रितैः कर्तव्यं तथैवान्यदपि, उत्सवादिकं कर्तव्यमित्याशयेनोपक्रमत आचार्यः-'तथा यथाकालमतन्द्रितैरित्यादि' **यथा एकादश्यादिप्रभृतिकं वैष्णवैर्विधेयं तथा यथा कालं यस्योत्सवादेर्यथाकालस्तं कालमनतिक्रम्य, अतन्द्रितैरालश्यरहितैः रथाधि रोपादिकमुत्सवादिकं विधेयं कर्तव्यमेव, सदाप्रतिवर्षं तत् तत् तिथिषु, आदि पदेन दोलादिकमप्युत्सवं कर्तव्यमेव । यतो बहुशास्त्रसम्मतमनेकशास्त्रप्रतिपादित मेकादश्यादिवदेव हरितोषणं भगवतो रामस्य संतोषजनकम् शुभप्रदं मोक्षफल जनकं रथारोपणादिकं महोत्सवमस्ति, अतोऽतन्द्रितैर्वैष्णवैः कर्तव्यमेव । एवं च शुद्धाषाढशुक्लद्वितीयायां पुष्यनक्षत्रयुक्तायां बहुमूल्येरथे श्रीजनकजयासह श्रीरामं समारोप्य यात्रोत्सवं विधेयम् । क्वचित् नक्षत्ररहितकेवलद्वितीयायामपि रथमारोप्य यात्रां कारयेत् तिथेः प्रधानत्वात् । तथा ब्राह्मणभोजनवस्त्रादिदाने**

Scanned by CamScanner ankurnagpal108@gmail.com

नापि तस्मिन्महोत्सवे पूजयेत्संतोषयेच्चेति । तदुक्तं स्कन्दपुराणे-

'आषाढस्यासिते पक्षे द्वतीयापुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ॥'
'यात्रोत्सवं प्रवर्त्याथ प्रीणयेत द्विजांस्तथा ।
ऋक्षाभावे तिथौकार्या यात्रा सा प्रीतये मम ॥ इति ।'

यथा रथयात्रोत्सवं कुर्यात् तथैवदोलोत्सवादिकमपिकर्त्तव्यं तथोक्तम् गरुडपुराणादौ, तथाहि-

'दक्षिणाभिमुखं देवं दोलारूढं सुरेश्वरम् ।
सकृद्दृष्ट्वा तु गोविन्दं मुच्यते ब्रह्महत्यया ॥'
'दोलारूढं प्रपश्यन्ति कृष्णंकलिमलापहम् ।
अपराधसहस्त्रैस्तु मुक्तास्ते नैव संशयः ॥'
'तावत्तिष्ठन्ति पापानि जन्मकोटिकृतान्यपि ।
यावन्नान्दोलयेद्भूप ? कृष्णं कंशविनाशनम् ॥' इति ।

भगवद्दोलाया वास्तविकतत्वन्तु-जगद्गुरुश्रीगङ्गाधराचार्यप्रणीतश्रीरामदोलिकाशयनाष्टकस्यमत्प्रणीततात्पर्यदीपिकाटीकातोऽनुसन्धेयं विशेषार्थिभिः । एवं श्रीरामलीलादिकं लोकमर्यादानुसारेणकर्त्तव्यं नतु ग्रामीणनियमेनेति संक्षेपः ॥४१॥

जिस तरह एकादशी प्रभृतिक व्रतोत्सवादिक शास्त्र सिद्ध होने से अवश्य कर्तव्य है, उसी तरह पुराणादिकों से अनुमोदित उत्सवान्तर भी कर्तव्य है । इस बात को बतलाने के लिए आचार्य उपक्रम करते हैं-'**तथा यथाकालमतन्द्रितैः**' इत्यादि । तथाहि अनेक पुराणेतिहास रूप सम्मत शास्त्र भगवान् श्रीरामजी के अतिशय प्रीति जनक तथा धर्मार्थ काम मोक्षफल का दायक रथयात्रा प्रभृतिक उत्सवादिक को भी आषाढशुक्ल द्वितीया पुष्यनक्षत्र में अथवा पुष्य नक्षत्र रहित केवल द्वितीया में करना चाहिए । जिस तरह एकादशी प्रभृतिक व्रतोत्सव करणीय है, उसी तरह यथाकाल में रथयात्रोत्सव एवं श्रावणमास में झुला महोत्सव भी वैष्णवों को करना चाहिए । दोलोत्सवादिकों का यथाशास्त्र सप्रमाण विवरण श्रीरामदोलिकाशयनाष्टक में मेरी टीका में देखें ॥४१॥

Scanned by CamScanner ankurnagpal108@gmail.com

卐 कृपादिभेदनिरूपणम् 卐

कर्मप्रवाहेण तु चेतनस्य संमग्नस्य संसारमहार्णवेचिरम् ।
उपर्य्यहो ? संसरतोऽवशस्य सत् कृपोद्भवत्येव हरेरहेतुका ॥४२॥

'यमेवैस वृणुते तेन लभ्यः' इतिश्रुत्युक्तेर्मोक्षसाधनेषु भगवत्कृपैव मुख्यं साधनमिति प्रपञ्चयितुमाह 'कर्मप्रवाहेण तु चेतनस्य' **इत्यादि । संसारमहार्णवे जन्ममरणशोकमोहमायादिसंकुले महासमुद्रोपमिते चिरम् अनादिकालात्सम्मग्नस्य निमज्जमानस्य जीवराशेः कर्मप्रवाहेण अनादिसंचितशुभाशुभस्वकृतपुण्यपापात्मककर्मपरम्परया संसरतो भवाद्भवान्तरं गच्छतो जन्ममरणादिना, सुखदुःखात्मकं कर्मफलं भुञ्जानस्यात एवातिदुःखितस्य अवशस्य कर्मपराधीनस्य परतन्त्रस्य जीवसमुदायस्योपरि हरेर्भगवतः सर्वेश्वरश्रीरामस्य सर्वसमर्थस्य कापि विलक्षणा, अहेतुकी सत्कृपा, उद्भवति हेतुः कारणं तद्रहिता अर्थात्स्वाभाविकी कृपा प्रादुर्भवति कृपासागरत्वादनपेक्ष्यैव कारणान्तरम् । इयमेव भगवतः सर्वेश्वरश्रीरामस्य स्वाभाविकी कृपा जीवस्य संसारनिवृत्तिलक्षणनित्यनिरतिशयानन्दावाप्तिरूपसायुज्यमोक्षस्य कारणमिति 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन यमेवैस वृणुते तेन लभ्यः' इत्यादिश्रुत्युक्तेः ॥४२॥**

मोक्ष साधनों में सर्वश्रेष्ठ साधन भगवान् श्रीरामजी की निर्हेतुकी सत्कृपा को बतलाने के लिये उपक्रम करते हैं-'**कर्मप्रवाहेण तु चेतनस्येत्यादि**' सर्वप्रकारक अनर्थ का कारण इस संसाररूप समुद्र में अनेक भवोपार्जित शुभाशुभ कर्म के प्रवाह द्वारा चिरकाल अनादि काल से निमज्जमान अत एव विवश सर्वथा पराधीन जो जीव समुदाय हैं एतादृश जीवों के ऊपर करुणा सागर भगवान् श्रीरामजी की अहैतुक अकारण स्वाभाविक ही कृपा होती है। अर्थात् जीवों के ऊपर जो भगवान् श्रीरामजी की उद्धार करने की इच्छा होती है वह स्वाभाविक है कारणाधीन नहीं ॥४२॥

मोक्षे मुमुक्षोर्नहि तारतम्यं फले प्रपन्नस्य तु सत्प्रपत्तेः ।
अस्त्येवतद्रामकृपोपलभ्ये पतिं श्रियोऽनन्तगुणार्णवं तम् ॥४३॥

अनन्तगुणार्णवम् हेयप्रत्यनीकानन्तकल्याणगुणसागरं तं श्रुतिस्मृतिपुराणादिप्रतिपाद्यम् श्रियः श्रीसीतालक्षणश्रियाःपतिं स्वामिनं भगवन्तं श्रीरामम्

Scanned by CamScanner
ankurnagpal108@gmail.com

प्रपन्नस्य शरणागतस्य मुमुक्षोः प्राकृतिकबन्धनहातुमिच्छतोजीवस्य सत्प्रपत्तेः त्रिविधव्यापारेण प्रपत्तिं कुर्वतः श्रीरामकृपोपलभ्ये सर्वव्यापकश्रीरामस्यकृपा मात्रसाध्ये मोक्षात्मकफले मनागपि तारतम्यं न विद्यते, अर्थात् सर्वेश्वरश्रीरा मकृपामात्रसाध्ये मोक्षे किंचिदपि तारतभ्यं नास्ति सर्वदैकरूप एव मोक्षो नतु तत्र भेद इतिभावः ॥४३॥

सांसारिक बन्धन से छुटने की इच्छावाले हेयप्रत्यनीक अनन्त कल्याण गुणों के महासागर भगवान् श्रीरामजी के शरणागत जो भक्त हैं उनको भगवान् श्रीरामजी की कृपा से प्राप्त जो मोक्षरूप फल है उस मोक्षात्मक फल में थोडा भी तारतम्य न्यूनाधिक भाव नहीं है। अर्थात् पारलौकिक फल साधन यागादि से जायमान स्वर्ग रूप फल में जिस तरह तारतम्य होता है उस तरह मोक्षस्वरूप फल में किसी प्रकार का भेद नहीं है। भाव यह कि सर्वेश्वर भगवान् श्रीरामजी के निवास स्थान दिव्यधाम श्रीसाकेत प्राप्ति रूप मोक्ष में भेद नहीं है, मोक्ष एक रूप है। इस कथन से मोक्ष में परस्परतारतम्यवादी सिद्धान्त का निराकरण होता है ॥४३॥

भवन्त्युपायान्तरमेव सर्वे स्वातन्त्र्यतोमुक्तिपदप्रदास्ते ।
सुकर्मसंवेदनभक्तियोगाः प्रपत्तिःनिष्ठैः समनुष्ठितास्तु ॥४४॥

प्रपत्तिनिष्ठैः प्रपत्तौ शरणागतौ निष्ठावद्भिः श्रद्धालुभिस्तैर्मोक्षमिच्छद्भिः समनुष्ठिताः समीचीनप्रकारेण संपादिताः सुकर्मसंवेदनभक्तियोगाः शोभनकर्मज्ञा नभक्तियोगरूपाः उपायान्तरं, परमपुरुषप्राप्तौमुख्योपायः सर्वेश्वरश्रीरामशरणाग तिस्तदतिरिक्तमुपाया उपायान्तरमेव इत्येते सर्वे-सुकर्मसंवेदनभक्तियोगाः स्वा तंत्र्यतः स्वातंत्र्येणैव मुक्तिपदप्रदा मोक्षप्रापका उपाया भवन्तीति ॥४४॥

भगवत् प्रपत्ति अर्थात् भगवान् श्रीरामजी की शरणागति में निष्ठा-विश्वास रखनेवाले तथा ममतारहित उपासक के द्वारा कृत संपादित कर्मयोग ज्ञानयोग तथा भक्तियोग भी मोक्ष का प्रधानोपाय ही है तथा वे शरणागति से उपायान्तर भी हैं। ये पूर्व प्रदर्शित सभी करण उपाय अवश्यमेव मोक्षरूप कार्य का साधक उपाय हैं ॥४४॥

विभूत्वतो निर्भरतापरैस्तैः श्रीव्यासिरार्यैरभिधीयते हि ।

Scanned by CamScanner ankurnagpal108@gmail.com

प्रपञ्चनिर्मातृविरिञ्चिहेतु श्रीरामपादाब्जनिविष्टचित्तैः ॥४५॥

अथ मोक्षस्य कर्मज्ञानभक्तियोगस्वरूपस्योपायान्तरकारणान्तरकथना नन्तरम् प्रपञ्चस्य सकलजगतोनिर्माता योविरिञ्चिर्ब्रह्मातस्यापि हेतुभूतकारणी भूतश्रीरामस्य पादाब्जे चरणकमले निविष्टचित्तैः तदीयपादकमले निवेशितम नोभिः निर्भरतापरैः भगवति परेशे श्रीरामे समर्पितभारतया स्वकीयभरणपोष णादिचिन्तारहितैस्तैर्मुमुक्षुभिरार्यैर्विभुत्वतोव्यापकतारूपेणैव, श्रीव्याप्तिःश्रियः श्रीसीतायाः व्याप्तिरभिधीयते, व्यापकत्वेनैवश्रियोव्याप्तिर्नत्वणुत्वेनेति संक्षेपः ॥४५॥

मोक्ष के प्रति कर्मयोग ज्ञानयोग और भक्तियोग को स्वातन्त्र्येण उपायान्तर प्रतिपादन करने के बाद संपूर्ण जगत् का निर्माण करनेवाले जो ब्रह्माजी उनका भी अर्थात् ब्रह्मा का भी कारण स्वरूप सर्वेश्वर श्रीरामजी के चरणकमल में संलग्न है मन जिनका एतादृश तथा श्रीरामजी के ऊपर पूर्णरूप से भरोसा रखनेवाले एवं श्रेष्ठ विद्वान् मुमुक्षु लोगों ने श्रीसीताजी की व्याप्ति को विभुत्व रूप से ही स्वीकार किया है अणुत्व रूप से नहीं ऐसा निश्चितार्थ है ॥४५॥

नित्यं सा पुरुषाकारभूता सीताऽनपायिनी ।
अनुपायान्तरैर्विज्ञैरुच्यते तदुपायता ॥४६॥

अनुपायान्तरैः उपायशून्यपरैर्विज्ञैः कुशलैः प्रपत्तिचतुरैरर्थात्शरणागति निष्ठैः पुरुषैर्मतान्तरीयैरनपायिनीनित्या श्रीसीतैवनित्यं सदापुरुषाकारभूता तस्या एवोपायत्वं मन्यते अर्थात् श्रीसीताया एवोपायत्वं विनिगद्यते । यतो हि सा जीवदुःखं श्रीभगवन्तं करुणावरुणालयं श्रीरामं श्रावयति ॥४६॥

शरणागति से अतिरिक्त उपायों से कर्म ज्ञान भक्ति से रहित अर्थात् मात्र शरणागति को कारण माननेवाले पुरुष भगवान् श्रीरामजी की आज्ञा को शिरोधार्य करके कर्माद्यनुष्ठान में प्रवृत्त नरश्रेष्ठोंने नित्या पुरुषाकार रूपा श्रीसीताजी को मोक्षोपाय बतलाया है ॥४६॥

विभोश्चवात्सल्यमहार्णवस्य वै वात्सल्यमिष्टं जनुदोषभोगिता ।
समुच्यते तैर्नृभिरस्वतन्त्रकैः सदा सदाचारपरायणैर्वरैः ॥४७॥

Scanned by CamScanner ankurnagpal108@gmail.com

वरैः प्रशस्तैः सर्वदासदाचारपरायणैः समीचीनाचारानुगतैः तैर्मुमुक्षभिर्नरै रधिकारिव्यक्तिभिः अस्वतन्त्रकैः परेशपराधीनैः इष्टं प्रपन्नपुरुषस्यमनोऽनुकूलम्, विभोः सर्वव्यापकस्य भगवतोरामस्य वात्सल्यमहार्णवस्य दयासागरस्य संबन्धियत् वात्सल्यम् तत् शरणागतभक्तगतदोषभोगित्वरूपमेव, तत्र दोषाणा मपराधाणां भोगित्वरूपमेव अर्थात् यथा वात्सल्यवतीमातापुत्रापराधं तच्छरीरग तमलादिकं पुत्रवात्सल्यादपनोदयति । तथैव भक्तोपरिनिःकारणवात्सल्यपरो भगवान् श्रीरामो भक्तस्य यत् प्राकृतिकं मलादिकं भक्तस्वरूपापनोदकं, तं सर्वदोषं स्वयमेवापनोदयति, तथा तदपनुद्य भक्ताय यथारुचिसायुज्यादिमुक्तिं दत्वा कृतार्थयतीति तत्त्वम् ॥४७॥

सदा सर्वकाल में विरक्तोचित सदाचार से सम्पन्न अपने को भगवान् श्रीरामजी का पराधीन माननेवाले श्रेष्ठ प्रपन्न शरणागत महापुरुषों ने शरणागत पुरुषों के अनुकूल अर्थात् हितचिन्तक दयामहोदधि सर्वव्यापक भगवान् श्रीरामजी की जो वत्सलता है वह प्रपन्न व्यक्तियों का दोषभोगिता स्वरूप ही है ऐसा कहा है । अर्थात् जिस तरह गवादिक पशु स्वकीय नवजात वत्सों के शरीर में रहनेवाला जो मल है उसको स्वकीय जिह्वा के द्वारा चाट करके वत्स को निर्मल बना देती है । यथावा साधारण भी माता स्वकर्तव्य समझकर स्वसन्तान के शरीरादिगत अस्वच्छता सम्पादक दोषों को हटाकर पुत्रादिक को निर्मल स्वच्छ रखती है । उसी तरह वत्सलता का महासमुद्र भगवान् श्रीरामजी भी भक्त के कायिक वाचिक मानसिक प्राकृतिक सकल दोषों का निराकरण करके भक्तों को यथाभिमत सायुज्यादि मोक्ष को देकर के कृतार्थ कर देते हैं । यही भगवान् श्रीरामजी में दोष भोगित्व है ॥४७॥

दयान्यदुःखस्य निगद्यते बुधैरप्राकृतैस्तैरसहिष्णुता स्मृता ।
कृपामहाब्धेः समुदारकीर्तेर्विष्णोरचिन्त्याखिलवैभवस्य वै ॥४८॥

अप्राकृतैः प्रकृतिजनितशरीरेप्राकृते, अहं ममत्वादिरहितैर्वस्तुतो बुधैर्महा मतिभिः अचिन्त्याखिलवैभवस्य चिन्तयितुमप्याशक्याखिलवैभवो यस्य ताद्दशस्य समुदारकीर्तेः कृपामहाब्धेर्दयासमुद्रस्य विष्णोः सर्वव्यापकस्य जगत्कारण रूपस्य भगवतोरामस्य स्मृता महर्षिभिः प्रशंसिता, भगवति श्रीरामे, याऽन्यदीय दुःखस्य, असहिष्णुता स्वाभाविकी विद्यते सैव दयापदवाच्यं भवति । भगवान्

Scanned by CamScanner ankurnagpal108@gmail.com

श्रीरामो भक्तानां दुःखं न सहते इति यो हि तस्य स्वभावस्तद्रूपैव तस्य दयेति भावः ॥४८॥

अप्राकृतैर्बुधैः अर्थात् प्राकृतिक अहं ममतादिक सांसारिक काम क्रोधादिक अनेक प्रकार विकार समुदाय से रहित भगवान् श्रीरामजी के शरणागति में निष्ठा रखनेवाले विद्वानों ने चिन्ता से भी परे समस्त ऐश्वर्य तथा प्रचुर उदारकीर्तिवाले कृपा का महासागर सर्वव्यापक तथा समस्त जड़चेतनात्मक जगत् का कारण भगवान् श्रीरामचन्द्रजी में जो परदुःखासहिष्णुत्व है। अर्थात् शरण में आगत प्रपन्न भक्तों का जो दुःख है उसका सहन न करना इसी को भगवान् श्रीरामजी की दया है ऐसा कहा है। भगवान् भक्त के दुःख का सहन नहीं करते हैं अर्थात् तादृश दुःख से भक्त को झटिति छुटकारा दिला देते हैं ॥४८॥

स्वीयप्रवृत्तेस्तु निवृत्तिरिष्टो न्यासोऽथ वेद्योपि बुधैः सदैव ।
ऐकान्तिकैस्तत्वविचारदक्षैः परात्मनिष्ठैः परमास्तिकैस्तैः ॥४९॥

भगवद्दयायाः स्वरूपं प्रदर्श्य तदनुन्यासस्वरूपं दर्शयितुमुपक्रमते-'स्वीय प्रवृत्तेस्तु' इत्यादि । अथ परमात्मनिष्ठैः परमात्मपरायणैरत एव परमास्तिकैर्गुरु वेदादिषु निष्ठाशालिभिः वुधैर्विद्वद्भिः ऐकान्तिकतत्त्वविचारदक्षैः केवलश्रीराम तत्त्वचिन्तनचतुरैः स्वकीयप्रवृत्तेर्भरणपोषणादिव्यापारेभ्यो निवृत्तिरेवन्यासो वेदितव्यः । स्वप्रवृत्तेर्निवृत्तिरेवन्यासपदार्थ इतिभावः ॥४९॥

भगवान् श्रीरामजी के दया के स्वरूप को बतला करके तदनन्तर सम्प्रदाय सिद्ध-'**न्यास**' का स्वरूप निरूपण करने के लिए उपक्रम करते हैं-'**स्वीयप्रवृत्तेस्तु**' इत्यादि। विशिष्टाद्वैत प्रतिपादित तत्त्व का विचार करने में अति प्रवीण अत एव परम आस्तिक अर्थात् गुरु तथा वेदान्त वाक्य में श्रद्धाशील एवं एकान्ततः स्वस्वरूप में अवस्थित श्रीवैष्णव विद्वान् लोग भगवत्परायण होते हुए स्वकीय भरणपोषणादि व्यापार प्रवृत्ति की निवृत्ति को ही सम्प्रदायाभिमत न्यास शब्द से कथन करते हैं। अर्थात् स्वकीय प्रवृत्ति का जो निरोध है उसी को न्यास पद प्रतिपाद्य मानते हैं। इस विषय की चर्चा विशेष रूपसे श्रीचिदानन्दाचार्य प्रणीत **न्यासकलानिधि** विवरण में की जायगी ॥४९॥

सर्वे प्रपत्तेरधिकारिणः सदा शक्ता अशक्ता पदयोर्जगत्प्रभोः ।

Scanned by CamScanner ankurnagpal108@gmail.com

अपेक्ष्यते तत्र कुलं बलं च नो नचापिकालो न च शुद्धतापि वै ॥५०॥

भगवत्प्रपत्तेरधिकारिणो ब्राह्मणा एव तदन्येऽपि वेति संशये पुरुषार्थत्वात् सर्वे एवाधिकारिण इति प्रदर्शयति 'सर्वे प्रपत्तेरधिकारिणः सदे' त्यादि शक्ताः बलशालिनोऽशक्ताः शरीरकादिबलरहिताः सर्वे ब्राह्मणादारभ्यस्त्रीशूद्रान्ताः सदासर्वकालेप्रपत्तेरधिकारिणः संभवन्ति । जगत्प्रभोः पदयोः प्रपत्तौ सर्वेऽधिकारिणः । यतो भगवता सर्वाधारसर्वेश्वरश्रीरामेण स्वकीय प्रपत्तौ कुलं बलं वा कालविशेषो वा शुद्धता वा नापेक्ष्यते अर्थात् प्रपत्तौ सर्वेऽधिकारिणो नतु तत्र यागादिवत् कुलबलकालशुद्धतादीनामुपयोग 'न जातिभेदं न कुलं न लिङ्गं न गुणक्रियाः । न देशकालौ नावस्थां योगो ह्ययमपेक्षते' इति भरद्वाज संहितानुसन्धेयाऽत्र इति ॥५०॥

भगवत्प्रपत्ति मोक्ष का कारण है । इस पर जिज्ञासा होती है कि इस प्रपत्ति का अधिकारी कौन है ? इसके उत्तर में आचार्य कहते हैं कि हे सुरसुरानन्द ! भगवान् श्रीरामजी की शरणागति में सबको अधिकार है । चाहे वह बलवान् हो, बल हीन हो, उच्च कुलोद्भव हो अथवा नीच हो । क्योंकि भगवान् श्रीरामजी बहुत कृपालु हैं । वे स्वप्रपत्ति में कुल जात्यादिकों की अपेक्षा नहीं रखते हैं । इसलिए जीव मात्र प्रपत्ति का अधिकारी हैं ॥५०॥

धर्मत्यागोऽपि परमैकान्तिकैरुच्यते वरैः ।

इत्थं हि कर्मणां त्यागः स्वरूपस्याखिलस्य च ॥५१॥

धर्मत्यागेऽपि वैशिष्ट्यं प्रपत्तेरिव दर्शयति-'धर्मत्यागोपी' त्यादि । इत्थं प्रपत्तिप्रकारेणैव वरैः श्रेष्ठपुरुषैर्वैष्णवैः परमैकान्तिकैर्मुमुक्षुभिर्वैष्णवैः कर्मणाम खिलस्य सर्वस्यापि स्वरूपस्य त्यागः अर्थात् कर्तृत्वाद्यभिमानपरित्यागपूर्वक समस्तफलस्य त्यागो धर्मत्याग इत्युच्यते कथ्यते इति तात्पर्यार्थः ॥५१॥

पूर्व प्रतिपादित प्रपत्ति शरणागत के द्वारा वैष्णव श्रेष्ठ श्रीवैष्णवगण कर्मों के स्वरूपतः त्याग को अर्थात् कर्तृत्वाभिमान त्यागपूर्वक सर्वफल के त्याग को ही धर्म त्याग कहते हैं ऐसा शास्त्रीय सिद्धान्त है ॥५१॥

अथोपायान्तराण्येव प्रवदन्ति मनीषिणः ।

Scanned by CamScanner ankurnagpal108@gmail.com

विरोधीति प्रपत्तेस्तु सम्बन्धज्ञानकोविदाः ॥५२॥

अथ कीदृशोधर्मत्याग इतिनिश्चयानन्तरम् 'सम्बन्धज्ञानकोविदाः अर्थात् भगवतोऽनेकप्रकारकसम्बन्धज्ञानस्य यत्स्वरूपं तादृशस्वरूपस्य विद्वांसो ज्ञाता रो मनीषिणो बुद्धिमन्तः श्रीरामपरायणाः श्रीवैष्णवाः, उपायान्तराणि मोक्षप्राप कतया अभिमतानि यानि कर्मयोगज्ञानयोगभक्तियोगाख्यानि लोके प्रसिद्धानि तानि सर्वाण्यपि प्रपत्तेर्भगवतः श्रीरामस्य शरणागतेः प्रतिबन्धकान्येव नतु साधनानीति तानि कर्मयोगादिनि परित्यज्य प्रपत्तिमात्रं मोक्षसाधनतया समाश्र यन्तीति ज्ञेयम् ॥५२॥

अथ अर्थात् धर्मत्याग निश्चय के वाद भगवान् श्रीरामजी के साथ सकल चेतनों का जो नौ प्रकार का शेष शेषित्व प्रभृतिक सम्बन्ध हैं तादृश सम्बन्ध स्वरूप को जाननेवाले जो विद्वान् श्रीवैष्णव प्रपत्तिपरायण व्यक्ति हैं वे लोग मोक्ष के कारणरूप से लोग में प्रसिद्ध कर्मयोग ज्ञानयोग तथा भक्तियोग रूप उपायान्तर को अर्थात् प्रपत्ति भिन्न उपायान्तर को भगवान् श्रीरामजी की प्रपत्ति रूप जो मुख्य मोक्ष का साधन है तादृश साधन का विरोधि मानते हैं। अर्थात् लोक प्रसिद्ध जो मोक्ष के कारण कर्मयोगादिक हैं वे सब प्रस्तुत प्रपत्ति के विरोधी हैं सकामानुष्ठेय होने से ॥५२॥

लोकसंग्रहणार्थन्तु श्रुतिचोदितकर्मणाम् ।
शेषभूतैरनुष्ठानं तत्कैङ्कर्यपरायणैः ॥५३॥

अथ यदि कर्मयोगादिकरणादिकं भगवत्प्रपत्तेः प्रतिबन्धकं तदा प्रपत्ति परायणैर्महद्भिस्तेषां सर्वथा त्याग एव कर्त्तव्यो नत्वेवं दृश्यते इत्याशङ्कां निरसि तुमाह-'लोकसंग्रहणार्थन्तु' इत्यादि । तत्कैङ्कर्यपरायणैः, भगवतः कैङ्कर्यसंलग्नै र्भगवतो रामस्य शेषभूतैर्महद्भिरपि वैष्णवैः लोकसंग्रहणार्थं लोकसंग्रहाय श्रुति चोदितकर्मणां श्रुतिस्मृतिप्रतिपादितनित्यनैमित्तिकादिकर्मणामनुष्ठानं कर्तव्यम् । 'यद्यदाचरतिश्रेष्ठः' इति । 'लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसीत्यादिवचनेन श्रुत्यादिविहितं कर्मसमाचरन्ति वैष्णवविद्वांसो नतु तानि त्यजन्तीति तदाहुर्जगद् गुरवः श्रीरामानन्दाचार्यश्रीरघुवराचार्यमहाभागाः श्रेष्ठो यच्छास्त्रंप्राचीनव्यवहारं

Scanned by CamScanner
ankurnagpal108@gmail.com

वा प्रमाणतयाऽभ्युपगच्छति लोकः प्राकृतो जनोऽपि 'महाजनो येन गतः स पन्थाः' इतिन्यायेन तदेवानुवर्तते तस्माच्छेष्ठेन त्वया लोककल्याणायावश्यमेव वर्णाश्रमोचितकर्मानुष्ठेयम्' इति (गीतार्थचन्द्रिका) ॥५३॥

भगवान् के कैङ्कर्यनिष्ठ अथवा सर्वप्रकार से भगवान् की सेवा में तत्पर तथा भगवान् के शेषभूत अर्थात् भगवान् के लिए यथेच्छ विनियोग योग्य वैष्णवगण लोकसंग्रह करने के लिए श्रुति विहित नित्यनैमित्तिक कर्मादि का अनुष्ठान करते हैं नतु मोक्ष में सहायक है अर्थात् मोक्ष का कारण है यह समझ कर । क्योंकि वे तो अपना सकल भार श्रीरामजी को सौंप कर स्वयं सकामान्य व्यापार से निवृत्त हो गये हैं । जो भगवान् की सेवा से विमुख हैं वे लोग स्वर्गादि प्राप्ति करने के लिए भले ही सकाम यागादिक कर्मानुष्ठान करें ॥५३॥

रामप्रसादहेतुर्हि न्यासोऽयं विनिगद्यते ।

नित्यशूरैः सदाचारैर्हरिपादाब्जमानसैः ॥५४॥

सदाचारैः वेदविहिताचारपालकैर्यद्वा सतां श्रीवैष्णवानामाचारपालकैः हरिपादाब्जमानसैः श्रीरामचरणारविन्दसंलग्नमानसैः, महापुरुषैः, नित्यशूरैः सर्वदा भगवतः सर्वेश्वरश्रीरामस्य समीपनिवासिभिर्हनुमदादिभिर्नित्यसूरिभिः, अयं न्यासो रामप्रसादहेतु भगवतः श्रीरामस्य प्रसन्नतायां कारणरूप इति विनिगद्यते प्रतिपाद्यते ॥५४॥

भगवान् के अति समीप में सर्वदा निवास करते हुए भगवान् श्रीरामजी की सेवा में सर्वदा संलग्न नित्यसूरि श्रीहनुमदादिक तथा सदा सदाचारयुक्त एवं भगवान् श्रीसाकेतनिवासी श्रीरामजी के चरणकमल में मनको सर्वदा संलग्न रखनेवाले महापुरुषगण इस उपर्युक्त न्यास को भगवान् श्रीरामचन्द्रजी की प्रसन्नता का कारण कहते हैं ॥५४॥

कृतप्रपत्तिस्मरणं प्रायश्चित्तमथोच्यते ।

परमाप्तैश्च तन्निष्ठैः कोविदैस्तैर्मुमुक्षुभिः ॥५५॥

न्यासे यद्वक्तव्यं तत्कथयित्वा प्रायश्चित्तविधौ यो विशेषस्तद्वक्तुमाह-'कृत प्रपत्तिस्मरणमित्यादि' अथ-न्यासविषयकविशेषकथनानन्तरम् । तन्निष्ठैर्भगवत्से

Scanned by CamScanner ankurnagpal108@gmail.com

वाश्रद्धालुभिः परमाप्तैः कोविदैर्विद्वद्भिर्मुमुक्षुभिः श्रीवैष्णवैः कृतप्रपत्तिस्मरण मेव प्रायश्चित्तमुच्यते कथ्यते, कृतायाः प्रपत्तेर्यत्स्मरणं तदेव प्रायश्चित्तं न ततो व्यतिरिक्तिं तदिति ॥५५॥

परम आप्त भगवान् की सेवा में परायण भगवान् के चरणकमल में निवेशित चित्तवाले मुमुक्षु-मोक्षाभिलाषी वैष्णवगण कृत भगवान् की प्रपत्ति का जो स्मरण है तादृश स्मरण को ही प्रायश्चित्त कहते हैं एतदतिरिक्त प्रायश्चित्त नहीं है ॥५५॥

उत्कृष्टवर्णैरपि वैष्णवैर्जनैर्निकृष्टवर्णः स तदीयसेवने ।
तथानुसर्त्तव्य इतिष्यते बुधैः शास्त्रैर्विधेये विधिगोचरैः परैः ॥५६॥

विधिगोचरैः-'यजेत स्वर्गकामः' इत्यादिशास्त्रप्रतिपादितयागादिकर्मारा धनतत्परैः 'उत्कृष्टवर्णैः' उच्चजातीयकैः ब्राह्मणादिभिरपि वैष्णवैर्जनैः शास्त्रैर्वि धेये शास्त्रेण विधातुं योग्ये तदीयसेवने तत्सम्बन्धिनां भगवत्सेवकानां ब्राह्मणा दिभिन्नानां क्षत्रियादिशूद्रान्तानाम् सेवने सेवार्थम् स निकृष्टवर्णः ब्राह्मणेतरवैष्ण वोऽनुसर्तव्योऽनुसेवनीयः । तथा पूर्वकथितप्रकारेण नीचजातीयकवैष्णवैः समु च्चजातीयकब्राह्मणवैष्णव इतरजातीयकसाधुना सेवनीय एव । इतरजातीयको वैष्णवसाधुब्राह्मणमनुसरेदितितु स्वभाव एव परं ब्राह्मणोऽपि सति समये भोंज नप्रदानादिनेतरजातीयकं श्रीवैष्णवमनुसरेदिति सम्प्रदायः ॥५६॥

शास्त्र प्रतिपादित यागादिक कर्मों में श्रद्धा रखनेवाले वैष्णव महात्मा और उच्च ब्राह्मणादि जातीयक वैष्णवगण ब्राह्मजाति व्यतिरिक्त क्षत्रिय वैश्यादि जातीयक श्रीवैष्णवों की शास्त्र प्रतिपादित सेवा करने के लिए अनुसरण अर्थात् ब्राह्मण जाती यक श्रीवैष्णव भी क्षत्रियादि जातीयक साधुओं की सेवा करें नतु नीच जातीयक समझ करके भेदभाव रखकर उनका अनादर करे । तथा क्षत्रियादि जातीयक श्रीवै ष्णव भी उच्च जाति के परमैकान्तिक ब्राह्मण श्रीवैष्णवों की सेवा के लिए अनुसरण करे । अर्थात् उच्च जातीयक श्रीवैष्णव इतर जातीयक साधुओं का यथोचित सेवार्थ अनुसरण करे अर्थात् सेवा करें । इतर जातीयक साधु भी उच्च जातीयक साधुओं की सेवा करें । नतु ब्राह्मण श्रीवैष्णव अपने मन में मैं ब्राह्मण हूँ, मैं तदितर की सेवा कैसे करुँगा तथा इतर जातीयक श्रीवैष्णव मैं साधु हूँ, मैं मठाधीश हूँ, इस नवागत की सेवा किस तरह करुँगा इत्यादि वृथाभिमान करके-'जातिपाति पूछे नहिं

Scanned by CamScanner
ankurnagpal108@gmail.com

कोई। हरि को भजे सो हरि का होई' इत्यादि को लक्ष में रखकर साधु का अपमान न करें। परस्पर सन्तों में वृथाभिमान देखकर आचार्यश्री ने कहा है-'उत्कृष्टवर्णे रित्यादि' यह कहना सर्वथा ठीक है। भेदभाव रखने के कारण से ही सम्प्रदाय दूषित सा हो गया है इस पर मनीषीजनों को गहनता से विचार करना चाहिए ॥५६॥

अणुव्याप्तौ च भगवानणुषु त्वणुरुच्यते ।
पराकाष्ठापरैर्विज्ञैर्मतविद्भिर्महात्मभिः ॥५७॥

सम्प्रति भगवतोऽणुषुव्याप्तावणुतरत्वमेववक्तुमाह-'अणुव्याप्तौ च' इत्यादि। पराकाष्ठासुपरैः परमैकान्तिकैर्विज्ञैस्तत्वविद्भिर्मुमुक्षुभिर्मतज्ञातृभिः श्रीवैष्णवाग्रणीभिः, अणुव्याप्तौ परमात्मनोऽणुषु जीवराशिषु व्याप्तौ भगवतोऽणुष्वपि अणुत्वमुच्यते अर्थात् जीवोऽणुः सर्वेभ्योऽणीयानिति तादृशाणुजीवे व्याप्तिः परेशस्येत्याशङ्कायामाह-अणुरुच्यते इति जीवः स्वभावतोऽणुरेव तत्र व्याप्तिं कुर्वन् परमेश्वरश्रीरामो जीवापेक्षयाप्यणुतर एव-'अणोरणीयान् महतो महीयान्' 'एषोऽणुरात्मा चेतसा वेदितव्य' इत्यादिश्रुतेः ॥५७॥

विद्वान् स्वकीय मत को जाननेवाले श्रीवैष्णव महात्माओं ने जीव में भगवत् व्याप्ति को अणु से भी अणुरूप से बताया है ॥५७॥

आत्मारामैस्तथोपायस्वरूपज्ञानिभिश्च तैः ।
मतज्ञैर्विरजापारं कैवल्यमिति मन्यते ॥५८॥

मतज्ञैः श्रीवैष्णवसम्प्रदायज्ञैः उपायस्वरूपज्ञानिभिः मोक्षस्योपायं जानद्भिः आत्मारामैः आत्मनि परमात्मनि श्रीरामे रमन्ते इत्यात्मारामैः भगवन्निष्ठतया परमैकान्तिभिः श्रीवैष्णवैः 'आत्मरतिरात्मक्रीडः' इत्यादिश्रुतेः। मुमुक्षुभिर्महापुरुषैर्विरजायास्तदाख्यमहानद्याः पारमेव कैवल्यं सायुज्य मोक्षाख्यं श्रीसाकेतादिपदवाच्यं दिव्यं धाम मन्यते इति ॥५८॥

सम्प्रदाय के यथार्थ ज्ञानवान् तथा उपाय स्वरूप के वेत्ता आत्माराम परमैकान्तिक श्रीवैष्णव महापुरुष कैवल्य दिव्यधाम श्रीसाकेत को विरजा नामक नदी के उस पार मानते हैं ॥५८॥

जितेन्द्रियश्चात्मरतोवुधोऽसत्सुनिश्चितं नाम हरेरनुत्तमम् ।

Scanned by CamScanner ankurnagpal108@gmail.com

अपारसंसारनिवारणक्षमं समुच्चरेद्वैदिकमाचरन् सदा ॥५९॥

इत्यानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्ययतिराजप्रणीते श्रीवैष्णवमताब्जभास्करे मुक्तिसाधननिरूपणात्मकश्चतुर्थप्रश्नोत्तराख्यश्चतुर्थः परिच्छेदः

जितेन्द्रियः बाह्याभ्यन्तरेन्द्रियेषु कृतजयः आत्मरतः आत्मनि परमात्मनि अनुरागो यस्य तादृश आत्मरतिः 'आत्मरतिरात्मक्रीड' इत्यादिश्रुतेः । बुधः साम्प्रदायिकज्ञानवान् श्रीवैष्णवः सदा सर्वकालमनवरतम् वैदिकं श्रुतिस्मृति प्रतिपादितं वर्णाश्रमोचितं कर्म आचरन् तदनुष्ठानं कुर्वन्नेव 'कुर्वन्नेवेह कर्माणि जिजीवीषेच्छतं समा' इत्यादौ विहितकर्मणः सदानुष्ठेयत्वप्रतिपादनात् । तदाहु राचार्याः-'विद्या सम्पत्तये फलासक्तिकर्तृत्वाभिमानराहित्येन नित्यनैमित्तिककर्मा णि मुमुक्षुणा यावज्जीवमनुष्ठेयान्येव विद्याङ्गकर्मणः त्यागस्य विद्यासिद्धिविरो धित्वात्' (ईशावास्योपनिषदानन्दभाष्यम्-२) 'अपारसंसारनिवारणक्षमम् अ खिलस्मृतिपुराणादिषु सुनिश्चिततया प्रतिपादितमोक्षप्रदं प्रसिद्धञ्च अनुत्तममति शयेनोत्तमम् हरेः भगवतः श्रीरामस्य 'राम' इत्याकारकं नाम समुच्चरेत् काला व्यवधानेन तज्जपं कुर्यात् । संसारपाराय सरलः सर्वसमाराध्यो झटिति फलप्र दश्चेति तदेव श्रीरामनाम सर्वदाभ्यसेत् । पुराणादावजामीलादिप्रकरणे श्रीराम नाम्नो माहात्म्यमवगन्तव्यम् नामविषयकविशेषविवरणं भगवन्नामकौमुदीविव-रणेऽनुसन्धेयम् ॥५९॥

जितेन्द्रिय अर्थात् बाह्यज्ञानकरण तथा आभ्यन्तर मन इन्द्रिय के ऊपर विजय प्राप्त तथा अखिल प्रपञ्च कारण परमात्मा में अनुराग और विश्वास रखनेवाले सम्प्र दायज्ञ विद्वान् वेद प्रतिपादित शुभ कर्मों का आचरण अनुष्ठान करंते हुए अपार संसार के अर्थात् जन्ममरणादि के निवारण करने में सर्वथा समर्थ अतिशय मनोज्ञातिसरल भगवान् श्रीरामजी का 'राम' इत्याकारक नाम का निरन्तर स्मरण करें यही मुक्ति का साधन है ॥५९॥

卐 अथ मुख्यधर्मात्मकश्रीवैष्णवधर्मनिरूपणम् 卐

एवन्तेऽभिहितं वत्स ! प्रकृष्टं मुक्तिसाधनम् ।
उत्तमं सर्वधर्माणां शृणु धर्मं सनातनम् ॥१॥

Scanned by CamScanner
ankurnagpal108@gmail.com

गतप्रकरणेऽनेकरूपेण मोक्षसाधनं यदुपदिष्टं तादृशं सर्वमुपसंहरति 'एवं तेऽभिहितम्' **इत्यादि । हे वत्स सुरसुरानन्द ! एवं गतप्रकरणप्रतिपादितप्रकारेण प्रकृष्टं श्रेष्ठं प्रधानम् मोक्षसाधनं सायुज्यप्रापकमभिहितम् । त्वया यत्पृष्ठं तत्तुभ्य मभिहितम् । अतः परम् सर्वधर्माणां मध्ये यदुत्तमं सर्वतः श्रेष्ठं सनातनं धर्मस्व रूपं कथयामि त्वं तत् सावधानतया शृणु श्रुत्वाचैवावधार्यताम् ॥१॥**

पूर्व प्रकरण में अनेक प्रकार से प्रतिपादित मोक्ष साधनोपदेश का उपसंहार करते हुए कहते हैं-'**एवं तेऽभिहितम्**' इत्यादि । हे वत्स ! सुरसुरानन्द ! मैंने तुमको अनेक प्रकार के मोक्ष साधन उपायों का कथन किया । इसके वाद सब धर्मों में श्रेष्ठ सनातनधर्म का उपदेश देता हूँ । उसको तुम सावधान मन से सुनो और सुनकर उसका आचरण करो ॥१॥

दानं तपस्तीर्थनिषेवणं जपो नचास्त्यहिंसा सदृशं सुपुण्यकम् ।
हिंसामतस्तां परिवर्जयेज्जनः सुधर्मनिष्ठो दृढधर्मवृद्धये ॥२॥

दानं तपस्तीर्थनिषेवणम्, तीर्थसेवनादिकं तथा जपः एतत्सर्वं पुण्यजन कम् परन्तु एतत्सर्वमहिंसापुण्यसदृशपुण्यातिशयं नास्ति, तस्मात् सुधर्मनिष्ठो मुमु क्षुर्वैष्णवो दृढधर्मवृद्धये अहिंसाविरोधिनीं हिंसां प्रयत्नेन परिवर्जयेत् माहिंस्यात् सर्वाणि भूतानि, इतिश्रुतेः ॥२॥

दानतप तीर्थ सेवन तथा जपादिक अहिंसा के समान अतिश्रेष्ठ पुण्य नहीं है। अर्थात् दानादिकों में पुण्य रूपता तो है परन्तु अहिंसा के बरावर यह सब दानादिक नहीं है । अतः सर्वधर्मोत्तमश्रीवैष्णवधर्म में ही निर्वाह करनेवाले प्रयत्नपूर्वक हिंसा का त्याग कर दे ॥२॥

श्रयन्तिधर्मास्तुतया पृथक् स्थितान् सुवक्रगाः सिन्धुमिवापिनिम्नगाः ।
काष्ठस्थवह्नेरिव घातको हरेश्चराचरस्थस्य च जन्तुहिंसकः ॥३॥

तया तादृशजीवहिंसया विहीतान् विशेषेण रहितानेवजनानहिंसकानेव दयादिकाः सर्वेधर्माः श्रयन्ति समाश्रयन्तीत्यर्थः । यथा सुवक्रगाः कुटिला अपि गङ्गायमुनादिकानद्यः साक्षात् परम्परया वा सिन्धुं समुद्रं महाजलराशिमेवाश्र यन्ति तथैव प्रकृतेऽपि च यस्मात् कारणात् जन्तुहिंसकः प्राणिव्यापादको जन्तु

Scanned by CamScanner ankurnagpal108@gmail.com

र्मनुष्यादिः, चराचरे सर्वत्र प्रपञ्चे व्यापकतया प्रपञ्चेऽनुप्रविश्य विद्यमानस्य हरेः सर्वपापनिवर्तकभगवतोरामस्यैव विघातको जन्तुहिंसको जनः । काष्ठस्थवह्नेरिव यथा काष्ठे विद्यमानोऽन्तरवस्थितो वह्निः स्वाश्रयीभूतकाष्ठस्य विनाशको भवन् काष्ठाश्रितसर्वस्यापि चेतनस्याचेतनस्य वा दाहको भवति तथैव काष्ठस्थानापन्न चराचरजगदनुप्रविश्य स्थितस्य परेशश्रीरामस्यैव दुःखकारीजन्तुहिंसको भव तीति तस्मात् जीवहिंसां विहायावस्थितानेव जनान्धर्माः समाश्रयन्तीत्यहिंसापाल नीया तदैव धर्मान्तरस्यापिफलवत्वं भवतीति । तदुक्तम्-

'नाऽहिंसा सदृशं दानं नाऽहिंसा सदृशं तपः ।
नाऽहिंसा सदृशं तीर्थं पुण्यभूषणशोभने ॥
ये च हिंसन्ति वै जन्तून् जलजांस्थलजांस्तथा ।
मज्जन्ति नरके धीरे कल्पकोटिशतैरपि ॥ इति ॥३॥

जिस तरह ऊँच नीच वक्र और सरल सीधा होकर के चलनेवाली बहती हुई नदी समुदाय गङ्गा सिन्धु कावेरी प्रभृतिक सब नदी नद, साक्षात् परम्परया वा अगाध जलराशि समुद्र का ही आश्रय लेते हैं । उसी तरह जितना कोई दया प्रभृतिक धर्म समुदाय हैं वे सबके सब हिंसा रहित अर्थात् अहिंसक व्यक्ति का ही आश्रय लेता है । वही व्यक्ति दया शौचादि धर्मवान् हो सकता है जिसके अन्दर हिंसा नहीं है अर्थात् अहिंसक है । श्लोक घटक 'च' शब्द हेत्वर्थक है । चराचर में अन्तः अनुप्रविष्ट होकर के सर्वत्रावस्थित भगवान् श्रीरामजी का वह हिंसक व्यक्ति घातक है काष्ठस्थ वह्नि की तरह अर्थात् जिस तरह काष्ठ के अन्दर में रहनेवाला वह्नि काष्ठाश्रित पदार्थों का तथा काष्ठ का दाहक होता है उसी तरह हिंसक सर्वव्यापक भगवान् को दुःख देने वाला होता है इसलिए विवेकी व्यक्ति को चाहिए सर्वप्रथम अहिंसा व्रत का ग्रहण करें वेद में कहा है-मा हिंस्यात् सर्वा भूतानि अहिंसत् सर्वभूतेभ्यः' इत्यादि पुराणों में भी कहा है-

'नाऽहिंसा सदृशं दानं नाहिंसा सदृशं तपः ।
नाहिंसा सदृशं तीर्थं पुण्यभूषणशोभने ॥'
यथा वक्रगतानद्यः सिन्धौ चैव विशन्ति हि ।
तथैव धर्माः श्रयन्ति हिंसाहीनेषु साधुषु ॥' इति ।

Scanned by CamScanner
ankurnagpal108@gmail.com

अतः प्रत्येक धर्म अहिंसक व्यक्ति के आश्रय में ही रहता है। इसलिए अहिंसा परमावश्यक है ॥३॥

जलस्थलोत्पन्नशरीरहिंसया विवर्जयेन्मांसमुदारधीः सदा ।
दयापरोऽधोगतिहेतुरूपयाऽचिराय लभ्यं भवभी निवृत्तये ॥४॥

अधोगतिर्नरकादिप्राप्तिकारणरूपया, जलस्थलोत्पन्नशरीरिहिंसया जले समुत्पन्नो मत्स्यनक्रादिशरीरिजीवस्तथास्थले समुत्पन्नोयः शरीरी अजावन्यशू करादिः तदीयहिंसयैव, अचिराय-झटितिलभ्यं यन्मांसम् तत् भवभी निवृत्तयेः संसारभयनिवृत्यर्थम् उदारधीरुदारा विशालाधीः सर्वे जीवाः स्वात्मसदृशा एवेत्येवं बुद्धिर्विद्यये यस्यैतादृशो दयापरो दयाप्रधानो मुमुक्षुर्मांसं शरीरिशरीरजनितं विवर्जयेत् परित्यजेत् ॥४॥

उदार बुद्धिवाले अर्थात्-'शुनिचैव श्वपाके च पण्डिताः समदर्शिनः' इत्यादि वचन प्रमाण से परमात्मा की सर्वत्र व्याप्ति होने से जीवमात्र पूज्य है, एतादृश बुद्धि वाले तथा दयापरायण पुरुष अधोगति नरकादि गति के कारण जलस्थल में जाय मान प्राणियों की हिंसा से ही प्राप्त होने के योग्य मांस को संसार भय निवृत्ति के लिए अर्थात् जन्ममरणादिक दुःख की निवृत्ति के लिये सर्वदा मांस भोजन का परित्याग कर दें अर्थात् मांस भक्षण न करें ॥४॥

नस्त्रियं परिगृह्णीयाद्विरक्तो वैष्णवः क्वचित् ।
मन्वादिस्मृतिशास्त्रेषु तन्निषेधस्यशासनात् ॥५॥

यथा अहिंसाधर्मधर्महेतुत्वाद्धर्मस्तथैवापरिग्रहोपि वैष्णवधर्म इत्यहिंसाया निरूपणं कृत्वा तदनु अपरिग्रहं दर्शयितुमुपक्रमते 'नस्त्रियं परिगृह्णीयाद्विरक्तः' इत्यादि। यद्यपि 'कौपिनं युगलं वासं कन्था शीतनिवारिणी' इत्युक्त्या आवश्यकधनादिव्यतिरिक्तं धनवस्त्रादिकं सर्वपरिग्रहात्मकमेवेति सर्वपरिग्रहस्य निराकरणमावश्यकं तथापि सर्वपरिग्रहेषु स्त्रीपरिग्रहस्य साक्षाद्बन्धजनकतया प्राधान्यमिति प्रथमतः स्त्रीपरिग्रहस्यैवनिषेधं दर्शयति-'नस्त्रियं परिगृह्णीयादित्यादि' विरक्त एषणात्रयरहितः समुपात्तविरक्तश्रीवैष्णवदीक्षः सर्वसंन्यस्तः ततः परं क्वचित् कस्मिंश्चिदपिकाले कस्यामप्यवस्थायाम् स्त्रियं कामिनीं कदापि न

Scanned by CamScanner ankurnagpal108@gmail.com

गृह्णीयात् । विधानतोऽविधानतो वा स्त्रियं नोद्वहेत् । न च-'अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् । अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्' इत्यादि ब्रह्मचर्यानन्तरमुद्वाहविधायकशास्त्रविरोध इतिवाच्यम् । तादृशशास्त्रस्योपकुर्वाणब्रह्मचारिविषयकतया नैष्ठिकब्रह्मचारिश्रीवैष्णवसंन्यासिविरक्ताविषयकत्वे नाविरोधात् । 'कदापियुवतीं भिक्षुर्नस्पृशेद्दारवीमपि' इत्यादिना संन्यासिनां कृते स्त्रीपरिग्रहस्य सर्वथैवनिषेधादिति विभाव्याचार्येण सूत्ररूपेण कथितं 'नस्त्रियं परिगृह्णीयात्' इति ।

विरक्तः प्राप्तश्रीवैष्णवधर्मकदीक्षकथमुद्वाहं न कुर्यात् तदुद्वाहे को दोष इत्याशङ्कायां तत्र दोषं दर्शयितुमाह-'मन्वादिस्मृतिशास्त्रेषु इत्यादि । मनुयाज्ञवल्क्यपराशरादिविविधस्मृतिग्रन्थेषु विरक्तानां कृते कामिन्योद्वाहस्य निराकरण दर्शनात् । तथाहि-

'प्रायश्चित्तं न प्रश्यामि येन शुद्ध्येत् स आत्महा' (अग्निपु. १६।५।२३)

'आरूढोनैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः ।
प्रायश्चित्तं न पश्यामि येन शुद्धेत्स आत्महा' (अत्रिस्मृतिः ८।१६)
विधिना बुद्धिपूर्वेण यः संन्यासि गृही भवेत् ।
स एवारूढपतितः सर्वकर्मबहिस्कृतः ॥
भ्रष्टो यः स्वाश्रमाचारात्पतितः सोऽभिधीयते । (स्मृतिरत्नावलिः)
चाण्डालवत्ते विभ्रष्टाः परिव्राजकतापसाः ।
तेषां जातान्यपत्यानि चाण्डालैः सह वासयेत् ॥
पारिव्राज्यं गृहीत्वा तु यः स्वधर्मं न तिष्ठति ।
श्वपदेनाङ्कयित्वा तं राजा शीघ्रं प्रवासयेत् ॥
वसन्नवसथे भिक्षुर्मैथुनं यदि सेवते ।
तस्यावसथनाशः स्यात्कुलान्यपि हि कृन्तति ॥ (दक्षस्मृतिः ७।४१)
परदारा न गन्तव्याः परधर्मो भयावहः ।
कदाचिदपि नो कुर्याद्विरक्तो हि गृहस्थताम् ।
यतस्तस्याश्च शास्त्रेषु प्रायश्चित्तं न विद्यते ।

२३-२४ इतिश्रीवैष्णवधर्मपीयूषे तथैव प्रबोधरत्नमालायाम्-

Scanned by CamScanner ankurnagpal108@gmail.com

विरक्तो वैष्णवोभूत्वा विवाहं नहि कारयेत् ।
रेतः पातो न कर्तव्यस्तं कृत्वा पतितो भवेत् ॥
भूत्वा महान्तो यदि यो विरक्तो मौर्ख्यात्स्वकं कामयते विवाहम् ।
धर्मच्युतेस्तस्य वहिस्कृतिं संकुर्युविरक्ताः स्तुतवैष्णवा वै ॥
समाजदूषकः साधुर्यः कश्चित्स्यात् सुधीरपि ।
स त्याज्यः सुविरक्तैश्च श्रीवैष्णवैः सनातनैः ॥(२२।२४)

इतिस्त्रीसंग्रहस्य अन्यत्रापि निषेधस्तत्स्वरूपाविष्करणेनकृतः 'अस्थिनिर्मितपेशीयं मांसासृक् पूयपूरिता' 'अस्यां रज्यति यो मूढः पिशाचः कस्ततोधिकः' इत्यादिना सामान्यतस्तत्स्वरूपं दर्शयित्वा-'एता हसन्ति च रुदन्ति च कार्य हेतोर्विश्वासयन्ति च परं न च विश्वसन्ति । एताः प्रविश्य सरलं हृदयं नराणां किं किं न वामनयना हि समाचरन्ति' इत्यादिना विशेषतः कामिन्याः स्वरूपं प्रदर्श्य तन्निषेधः कृतः ॥५॥

जिस तरह सर्वधर्म श्रेष्ठ अहिंसा धर्म का पालन करना विरक्त श्रीवैष्णव का धर्म है अतः अहिंसा धर्म का उपदेश किया । उसी तरह परिग्रहाभाव भी श्रीवैष्णव धर्म है, यह समझकर अपरिग्रह धर्म को बतलाने के लिए प्रथमतः दारपरिग्रह निराकरण के लिए कहते हैं-'**नस्त्रियं परिगृह्णीयादित्यादि ।**' विरक्त श्रीवैष्णव किसी भी देशकाल में किसी भी अवस्था में दारपरिग्रह न करें । क्योंकि मनु याज्ञवल्क्य पराशर प्रभृतिक स्मृतिग्रन्थों में विरक्त दीक्षा संप्राप्त भागवतों के लिए दारपरिग्रह का निषेध किया गया है इसलिये विरक्त दीक्षा से दीक्षित श्रीवैष्णव दारपरिग्रह न करें । यह आनन्दभाष्यकार जगद्गुरु श्रीरामानन्दाचार्यजी यतीन्द्र की आज्ञा है ॥५॥

विवाहे तु कृते सस्यादारूढपतितो ध्रुवम् ।
आरूढपतितस्यार्थे प्रायश्चित्तं न विद्यते ॥६॥

ननु यदि विरक्तो श्रीवैष्णवो विवाहं कुर्यात्तदा को दोषस्तत्राह-'विवाहे तु कृते' इत्यादि । श्रीवैष्णवेन विरक्तेन विवाहे कृते सति, अर्थात् यदि विरक्तो विवाहं कुर्यात्तदा स आरूढपतितो नियमतो भवेत्, प्रथमं मोक्षलाभाय श्रीवैष्णवमार्गमारूढवान्, ततश्च पश्चात्तन्मार्गात्परिभ्रश्य गृहस्थधर्मे पतितः, इति आरूढपतितो नियमतः स्यात् । ननु भवतु, आरूढपतितस्तावताकिम् तत्राहुः-'आरूढ

Scanned by CamScanner ankurnagpal108@gmail.com

पतितस्यार्थे' इत्यादि । योह्यारूढपतितस्तदर्थं शास्त्रे प्रायश्चित्तं न विद्यते, येन सः पुनर्विशुद्धो भवेत्-'निष्कृतिर्नविधीयते' इत्यादिमन्वादिवचनात् । ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासेषु सर्वतः उत्तमोमार्गः संन्यासस्तदधिष्ठाय कारणवशात्ततो निपतितस्य रौरवादिनरकप्राप्तिरेव भवति । नास्ति शास्त्रेकिञ्चित्प्रायश्चित्तं यदा चरणेन स पुनर्विशुद्धो भवेदित्यतो महानयं दोष आरूढपतितत्वमित्यन्यत्र विस्तरः ॥६॥

विरक्त श्रीवैष्णव को विवाह करलेने पर क्या दोष है ? हजारों लोग तो विवाह करते ही हैं । इस आशङ्का के उत्तर में कहते हैं-'**विवाहेतु कृते**' इत्यादि । श्रीवैष्णव मत की भागवती विरक्त दीक्षा लेने के वाद यदि विरक्त व्यक्ति विवाह कर लेता है, तो वह आरूढ पतित हो जाता है । और जो आरूढ पतित हो गया, उसको पुनः शुद्ध करने के लिए, शास्त्र में किसी प्रकार का प्रायश्चित्त का विधान नहीं है । यही महान् दोष आरूढ पतितत्व का होता है अतः विरक्त दीक्षा प्राप्त श्रीवैष्णव विवाह न करें ॥६॥

प्रच्युतो नैष्ठिकाद्धर्मादात्महापि प्रकीर्तितः ।
मठाध्यक्षत्वदीक्षादौ बहिष्कार्यः स यत्नतः ॥७॥

यस्तु विरक्तोनैष्ठिकात् विरक्तधर्मात्प्रच्युतो निपतितः स आत्महा प्रकीर्तित अतो मठाध्यक्षत्वदीक्षादिकपवित्रकार्येषु यत्नतः प्रयत्नेन बहिष्कार्यो बहिष्कर्त्त व्यः । मठादिषु तस्य विनियोगो न कर्तव्यः पतितेन सहवार्तालापादिकरणेऽपि प्रायश्चित्तविधानादिति ज्ञेयम् ॥७॥

जो व्यक्ति नैष्ठिक धर्म से अर्थात् विरक्त श्रीवैष्णव धर्म से गिर गया, वह आत्महा भी कहलाता है । क्योंकि आत्मा का उद्धार करने के लिए विरक्त धर्म का आश्रय लिया था । परन्तु उस पवित्र धर्म से पतित होने पर उसने अपनी आत्मा को नरक में डाल दिया । ऐसा जो व्यक्ति है उसको अतिपवित्र मठाध्यक्षत्व स्थान का आचार्य या महन्त तथा दीक्षादि कार्यों से विल्कुल बाहर कर देना चाहिए ॥७॥

व्यासेन ब्रह्मविद्यातो बहिष्कारोऽस्य सूचितः ।
शिष्टा यज्ञादिकार्येषु वर्जयन्ति तथा विधम् ॥८॥

Scanned by CamScanner ankurnagpal108@gmail.com

अस्यारूढपतितस्य विरक्तस्यापि ब्रह्मविद्यातो व्यासेन वेदाचार्येण बहिष्कारः असमावेशः सूचितः अर्थादारूढपतितस्य ब्रह्मविद्यायामधिकारो नास्ती ति-'शुगस्य तदनादरणा' दित्यादिस्थलेषु बहिष्कारः प्रतिपादितः, तदाहुराचार्याः 'तस्मान्नाधिकारः...ब्रह्मविद्यायाम्' (आनन्दभाष्यम् १।३।३८) इति । तथा शिष्टा यज्ञादिकर्मकर्त्तारो विद्वांसः तथाविधमारूढपतितम्, यज्ञादिकार्येषु यागदानहो मादौ नास्ति तेषामधिकार इति कृत्वा ते परिवर्जयन्ति त्यजन्त्येव नतु तादृशकार्ये समावेशयन्तीति संक्षेपः ॥८॥

वेदाचार्य भगवान् श्रीव्यासजी ने भी आरूढ पतित को ब्रह्मविद्या में अधिकार नहीं है, अर्थात् ब्रह्मविद्या से तादृश व्यक्ति को बहिष्कृत सूचित किया है । और शिष्ट लोगों ने भी यज्ञ दानादि कार्यों से आरूढ पतित को बहिष्कृत कर दिया है । आरूढ पतित को दानादिक में अधिकार नहीं है ऐसा कहा है ॥८॥

विरक्तैर्वैष्णवैस्तस्मादारूढपतितो न हि ।
व्यवहारेषु योक्तव्यस्तत्संसर्गोऽपि पापकृत् ॥९॥

यस्मात् कारणात् आरूढपतितस्य प्रायश्चितं न विद्यते श्रीव्यासैस्तदन्यशिष्टै श्च तत्प्रतिषेधः कृतस्तस्मात् विरक्तश्रीवैष्णवैरारूढपतितो व्यवहारे भोजनसंभा षणादिव्यवहारे कदापि नहि योक्तव्यो यतः पतितस्य साक्षात् संसर्गः परम्परया संसर्गश्च पापकृत् पापायैव भवति तस्मात् पतितेन सह भोजनसंलापादिव्यवहारः परमेश्वरपरायणैः कदापि न विधेय इत्याचार्यानुशासनं सर्वैरभ्युपेयमेवेति संक्षेपः ॥९॥

आरूढपतित के लिए शुद्ध्यर्थ शास्त्र में प्रायश्चित्त का विधान नहीं है । तथा श्रीसम्प्रदायाचार्य श्रीव्यासजी महाराज ने ब्रह्मविद्या में पतित का अधिकार नहीं रखा है । याजक शिष्टगण ने यागादि क्रिया में पतित को अधिकार नहीं दिया है । इसलिए विरक्त श्रीवैष्णव को चाहिए कि आरूढ पतित को भोजन संभाषणादि व्यवहार में शामिल न करें अर्थात् श्रीरामार्चादिक महान् कार्यों में पङ्क्त में बोलचालादि में पतित का संसर्ग न करें । क्योंकि पतित के साथ जो संसर्ग है वह भी पाप का जनक है अर्थात् संसर्गजा देषगुणा भवन्ति उक्ति के अनुसार उसके संसर्ग से पाप लगेगा अतः उसे त्याग दें ॥९॥

Scanned by CamScanner ankurnagpal108@gmail.com

समर्प्यकर्माणि शुभानि वैष्णवो रामाय भक्ष्यं च निवेद्य भक्षयेत् ।
अहर्दिवं वीतभयं समुत्तमं विमुक्तधीः स्वाघनिवृत्तिकामनः ॥१०॥

स्वाघनिवृत्तिकामनः स्वकीयपापापनोदनकामनावान् विमुक्ता धीः यस्य अहर्दिवं रात्रिन्दिवम् कृतानि भगवन्तमेवोद्दिश्य कृतानि यानि कर्माणि तानि सर्वाणि भगते श्रीरामाय समर्प्य वीतभयः विगतसंसारभयो भवति 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् । शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः । संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि इति वचनात् । सर्वविशुद्धभक्ष्यादिकमोदकपायसादिकं भगवति सर्वेश्वरश्रीरामे निवेद्य तदनन्तरं समुत्तमं निरतिशयश्रेष्ठं सात्विकं भगवत् प्रसादं सत्वशुद्ध्यर्थं भक्षयेत् । आहारशुद्धौ सत्वशुद्धिरितिस्मरणात् । स्वकीयान्तःकरणस्य शुद्ध्यर्थं विशुद्धभोजनमावश्यकमन्यथा तदसम्भवात् ॥१०॥

स्वकीय पाप कर्मों की निवृत्तिपूर्वक मोक्ष प्राप्त करने की इच्छावाले जो विरक्त श्रीवैष्णव हैं वे लोग अहोरात्र में कृत क्रियमाण शुभ कर्मों का जगत् कारण भगवान् श्रीरामजी को समर्पित करके भगवान् को शुद्ध भाव से समर्पित भक्ष्यभोज्याद्यन्यतम शुद्ध भोजन का प्रसाद रूप में ग्रहण करें । एतादृश भगवत् प्रसाद का भोजन करके महापुरुष जन्ममरणादिक संसार भय से निवृत्त होकर परमपद को प्राप्त करते हैं ।१०।

卐 अथ अर्चावतारनिरूपणम् 卐

अर्चावतारोऽपि च देशकालप्रकर्षहीनः श्रितसंमतश्च ।
सहिष्णुरप्राकृतदेहयुक्तः पूर्णोऽर्चकाधीनसमात्मकृत्यः ॥११॥

भगवन्तं श्रीरामं नैवेद्यं निवेद्य तदीयं प्रसादं भोक्तव्यमिति कथितं परन्तु कुत्रनैवेद्यादिकं निवेदनीयम् ! ततोऽर्चावतारं दर्शयितुमुपक्रमते 'अर्चावतारोऽपि च देशकाले' त्यादि । देशकालप्रकर्षहीनः देशकालयोः प्रकर्षस्तयाहीनो रहितः अर्थात् यथा परव्यूहविभवान्तर्यामिण इत्येते भगवतो भिन्ना भेदाः कालदेशादि प्रकर्षरहिता यथा साकेते तथा तदन्यत्रापि यथा वा सत्ययुगे तथैव युगान्येऽपि किन्तु परव्यूहादिरूपे न कोऽपिभेदः प्रकर्षापकर्षकृतः तथैव सत्ययुगादिकालसा केतादिदेशेऽर्चावतारस्यप्रकृष्टत्वं तदन्यत्रापकृष्टत्वमिति अधिकमहत्त्वमल्पमहत्त्व

Scanned by CamScanner ankurnagpal108@gmail.com

मिति न किन्तु सर्वदेशे सर्वकाले अर्चावतारस्य समानफलदातृत्वमेवेत्यतो देश कालप्रकर्षहीनोऽर्चावतारो भगवच्छ्रीरामविग्रहमूर्तिविशेष इति । तथा श्रित संमतः स्वाश्रितभक्तस्याभिमतः । सहिष्णुरर्चकभक्तस्य सर्वापराधसहनशील अप्राकृतदेहयुक्तः-लोकोत्तरविलक्षणादिदिव्यदेहकरणादिविशिष्टः, न तदीयक-रणकलेवरादिकं प्रकृत्या सम्पादितमपितु स्वेच्छया धृतशरीरोविलक्षणदेहादिमा नितिभावः । तथा सः पूर्णः सर्वव्यापकः गृहादिसर्वदेशेषु वर्तमानो मूर्तिविशे षोऽर्चावतारः 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमे वावशिष्यते' इतिश्रुतेः सर्वदा पूर्ण एव सन्तिष्ठते । पुनश्च-'अर्चकाधीनस मात्मकृत्यः, अर्चकस्य पूजकस्याधीनं समं सर्वमात्मकार्यं स्नानपूजाभोजनादिकं यस्य तादृशः अर्थात् पूजकः स्नापयति तदैव स्नाति यदा भोजयति तदैव भुनक्ति न तु स्नानादिस्वकीयकार्ये आत्मनिर्भरः किन्तु अर्चकव्यापारपराधीनः एतादृशः प्रस्तरकांचनमणिनिर्मितमूर्तिविशेष एवार्चावतारः । इत्येवमर्चावतोऽतीवसुलभः परव्यूहविभवान्तर्यामिणस्तु न सुलभाः इतिसारः ॥११॥

पूर्व प्रकरण में कहा कि भगवान् श्रीरामजी को प्रशस्त अन्नादिक का समर्पण करके, उनका जो प्रसाद विशुद्ध भोज्य पदार्थ है उसका भोजन भक्त लोग करें

तो इस प्रकार नैवेद्य समर्पण किस तरह किस जगह तथा किसको करें ? इस जिज्ञासा के उत्तर में आचार्यजी कहते हैं-'**अर्चावतारोपि च**' इत्यादि । भगवान् श्रीरामजी का जो अर्चावतार है वह जिस तरह परव्यूह विभवादिक देशकाल का प्रकर्ष हीन है उसी तरह अर्चावतार देशकाल भेद से अल्प अधिक महत्त्वशील नहीं है । अर्थात् श्रीसाकेतादि पवित्र प्रदेश में सत्ययुगादि काल में अर्चावतार का अधिक महत्त्व था ग्रामादिक प्रदेश में कलियुगादि काल में अल्प महत्त्व है ऐसा नहीं किन्तु भगवान् श्रीरामजी सर्वदेश सर्वकाल में समफलप्रद होते हैं यही अर्चावतार की विशेषता है । तथा भक्तों का अभिमत द्विभुज चतुर्भुज बालकादि भेद भिन्न होकर पूजित होते हैं । अर्थात् भक्त अर्चक का समस्त अपराधों का सहन करने का स्वभाववाले हैं । तथा परिपूर्ण सर्वत्र व्यापक हैं । अथवा समस्त सामर्थ्यादि धनधान्यादि परिपूर्ण हैं । तथा अर्चावतार भगवान् का सर्वस्नान भोजनादिक कार्य अर्चक भक्त के अधीन है । एतादृश विभूति को अर्चावतार कहते हैं ॥११॥

Scanned by CamScanner ankurnagpal108@gmail.com

स्वयं व्यक्तश्च दैवश्च सैद्धो मानुष एव च ।
देशादौ हि प्रशस्ते स वर्तमानश्चतुर्विधः ॥१२॥

स अर्चावतारो भगवान् श्रीरामो वक्ष्यमाणभेदात् चतुर्विधश्चतुः प्रकारकः स्वयं व्यक्तो गिरिकन्दरादिषु दैवः देवतायास्थापितः, सैद्धः सिद्धेन केनचित्स्थापितो मनुष्यस्थापितः प्रशस्तदेशादौ साकेतमिथिलादिपुण्यभूमौ इत्येवं स चतुःप्रकारको भवतीति तदाहुर्जगद्गुरवः श्रीचिदानन्दाचार्याः प्रमेयोद्देशभास्करे-

'स्थापितो वैष्णवैर्मन्त्रैश्चतुर्धाऽर्चावतारकः ।
स्वयं व्यक्तश्च दैवश्च सैद्धश्च मानुषः खलु ॥' इति ।

'अर्चावतारः सर्वेषां बान्धवो भक्तवत्सलः ।
अर्चावतारूपेण दर्शनस्पर्शनादिभिः ॥
दीनानुद्धरते योऽसौ श्रीरामः शरणं मम ।

इति च जगद्गुरवः श्रीश्रियानन्दाचार्यचरणाः श्रौतप्रमेयचन्द्रिकायाम् ॥१२॥

वह भगवान् स्वयमेव व्यक्त-प्रादुर्भूत देव सिद्ध मनुष्यादि स्थापित भेद से प्रशस्त श्रीसाकेतादि पवित्र प्रदेश में वर्तमान चार प्रकार से विभक्त होकर के अवस्थित हैं ॥१२॥

आवाहनासनाभ्यां च पाद्याद्याचमनैस्तथा ।
स्नानवस्त्रोपवीतैश्च गन्धपुष्पसुधूपकैः ॥१३॥
दीपनैवेद्यताम्बूलप्रदक्षिणविसर्जनैः ।
षोडशार्चाप्रकारैस्तमेतैरर्चेत्सदा सुधीः ॥१४॥

एवं यथोक्तक्रमेण सभेदमर्चावतारं प्रदर्श्य तत्पूजाप्रकारं दर्शयति द्वाभ्याम् 'आवाहने' त्यादि । आवाहन आसन पाद्य अर्घ्य आचमन स्नानवस्त्र यज्ञोपवितगन्धपुष्पधूपदीपनैवेद्यताम्बूलप्रदक्षिणाविसर्जनादिभिः षोडशोपचारपूजाप्रकारैः पुरुषसूक्तप्रदर्शिततत्तमन्त्रैः सर्वदा प्रतिदिनं सुधीर्मुमुक्षुर्भक्तो भगवन्तं सर्वेश्वरं श्रीरामं पूजयेत् आवाहनादीनां मन्त्राः पुरुषसूक्तप्रतिपादिताः पुराणप्रतिपादिताश्च

Scanned by CamScanner ankurnagpal108@gmail.com

पूजाप्रकरणादेवज्ञातव्याः । तत्र द्विजातिर्यदिपूजको भवेत्तदा वैदिका मन्त्राः प्रयोक्तव्याः तदभावे पौराणिका एवेतिविवेकः ॥१३-१४॥

यथोक्त क्रम से सभेद अर्चावतार का कथन करके तदीय पूजा प्रकार को बतलाने के लिए आचार्यजी कहते हैं '**आवाहनेत्यादि**' भजनानन्दी महापुरुष प्रातः उठ करके शौचादि स्नानान्तप्रात्यहिक कर्मकर लेने के वाद संमार्जित पूजा स्थान में बैठ करके आवाहन आसन पाद्य अर्घ्य आचमन स्नान वस्त्र यज्ञसूत्र गन्ध पुष्प धूप दीप नैवेद्य ताम्बूल प्रदक्षिणा और विसर्जनान्तः षोडशोपचारविधि से समन्त्रक भगवान् श्रीरामजी का पूजन करें । यदि पूजक महापुरुष द्विज हों तब तो पुरुषसूक्त प्रतिपादित मन्त्रों से पूजन करें । द्विजेतर हों तब पुराणोक्त मन्त्र द्वारा पूजन करें । विशेष पूजा प्रकार में देखें ॥१३-१४॥

जगत्पते ! श्रीश ! जगन्निवास ! प्रभो ! जगत्कारण ! रामचन्द्र ! नमो नमः कारुणिकाय तुभ्यं पादाब्जयुग्मे तव भक्तिरस्तु ॥१५॥

प्रदर्शितः पूजाप्रकारस्तदनुसारेण दिव्यश्रीविग्रहप्रतिमादिस्थितं जगत्कारणं परमात्मानं प्रपूज्य तदनन्तरं स्वाभिलषितप्राप्तये भगवन्तं श्रीरामं प्रणमेदिति दर्शयितुमाह-'जगत्पतेश्रीश' इत्यादि । हे जगत्पते जगतोरक्षक ! श्रीश हे लक्ष्मी पते हे जगतां निवास जगदाधार हे प्रभो सर्वसमर्थ हे चराचरात्मजगतः परम कारणभगवन् श्रीरामचन्द्र साकेतनायक ! कारुणिकाय करुणा पारावाराय तुभ्यं नमो नमो नमस्कारो भवतु तथा ते चरणकमले सर्वदा भक्तिर्मे भवतु इति ॥१५॥

हे जगत्पति श्रीसीतानाथ हे जगन्निवास जगत्कारण भगवान् श्रीराम ! दया सागर आपके श्रीचरण में मेरा शतशः नमस्कार हो तथा आपके पदयुग्म में सदा मेरी भक्ति बनी रहे ॥१५॥

मनोमिलिन्दस्तवपादपङ्कजे रमार्चिते संरमतां भवे भवे ।
यशः श्रुतौ ते मम कर्णयुग्मकं त्वद्भक्तसंगोऽस्तु सदा मम प्रभो ॥१६॥

हे रामचन्द्र ! रमार्चिते रमया श्रीसीतारूपयाऽर्चिते प्रपूजिते तव पादपङ्कजे चरणकमले मनोमिलीन्दश्चित्तरूपोभ्रमरः भवे भवे प्रतिजन्मनि संर मतां तथा तव यशः कीर्तेः श्रवणाय सततमनवरतं मम कर्णयुग्मकं युगलं भवतु

Scanned by CamScanner ankurnagpal108@gmail.com

तथा हे प्रभो त्वदीयभक्तैर्मम सर्वदा सङ्गो भवत्विति ॥१६॥

हे भगवन् श्रीरामचन्द्र ! मेरा अन्तःकरण रूप भ्रमर मधुपान कर्त्ता जन्तुविशेष सकल सौभाग्यवती श्रीसीताजी से समादृत आपके पद युगल में सर्वदा रमित होता रहे । तथा मेरे दोनों श्रवणेन्द्रिय आपके यश कीर्ति को सुनने में संलग्न रहे और आपके जो अनन्य भक्त हैं उनके साथ हमारा सत्संग होता रहे । अर्थात् मैं भक्तों के साथ ही वार्तालाप करता रहूँ ॥१६॥

उरः शिरोदृष्टिमनोवचः पदद्वयप्रराजत्करयुग्मजानुभिः ।
अङ्गैः क्षितौ तं प्रणमेदथाष्टभिर्दीर्घं तथैतैः कृतधीश्चदण्डवत् ॥१७॥

अथ यथासाध्यं प्रार्थनाकरणानन्तरं कृतधीर्भगवन्तं श्रीसीतापतिं प्रणाम करणाय कृतनिश्चयोऽनन्यभक्तः क्षितौ पृथिव्यां परिष्कृतभूमौ उरः शिरो वचोङ्घ्रिद्वयं प्रराजत्करयुग्मजानुभिः एतैरनुपदकथिताष्टसंख्याकैः तं भगवन्तं सर्वेश्वरश्रीरामं दीर्घं यथास्यात्तथा प्रणमेत् दण्डवत् प्रणामं कुर्यात् सम्प्रदाय मनुरुध्य सम्प्रदायप्रदर्शितक्रमेण भगवन्तं पूज्यं वा यं कमपिदण्डवत्प्रणाममापा दयेत् नतु गृहस्थवत् प्रणमेदितिभावः ॥१७॥

भगवान् श्रीरामजी की प्रार्थना करने के वाद प्रणाम करने का प्रकार बतलाने के लिए आचार्यजी कहते हैं-'**उरः शिरोदृष्टिमिति**' भगवान् परम कारण परमात्मा श्रीरामजी को प्रणाम करने के लिए निश्चित बुद्धिवाले महापुरुष मन, वचन, दोनों पैर, दोनों जानु घुटना छाती शिर मस्तक नेत्रयुग तथा फैलाया हुआ दोनों बाँह हाथ इन आठों प्रकार के अङ्गों से पृथिवी में दण्ड की तरह लेटकर गिरकर भगवान् परमपुरुष श्रीरामजी को भक्त लोग प्रणाम करें ॥१७॥

बाहू च पादौ च प्रसार्य साञ्जलिः स्तवैः स्तुवन् यश्च नमेद्रघूत्तमम् ।
शतैः क्रतूनां तु सुदुर्लभां गतिं स चाप्नुयाद्रामपरायणो जनः ॥१८॥

इत्यानन्दभाष्यकार जगद्गुरुश्रीरामानन्दाचार्ययतिराजप्रणीते श्रीवैष्णवमताब्जभास्करे
मुख्यधर्मात्मकश्रीवैष्णवधर्मनिरूपणात्मकः
ψ पञ्चमप्रश्नोत्तराख्यः पञ्चमः परिच्छेदः ॥५॥ ψ

अथ दण्डवत् प्रणतिनिवेदनानन्तरं श्रीरामपरायणोऽनन्यभक्तोजनः साञ्जलिर्वद्धाञ्जलिः सन् स्तवैः श्रीरामप्रशंसापरकचतुर्वेदस्थितमन्त्रसमूहैः स्वपूर्वा

Scanned by CamScanner ankurnagpal108@gmail.com

चार्यसम्पादितस्तोत्रमहिम्नादिवचनैर्भगवन्तं श्रीरामं स्तुवन् स्तुतिविषयतामापाद यन्, बाहू च पादौ च प्रसार्य्य रघूत्तमम् भगवन्तं श्रीसीतानाथं नमेत् नमस्कारं कुर्यात्। एवं कृते सति क्रतूनामश्वमेधादिनां शतैरनेकप्रकारकैरपि सुदुर्लभा या गतिस्तादृशीं मोक्षगतिमाप्नुयात् । यथोक्तनमनशीलो हि मोक्षमवाप्नुयादिति भावः ॥१८॥

卐 इति प्रभाटीकायां पञ्चमपरिच्छेदः 卐

भगवान् श्रीरामजी के अनन्य भक्त अञ्जलि बन्धनपूर्वक वेद एवं पूर्वाचार्यकृत विलक्षण स्तोत्र समुदाय से भगवान् श्रीरामजी का स्तवन करते हाथ पैर को फैला करके दण्डवत् प्रणाम करें । ऐसा करने से हजारों यज्ञ करने से जो फल नहीं प्राप्त होता है तादृश फल को अर्थात् साकेत प्राप्तिरूप फल को प्रणाम कर्ता प्राप्त करता है ॥१८॥

❋ अथ श्रीवैष्णवभेदनिरूपणम् ❋

अथोच्यते वैष्णवभेद ईप्सितो ज्ञातुं च ते विष्णुपरायणैर्जनैः ।
सुवेदनीयो बहुधा महामते ! सुनिश्चितो विज्ञवरैर्महर्षिभिः ॥१॥

हे महामते ! महतो विशालामतिर्विद्यते यस्य तत्संबुद्धौ सुरसुरानन्द ! अथ अर्चावतारतत्पूजनप्रकारादिकथनानन्तरं विष्णुपरायणैः श्रीरामभक्तैर्जनैः पुरुषैर्ज्ञातुमभिलषितोऽतएव ते तव सम्यग् वेदितुं योग्यो वैष्णवभेदो बहुधा विज्ञवर महर्षिभिः सुनिश्चितो मयोच्यते तत् त्वं मत्तो विजानीहीति ॥१॥

अर्चावतार तथा तदीय पूजन और प्रणामादि प्रकार को बतलाने के बाद श्रीवैष्णव के भेद को बतलाने के लिए आचार्यजी कहते हैं '**अथोच्यते**' इत्यादि ।

हे महामते सुरसुरानन्द ! अर्चावतार तत्पूजनादि प्रकार का कथन के वाद श्री रामभक्तजनों को अवश्य जानने के योग्य, सबका अवश्य ज्ञातव्य विद्वान् महर्षियों से सुनिश्चित किया हुआ श्रीवैष्णवों का भेद मैं तुमको कहता हूँ। तुम उसको बराबर समझो ॥१॥

प्राप्तुं परां सिद्धिमकिञ्चनो जनो द्विजातिरिच्छञ्छरणं हरिं व्रजेत् ।
परं दयालुं स्वगुणानपेक्षितक्रियाकलापादिकजातिबन्धनम् ॥२॥

Scanned by CamScanner
ankurnagpal108@gmail.com

अकिञ्चनः एषणात्रयरहिततया दरिद्रो भगवद्भक्तोजनोद्विजातिर्ब्राह्मण प्रभृतिपरामुत्कृष्टां मोक्षात्मिकां सिद्धिमिच्छन् समिहमानः स्वगुणानपेक्षितक्रिया कलापादिकजातिभेदम् स्वगुणैर्वात्सल्यादिभिर्नापेक्षितः शरणागतव्यक्तिविषये क्रियाकलापादिकोजातिभेदश्च येन तादृशं हरिं शरणागतवत्सलं सर्वपापहारकं सर्वेश्वरश्रीरामं शरणं व्रजेत् अर्थात् बाह्योपायरहिततयासर्वथा सहायरहितोभक्तः मोक्षाय श्रीराममेवाश्रयेत् स च भक्तस्य जात्यादिभेदमनपेक्ष्यैवतमुद्धारयतीति तस्य स्वभावः, स्त्रियोवैश्यास्तथाशूद्रास्तेऽपि यान्ति परांगति, मित्युक्तेः' अन्य त्रापि कथितम्-'.प्रासुमिच्छन् परांसिद्धिं जनस्सर्वोप्यकिञ्चनः । श्रद्धयापरयायुक्तो रामं शरणमाश्रेयेत् ॥ न जातिभेदं न कुलं न लिङ्गं न गुणक्रियाः । न देशकालौ नावस्थां योगोह्ययमपेक्षते ॥' इत्यादिना लौकिकसाधननिराकरणादिति ज्ञेयम् ॥२॥

भगवान् श्रीरामजी से अतिरिक्त भगवान् श्रीरामजी के प्राप्ति का कारण लौकिक उपाय से रहित द्विजाति भक्तजन परम मोक्ष की प्राप्ति की इच्छा से स्वकीय वात्सल्यादि गुणों से ब्राह्मणत्वादि जाति तथा विद्यादिक गुणों की अपेक्षा नहीं रखनेवाले परमदयालु भगवान् श्रीरामजी के शरण में जावें । अर्थात् भगवत्शरणागति का स्वीकार करें ॥२॥

जीवो द्विधाऽमन्यत बद्धमुक्तभेदेन पूर्वैस्तु महर्षिवर्यैः ।
बद्धोऽपि तत्र द्विविधो मुमुक्षु बुभुक्षुभेदाद् गदितो मतज्ञैः ॥३॥

महर्षिवर्यैः प्राचीनमहापुरुषैर्बद्धमुक्तभेदेन जीवोद्विविधोद्विप्रकारकोऽमन्य त अर्थात् बद्धमुक्तभेदेनजीवराशिर्द्विधा विभक्तो भवति तत्रापि मतं विशिष्टाद्वैतम तविज्ञैः बद्धजीवोमुमुक्षुबुभुक्षुभेदात्पुनर्द्विविध इति कथ्यते ॥३॥

प्राचीन श्रीपराशरादि महर्षिगण कहते हैं कि बद्ध तथा मुक्त के भेद से जीव गण दो प्रकार में विभक्त होते हैं । तथा जो श्रीसम्प्रदाय को जाननेवाले हैं वे लोग कहते हैं कि बद्धजीव भी मोक्षाभिलाषी तथा भोगाभिलाषी भेद से पुनः दो प्रकार के होते हैं ॥३॥

अनादिकर्मोत्करजातनानादेहाभिमानी सुमतोऽथ बद्धः ।

Scanned by CamScanner ankurnagpal108@gmail.com

स चाच्युताहेतुकृपाबलेनाविद्याक्रियावासरुचिप्रवृत्तेः ॥४॥
विमोक्तुमिच्छुस्तु मुमुक्षुरुक्तसम्बन्धतः प्राज्ञसुसंमतोऽयम् ।
तथैव सांसारिकभोगमिच्छुर्बुभुक्षुरन्यः कथितो बुधेन्द्रैः ॥५॥

बद्धमुक्तजीवभेदकथनानन्तरं संप्रति तयोर्लक्षणं दर्शयति द्वाभ्याम्, अथ भेदकथनान्तरं तयोर्लक्षणम् बुधेन्द्रैः विद्वद्भिः अनादिकालिकं सञ्चितं यदनेक प्रकारकं शुभाशुभकर्म तादृशकर्मबलेन प्राप्तजरायुजाण्डजस्वेदजस्थावरादिवि विधप्रकारकशरीरेषु, कृशोहं मम शरीरमित्येवं देहाभिमानीजीवोबद्ध इतिसुमतो महर्षिभिः तथा अच्युताहेतुकटाक्षतः अच्युतस्य भगवतोरामस्याकारणकृपाकटा क्षेणाप्रतिमकृपयाः अविद्याक्रियावासरुचिप्रवृत्तेः सकाशाद्विमोक्तुमिच्छुरयं जीवः प्राज्ञसुसम्मतो मुमुक्षुरितिकथितः । यश्चजीवः तथा सांसारिकभोगमेवेच्छ ति स विद्वद्भिर्बुभुक्षुरितिकथ्यते । अर्थात् यः संसारं त्यक्तुमिच्छति स मुमुक्षुर्यश्च संसारत्यागं नेच्छति किन्तु सांसारिकभोगानेवाभिवाञ्छति तमेवाधिकं मन्यते स बुभुक्षुरिति तयोरनुगतं लक्षणम् । विशेषविचारस्तु स्थलान्तरे द्रष्टव्य इति दिक् ॥४।५॥

अब बद्ध तथा मुक्त जीव का लक्षण अनुक्रम से दो श्लोकों से बतलाते हैं। अनादि कालिक सञ्चित जो शुभाशुभ कर्म समुदाय उसके बल से जायमान अण्डज जरायुग उष्मज तथा स्थावरादि भेदभिन्न अनेक प्रकारक शरीर के अभिमानी जीव राशि को विद्वान् लोगों ने बद्ध जीव कहा है। ये बद्ध जीव यदि भगवान् श्रीरामजी के अहेतुक स्वाभाविक कृपा से अविद्या जनित संसार प्रापक कर्मसमुदाय तथा तदनु गुणवासना में आसक्तिपूर्वक तत्परता के सम्बन्ध से छुटकारा पाने की इच्छा करते हैं तो तादृश जीव को मुमुक्षु कहा गया है। और उसी तरह अविद्या को बढाने वाला जो सकाम कर्म तथा तदनुकूल वासना में आसक्तिपूर्वक प्रवृत्ति तत्परता के सम्बन्ध से सांसारिक भोग की ही इच्छा करनेवाले जीवराशि हैं उन्हें पण्डितलोक बुभुक्षु कहते हैं। यह मुमुक्षु बुभुक्षु का सामान्य लक्षण है ॥४-५॥

मुमुक्षवोऽपि द्विविधा महर्षिभिः प्रोक्ता अकामाः स्मृतिभक्तिशालिनः ।
वेदोक्तवर्णाश्रमकर्मकारिणस्तूपासकादिप्रतिभेदभेदिताः ॥६॥

Scanned by CamScanner ankurnagpal108@gmail.com

यश्च मुमुक्षुः सोपि द्विप्रकारक इति दर्शयितुमाह-'मुमुक्षवोपि' इत्यादि । महर्षिभिः मुमुक्षवोऽपि द्विप्रकारका भवन्ति इति प्रोक्ता ज्ञानाद्यसाधनाश्चेतनान्त रसाधनाश्च । तत्र प्रथमस्य लक्षणमाह अकामाः ज्ञानयोगकर्मयोगभक्तियोगानां परमात्मप्राप्तिसाधनतया ग्रहणे कामनारहिताः । तथा ये स्मृतिभक्तिशालिनः । तैलधारेवाविच्छिन्नस्मरणधारात्मकभक्तिविषये निष्ठाशालिनः । तथा वेदोक्तवर्णा श्रमक्रियासम्पादकाः तस्य च 'एवं स्ववर्णाश्रमोचितनित्यनैमित्तिककर्माङ्गकम् (ईशावास्योपनिषदानन्दभाष्यम् १५) यो यथावद् गुरूपदेशलब्धविद्यः विद्यां ब्रह्मोपासनात्मिकाम् अविद्याञ्च ब्रह्मोपासनाङ्गभूतां वर्णाश्रमोचितनित्यनैमित्तिक कर्मरूपां सह (ई.आ.भा.११) 'सा च भक्तिः परमप्रेयो भगवदितरवैतृष्ण्यपूर्वक परमपुरुषानुरागरूपो ज्ञानविशेष एव । तदुद्भवश्च संसारस्यानित्यतामाकलय्या चार्योपसत्तिपुरसरवर्णाश्रमाचारसेवनजनितपुण्यक्षालितकषायस्य विवेकवै-राग्याभ्यासादिभिरेवेति सर्वमवदातम् (ब्रह्मसूत्रानन्दभाष्यम् १।१।१) 'अतो विद्योत्पत्यर्थमहरहरय्यग्निहोत्रादिकर्मानुष्ठेयमन्यथा वर्णाश्रमधर्मलोपे कल्मषमान सस्य विद्योत्पत्तिरेव नस्यादतो विद्यार्थत्वेन तदनुष्ठानमावश्यकम् (ब्रह्मसूत्रानन्द भाष्य ४,१,१६) यज्ञोदानं तपश्चैव वर्णाश्रमोचितानि यज्ञादीनि कर्माणि (गीता नन्दभाष्य १८-५) 'ब्रह्मविद्योपचापकस्य वर्णाश्रमनियतस्य नित्यकर्मणः' (गीतानन्द १८।७) 'नियतं वर्णाश्रमाचारतया विहितं सङ्गरहितं (गीतानन्द भाष्य १८।२३) 'स्वे स्वे कर्मणि स्वकीयवर्णाश्रमोचिताचारैरभिरतोमदाज्ञारूप शास्त्रं बहुमानयन् प्रवृत्तोनरः संसिद्धिं परमगतिं लभते स्वकर्मनिरतः स्वकीय वर्णाश्रमोचिताचारचतुरः' (गीतानन्दभाष्य १८।४५) 'स्वकर्मणा स्ववर्णाश्र मोचितधर्मेणाभ्यर्च्य' (गीतानन्दभाष्यम् १८।४६) वर्णाश्रमधर्मतयावश्यानुष्ठेयं कर्मयोगंतत्साध्यं ज्ञानयोगं ततोप्यन्तरंगभूतं कर्मज्ञानाभ्याम् साध्यं भक्तियोगम्' (गीतानन्दभाष्यम् १८।६३) 'यदा हि मुक्तिसाधनस्य वेदविहितस्य वर्णाश्रमो चितारम्भलक्षणस्य' (गीतानन्दभाष्यम् ४,७) इत्यादिरूपेण वर्णाश्रमकर्मका रिणः श्रीरामसायुज्यपरकाजीवा इत्याहुराचार्याः । अर्थात् भगवतः परमात्मन आज्ञया लोकसंग्रहाय वा वेदादिकथितयोगादिकर्मकर्तारो ज्ञानाद्यसाधनाः कथि ता । तेऽपि उपासकादिप्रतिभेदभेदिता अत एव उपासकाः शुद्धाश्चेति द्विविधा

Scanned by CamScanner
ankurnagpati08@gmail.com

भवन्ति ॥६॥

मुमुक्षु भी दो प्रकार के होते हैं ऐसा प्राचीन ऋषियों ने कहा है। एक तो ज्ञानाद्यसाधन तथा द्वितीय वह है जो चेतनान्तर साधन। इनमें ज्ञानाद्यसाधन का लक्षण यह है कि जो भगवत् श्रीराम प्राप्ति का साधन मानकर ज्ञानयोग कर्मयोग भक्तियोग का ग्रहण करने में कामना रहित होकर भगवान् श्रीरामजी की आज्ञा से अथवा लोक संग्रह के लिए वेदस्मृति प्रतिपादित वर्णाश्रम कर्म का सम्पादन करते हुए तैलधारा की तरह अविच्छिन्न स्मृति प्रवाहरूप भक्ति में निष्ठावाले को ज्ञानाद्य साधन कहते हैं। यह भी दो प्रकार का होता है। उपासक और शुद्ध भक्त इन सबका लक्षण तथा उदाहरण आगे बतलाया जायगा ॥६॥

स्वकर्मविज्ञानसभक्तिसाधनं तथोररीकृत्य सुविज्ञ ! कञ्चन ।
संप्राप्य सम्बन्धविशेषमुत्तमं सदा भवन्त्येव च मोक्षनिश्चयाः ॥७॥

अथाकामान् मुमुक्षुन् लक्षयित्वा ततश्चेतनान्तरसाधनान् मुमुक्षुनुपलक्षयितुमुपक्रमते स्वकर्मविज्ञानेत्यादि। **हे सुविज्ञ सुरसुरानन्द ! स्वकर्मविज्ञानसुभक्तिसाधनम् तत्र स्वकर्मवर्णाश्रमविहितं कर्मविज्ञानं ज्ञानयोगमुपासनं च भक्तिसहितं परमात्मप्राप्तेः प्रधानं साधनमुररीकृत्य गुरुशास्त्रादिद्वारा अङ्गीकृत्य तथा उत्तमम् नवप्रकारकसम्बन्धेषु श्रेष्ठं कञ्चनं कमपि सम्बन्धविशेषं संप्राप्य सदा सर्वदैव मोक्षनिश्चया भवन्ति अर्थात् सायुज्यरूपसंसारनिवृत्तिलक्षणो मोक्षो मेऽवश्यमेवस्यादेवेति निश्चयवन्तोभवन्त्येव। एतादृशाश्चेतनान्तरसाधना मुमुक्षव इति ॥७॥**

अकाम मुमुक्षु का लक्षण बतला करके चेतनान्तर साधन मुमुक्षु का लक्षण को बतलाते हैं-'**स्वकर्म विज्ञान सभक्तीत्यादि**' हे सुविज्ञ ! सुरसुरानन्द ! जो चेतनान्तर साधन मुमुक्षुलोग हैं वे सब ज्ञानयोग तथा भक्तियोग को ही भगवान् श्रीरामजी के प्राप्ति में प्रधान-मुख्य साधन कारण मान करके तथा नौ प्रकार का जो सम्बन्ध हैं-उनमें अन्यतम सम्बन्ध को अर्थात् जिस किसी अभिमत सम्बन्ध को गुरुशास्त्र द्वारा प्राप्त करके अपने को सर्वदा सायुज्य अर्थात् संसार निवृत्तिपूर्वक नित्य निरतिशय सुख प्राप्ति रूप मोक्ष का अधिकारी मानते हैं। अर्थात् हमको सायुज्य लक्षण मोक्ष अवश्यमेव प्राप्त होगा ऐसा निश्चयवाले होते हैं ॥७॥

Scanned by CamScanner ankurnagpal108@gmail.com

विहाय चान्यत्परमं दयानिधिं प्राप्यं समर्थं निरपायमीश्वरम् ।
उपायमेतेऽध्यवसीय सुस्थिता ज्ञेयाः प्रपन्नाः सततं हरिप्रियाः ॥८॥

ये पुरुषा अन्यत् कर्मयोगज्ञानयोगभक्तियोगलक्षणमव्यवहितश्लोकोक्त मुपायान्तरं विहाय परित्यज्य प्राप्यं मोक्षसमये प्राप्तुं योग्यं समर्थं सर्वसामर्थ्य-युक्तम् स्वाभाविकीज्ञानबलक्रियाचेति वचनात्ते परमं सर्वापेक्षया श्रेष्ठतमं दया निधिं स्वभावत एव परदुःखविभञ्जकमीश्वरं सर्वैश्वर्यसम्पन्नं सर्वनियन्तारं भग वन्तं श्रीरामचन्द्रम् निरपायं स्वरूपतो गुणतश्च विनाशरहितं नित्यमित्यर्थः । उपा यं संसारमहोदधेरुत्तरणसाधनमित्यध्यवसीय अर्थात् सुनिश्चित्य सुस्थिताः सुखे नोपविष्टाः सन्ति ते एतादृशा अधिकारिणो हरिप्रियाः हरिः श्रीरामः प्रियं येषां ते यथा भूताः महात्मानः प्रपन्ना मुमुक्षुव इति ज्ञातव्यः ॥८॥

हे सुरसुरानन्द ! जो व्यक्ति कर्म ज्ञान और भक्ति योग को छोडकर सर्वप्राप्य सर्वशक्तिमान् सर्वेश्वर नाश रहित परमकारुणिक ईश्वर श्रीरामजी उपाय अर्थात् संसार से निकलने का कारण समझकर शान्तचित्त होकर के बैठे हैं उनको भगवत् प्रिय प्रपन्न महात्मा समझो ॥८॥

पुरुषकारैकनिष्ठास्तु हरिस्वातन्त्र्यमैक्ष्य च ।
कृपाप्रचुरमाचार्यं मत्त्वोपायमवस्थिताः ॥९॥

ये खलु पुरुषकारैकनिष्ठा अर्थात् पुरुषकारे एव निष्ठा येषां विद्यते ते तथा विधा भक्ता हरिस्वातन्त्र्यम् हरेर्भगवतो श्रीरामस्य सर्वथा स्वातन्त्र्यम् ऐक्ष्य आलो च्य तदालोचनं कृत्वा क्षत्रबन्धुप्रभृतिवत् कृपाप्रचुरम् कृपाबहुलमाचार्यम् एव संसारोत्तरणोपायं मत्वा विज्ञाय अवस्थिता अर्थात् मदीयं पारलौकिककर्म साध्यं भगवत्प्राप्तिरूपफलमपि गुरुकृपयैव भविष्यतीति समवधार्य गुरावेवनिष्ठा वन्तोभूत्वा चिन्तारहितास्तिष्ठन्तीति ज्ञातव्यम् ॥९॥

पुरुषकार अर्थात् पुरुष प्रयत्न में विश्वास रखनेवाले व्यक्ति भगवान् की स्व तन्त्रता का अनुभव करके परमकृपालु आचार्य को परम्परया मोक्ष का उपाय मान करके निश्चित हो जाते हैं । अर्थात् गुरु प्रदर्शित मार्ग का ही अवलम्बन करते हैं ॥९॥

द्विविधास्ते निजाचार्यकृपामात्रप्रपन्नकाः ।

Scanned by CamScanner
ankurnagpal108@gmail.com

तथा सेवातिरेकप्रपन्नाश्चेति सदा सताम् ॥१०॥

ते पुरुषकारैकनिष्ठाश्च सदासर्वकाले स्वकीयाचार्यकृपामात्रप्रपन्नाः तथा सतां महात्मनाम् सेवातिरेकप्रपन्नाश्चेतिभेदात् द्विप्रकारका भवन्तीति सतां व्यासादीनां महापुरुषाणामभिमतम् । अर्थात् पुरुषप्रकारविशिष्टाद्विविधाः, आचार्यकृपामात्रप्रपन्नाः तथा महात्मनां सेवातिरेकप्रपन्नाश्चेत्येवं क्रमेण द्विप्रकारका इति ज्ञेयम् ॥१०॥

जो केवल पुरुषाकार मात्र में विश्वास रखनेवाले हैं वे भी दो प्रकार के हैं एक तो आचार्य कृपा मात्र प्रपन्न और द्वितीय सत्पुरुष सेवातिरेक प्रपन्न इस तरह ये दोनों प्रकार का भेद प्राचीनाचार्य परम्परावालों का अभिमत है ॥१०॥

प्रपन्नश्चापि दृप्तः स तथा चार्त इति द्विधा ।
शरीरस्थितिपर्यन्तमाद्योऽत्रैव यथोचितम् ॥११॥
प्राप्तदुःखादिभुञ्जानः शरीरान्तेऽवसीय च ।
महाबोधोऽतिविश्वासो मोक्षसिद्धिमवस्थितः ॥१२॥

यश्च प्रपन्नोभक्तः सोऽपि दृप्तस्तथा आर्तभेदात् द्विप्रकारक इति ज्ञातव्यः । अत्र दृप्तार्तयोः प्रपन्नयोर्मध्ये आद्यः प्रथमो दृप्तनामकः शरीरस्थितिपर्यन्तम् यावद् देहधारणं करोति तावत्कालम् यथोचितं स्वकृतकर्मबलेन प्राप्तदुःखादिकफलम् भुञ्जानस्तस्य भोगंकुर्वन् महाबोधः परमात्मज्ञानवानेव शरीरान्ते शरीरनाशे मोक्षसिद्धिमवसीय विनिश्चित्य महाबोधः अतिशयितज्ञानवान् अतिविश्वासः अतिशयितविश्वासवान् भवन्नेवावस्थितो भवतीतिभावः ॥११-१२॥

जो प्रपन्न भक्त हैं वे भी दो प्रकार के हैं । एक तो दृप्त और द्वितीय आर्त । इन दोनों प्रपन्नों के मध्य में जो दृप्त है वह परमज्ञानवान् जहाँ तक शरीरधारण करता है, तावत्कालपर्यन्त भाग्योपनत सुखदुःखादि फल का भोग करते हुए शरीर का विनाश हो जाने के वाद सायुज्य मोक्ष की सिद्धि में निश्चयपूर्वक अतिविश्वास करते हुए अवस्थित रहता है ॥११-१२॥

अथान्त्योऽसहमानस्तत्क्षणमेव तु संसृतिम् ।

Scanned by CamScanner ankurnagpal108@gmail.com

तथैव भगवत् प्राप्तौ सत्वरस्वान्त उच्यते ॥१३॥

दृप्तप्रपन्नस्य स्वरूपमभिधाय आर्तप्रपन्नस्वरूपं दर्शयितुमुपक्रमते 'अथा न्त्योऽसहमान' इत्यादि । अथ दृप्तप्रपन्नस्य वर्णनानन्तरम् अर्थात् प्रपन्नभक्तस्य द्वैविध्यकथनानन्तरम् संसृतिं सांसारिकदुःखादिकमसहमानः सोढुमसमर्थः तत्क्ष णमेव भगवतो रामस्य प्राप्तये-'सत्वरस्वान्तः' त्वरया सहितं मनोयस्य स सत्व रस्वान्तो भक्तोऽन्त्यः प्रपन्नः आर्तप्रपन्न इत्युच्यते कथ्यते पूर्वजैः । अर्थात् सांसारि कदुःखमहसमानो भगवत्प्राप्तौ सत्वरश्च प्रपन्न आर्तः द्वितीयप्रकारकः प्रपन्न, अर्थादार्तप्रपन्न इतिकथितो भवतीतिभावः ॥१३॥

दृप्त प्रपन्न का स्वरूप निरूपण करके आर्त प्रपन्न का लक्षण बतलाते हैं **'अथा न्योऽसहमानः'** इत्यादि । अथ दृप्त स्वरूप निर्वचन के वाद, जो व्यक्ति सांसारिक दुःखादि बन्धन क्षणभर भी सहन करने में असमर्थ है । तथा भगवान् की प्राप्ति में अत्यन्त शीघ्रता करनेवाले भक्त हैं । एतादृश व्यक्ति को महापुरुषों ने आर्त प्रपन्न कहा है ॥१३॥

श्रवणादिमात्रनिष्ठाः शुद्धभक्ताः प्रकीर्तिताः ।
अन्तर्भाव्यास्तत्र तत्र तथाऽनुक्ता मुमुक्षवः ॥१४॥

ये भक्ता भगवतोयशः श्रवणादिमात्रे निष्ठावन्तस्तेशुद्धभक्ताः प्रकीर्तिताः अर्थात् ये भगवतो रामस्य कीर्तिनां श्रवणादिमात्रनिष्ठाः 'श्रवणंकीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्' इत्येतेष्वेव भक्ति विशेषेष्वन्यतमप्रकारे एव निष्ठाशालिनस्ते शुद्धा भक्ताः कथितामहर्षिभिः । ये च मुमुक्षवो मुमुक्षुभेदा अत्रनोक्ताः किन्तु स्थलान्तरे प्रदर्शितास्ते तत्र तत्रान्तर्भाव्या स्तेषामप्यन्तर्भाव एष्वन्यतम एव कर्तव्य इति सारः ॥१४॥

जो व्यक्ति परब्रह्म श्रीरामजी के सुयश का सर्वदा श्रवण, स्मरण, कीर्तन, पाद सेवन, अर्चन, वन्दन, दास्य और आत्मनिवेदनादि अन्यतम भक्ति में ही निष्ठावान् अर्थात् श्रद्धाशील हैं उनको प्राचीन महर्षियों ने शुद्ध भक्त कहा है । इन पूर्वोक्त मुमुक्षुओं के लक्षणों में ग्रन्थान्तर में कथित मुमुक्षुओं के जिन अन्य भेदों को नहीं कहा गया है उसको भी पूर्व कथित इन लक्षण में ही अन्तर्भाव होता है ऐसा

Scanned by CamScanner
ankurnagpal108@gmail.com

समझना ॥१४॥

नित्यकादाचित्कभेदान्मुक्तद्वैविध्यमुच्यते ।
नित्याः कदाचित्तत्रापि सिद्धाः सुपुरुषा वराः ॥१५॥
गर्भजन्मादिदुःखं येऽननुभूय स्थिताः सदा ।
सीतारामप्रियाः शश्वदाञ्जनेयादयो मताः ॥१६॥

मुक्तजीवानामपिभेदं दर्शयति-'नित्यकादाचि' दित्यादि । मुक्ता अपि द्वि विधा भवन्ति नित्याः कादाचित्काश्च । अर्थात् नित्यकादाचित्कभेदान्मुक्ता अपि द्विप्रकारका भवन्ति । तत्रापि नित्यकादाचित्केषु मुक्तेषु मध्ये ये महानुभावाः कदाचिदपि गर्भजन्मादिदुःखमननुभूयैवस्थिताः, अर्थात् ये जीवा गर्भादिदुःख मननुभूत्वैवस्थितिमकुर्वन् ते नित्या अर्थात् नित्यमुक्तजीवा इति कथ्यन्ते । तस्मात्ते सदा सर्वदा सिद्धाः । अर्थात् स्वस्मिन् अन्तर्यामिरूपेणास्थितं श्रीराम मनुभूतवन्तः । ते शश्वत् श्रीसीतारामप्रियाः तत एव च सुपुरुषा वराः श्रेष्ठाश्चेति । यथा आञ्जनेयादिका महानुभावाः । एते नित्यमुक्ता इति कथिताः ॥१५-१६॥

जो मुक्त जीव हैं वे नित्यमुक्त तथा कादाचित्क मुक्त इस तरह उनका दो भेद होता है । उसमें जो व्यक्ति कभी भी कालत्रय में भी गर्भवास दुःख का अर्थात् जन्म मरणादि दुःखों का अनुभव नहीं किये हों एतादृश विलक्षण पुण्यशाली पुरुषों को नित्यमुक्त कहते हैं । अतः सर्वदा प्राकृतिक बन्धन विमुक्त स्वकीय जीव स्वरूप में अन्तर्यामी के रूपसे सर्वदा अवस्थित भगवान् श्रीसीतारामजी का अनुभव करते हैं। अतएव भगवान् श्रीरामजी के प्रियभक्त जीवों में भी वे सर्वश्रेष्ठ गिने जाते हैं । यथा भगवान् के परमप्रिय श्रीआञ्जनेयादिक माने गये हैं ॥१५-१६॥

नित्यमुक्ता अपि द्वेधा परिजनाः परिच्छदाः ।
मारुताद्याः किरीटाद्याः क्रमात्ते च प्रकीर्तिताः ॥१७॥

ये च नित्यमुक्तजीवास्तेऽपि पुनः परिजनपरिच्छदभेदेन द्वेधा द्विप्रकारका भवन्तीति ज्ञातव्याः । ते च क्रमात् मारुत्यादिकाः परिजना किरीटादिकाः परिच्छ दाः प्रकीर्तिताः ये च समीपे वसन्ननेकविधसेवादिकं कुर्वन्ति ते परिजना (हजू रिया) इतिलोकप्रसिद्धाः यथा श्रीआञ्जनेयादिका इति ज्ञेयम् ॥१७॥

Scanned by CamScanner ankurnagpal108@gmail.com

जो नित्यमुक्त जीव हैं वे भी दो प्रकार के होते हैं। परिजन तथा परिच्छद के भेद से। इसमें श्रीहनुमानजी तथा किरीटादिकों का समावेश होता है। अर्थात् किरीट मुकुट वगैरह आभूषणों की तथा पहनानेवाले और सुरक्षित रखनेवाले को परिच्छद करते हैं। तथा समीपस्थ होकर के बात चीत तथान्य सेवा करनेवाले हजूरिया को परिजन कहते हैं। जैसे श्रीहनुमानजी वगैरह ॥१७॥

भागवताः केवलाश्च कादाचित्का अपि द्विधा ।
तत्र भागवताबोध्या ये तेषु भगवत्पराः ॥१८॥

तत्र कादाचित्कामुक्ता अपि भागवताः केवलाश्चेति भेदात् द्विधा द्विप्रकारका भवन्ति। तेषु तदुभययोर्मध्ये ये भगवत्पराः ते भागवताः अर्थात् भगवति श्रीसीताराममात्रेनिष्ठा विद्यते येषां तादृशमुक्ता भागवता इति कथ्यन्ते प्राचीनमहापुरुषैरिति ॥१८॥

जो कादाचित्क मुक्त हैं वे भी भागवत तथा केवल इस भेद से दो प्रकार के होते हैं। उसमें जो मात्र भगवान् परमकारण श्रीसीतारामजी में ही निष्ठावान् होकर श्रीरामजी का ही सेवन करते हैं वे भागवत हैं, ऐसा जानो ॥१८॥

भगवद्भोग्यभूत्यादिसाक्षात्कारसुखाश्रयाः ।
श्रीराममानसा नित्यं तदनुध्यानतत्पराः ॥१९॥
केचिद्गुणानुसन्धानपराः कैङ्कर्यतत्पराः ।
इत्थं महर्षिभिः प्रोक्ता द्विविधा भगवत्पराः ॥२०॥

तत्र ये भागवतास्तेषामपिद्वैविध्यं दर्शयति 'भगवद्भोग्यभूत्यादीत्यादि हे सुरसुरानन्द ! केचित् केचनभागवता-'भगवद्भोग्यभूत्यादिसाक्षात्कारसुखाश्रयाः' भगवता परमपुरुषेण श्रीरामेण भोग्या भोक्तुं योग्या ये भूत्यादय ऐश्वर्यादयो विविधसम्पत्तयः, तासां साक्षात्कारेण जायमानानि सुखानि तेषामाश्रयभूताः श्रीराममानसाः अर्थात् परमकारणे श्रीरामे दत्तचित्ताः सन्तः नित्यं तदनुध्यानतत्पराः सर्वदा भगवतोध्याने व्याप्तमनसः सन्तः, भगवतः श्रीरामस्य कैङ्कर्ये दास्ये तत्पराः संलग्ना भवन्ति, केचित्तु गुणानुसन्धानपराः श्रीरामस्य दयाकारुण्याद्यनन्तगुणचिन्तनानुरक्ता इति । इत्थं पूर्वकथितप्रकारेण द्विप्रकारका

Scanned by CamScanner ankurnagpal108@gmail.com

भगवत्पराः भागवता भवन्तीति महर्षिभिः पूर्वाचार्यैः श्रीबोधायनगङ्गाधराचार्य प्रभृतिभिः प्रोक्ता समुपदिष्टाः इति जानीहि ॥१९-२०॥

हे सुरसुरानन्द ! भागवत भी दो प्रकार के होते हैं । इन भगवत्परायण भागवतों में एक तो वे हैं जो कि सम्पूर्ण चराचर जगत् के नायक भगवान् श्रीरामजी के सकल विभूति सम्पत्तियों के साक्षात्कार होने से जायमान जो सुख विशेष तादृश सुख से सुखी होते हुए भगवान् श्रीरामजी में दत्तचित्त तथा सदा भगवान् श्रीरामजी के ध्यान में संलग्न हों । और द्वितीय भागवत वे हैं जो परमब्रह्म परमात्मा श्रीरामजी के गुणों का अनुसन्धान एवं कायिक, वाचिक, मानसिक सेवा में तत्पर रहते हैं । इसप्रकार पूर्वाचार्य महर्षियों ने कहा है ॥१९-२०॥

द्विविधा केवला बोध्या दुःखभावैकतत्पराः ।
आत्मानुभूतिपरमा इति चोक्ता महर्षिभिः ॥२१॥

इत्यानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्ययतिराजप्रणीते श्रीवैष्णवमताब्जभास्करे श्रीवैष्णवभेदनिरूपणात्मकषष्ठप्रश्नोत्तराख्यः षष्ठः परिच्छेदः ॥६॥

केवलानां मुक्तानामपि द्वैविध्यं दर्शयति-'द्विविधा' इत्यादि । हे सुरसुरानन्द ! दुःखभावेषु तत्पराः अर्थात् सुखेसुखोपाये च दुःखभावनामेव कुर्वन्तः तथा-'आत्मानुभूतिपरमा' स्वकीयात्मभावनायामेव सर्वदा परायणाः एतादृश भेदात् महर्षिभिः केवला अपि द्विप्रकारका भवन्तीति कथिता इति त्वयाऽपि तथैव ज्ञातव्या इति भावः ॥२१॥

हे सुरसुरानन्द ! पूर्वाचार्य श्रीव्यासादि महर्षियों ने केवल मुक्त को भी दो प्रकार का बतलाया है । एक तो वे जो सुख तथा सुखोपाय में भी दुःख की ही भावना करनेवाले हैं अर्थात् आत्म व्यतिरिक्त सभी पदार्थ को दुःखरूप ही समझने की भावना में लगे रहते हैं । और दूसरे वे हैं जो सर्वदा स्वानुभूति में ही संलग्न रहते हैं । अन्य पदार्थ का चिन्तन नहीं करते हैं ॥२१॥

卐 अथ श्रीवैष्णवलक्षणनिरूपणम् 卐

समुच्यते सम्प्रति लक्षणं सन् महात्मनां सद्गुणवैष्णवानाम् ।
विरिञ्चिशंभुश्रितरामचन्द्रपदारविन्दस्थितचेतसां हि ॥१॥

Scanned by CamScanner ankurnagpal108@gmail.com

इतः पूर्वं सविस्तरं श्रीवैष्णवभेदं प्रदर्श्य सम्प्रति तदीयं लक्षणं वक्तुमुप क्रमते 'समुच्यते सम्प्रति' इत्यादि । हे सुरसुरानन्द श्रीवैष्णवभेदनिरूपणानन्तरं- 'विरिञ्चिशंभुश्रितरामचन्द्रपदारविन्दस्थितचेतसाम्' चतुर्मुखशिवाभ्यां श्रिते संसेविते श्रीरामचन्द्रपदारविन्दे तदीयचरणकमले स्थितं चेतोमनोयेषाम् तथा सद्गुणवैष्णवानां समीचीनगुणवतां महात्मनां महापुरुषाणां श्रीवैष्णवानां प्रशस्तमव्याप्ति, अतिव्याप्त्यसंभवदोषरहितं लक्षणं सत् चिह्नं सम्प्रति मयोच्यते त्वं तदवधारयेति ॥१॥

हे सुरसुरानन्द ! ब्रह्मा महादेव तथा शेष प्रभृतिक महानुभावों से सर्वदा सेवित जो भगवत् श्रीरामचन्द्रजी के चरणकमल उसमें संलग्न है मन जिनका ऐसे सद्गुणों से विशिष्ट श्रीवैष्णव महात्माओं का चारुलक्षण-प्रशस्त लक्षण बतलाता हूँ । अर्थात् जो अव्यासि अतिव्यासि तथा असम्भव रूप जो तीन दोष लक्षण के हैं उन दोषों से रहित अतएव मनोज्ञ लक्षण बतलाता हूँ तुम इस लक्षण को जानो ॥१॥

धृतोर्ध्वपुण्ड्रस्तुलसीसमुद्भवां दधच्च कण्ठे शुभमालिकां जनः ।
तज्जन्मकर्माणि हरेरुदाहरेद् गृह्णंश्चनामानि शुभप्रदानि सः ॥२॥

श्रीवैष्णवोधृतोर्ध्वपुण्ड्रः, धृताधारिताद्वादशस्थानेषु ऊर्ध्वपुण्ड्रा येन तादृशः तुलसीकाष्ठनिर्मितां कण्ठे कण्ठदेशे शुभमालिकां पवित्रमालां कण्ठीपद वाच्याञ्च दधत् धारयन् जनः । तदुक्तं 'अष्टोत्तरशतेनैव तुलसीकाष्ठसंभवाम्, कण्ठादिनाभिपर्यन्तं धारयेद्वैष्णवोत्तमः' इति । तस्य भगवतो रामस्य शुभं मोक्षप्रदं श्रीरामेत्यादि नाम गृह्णन् समुच्चारयन् तथा हरे सर्वपापहारकसर्वेश्वर श्रीरामचन्दस्य जन्मकर्मसम्बन्धिनीं कथां उदाहरेत् । यः सः श्रीवैष्णव इति ज्ञेयम् ॥२॥

मस्तक प्रभृतिक द्वादश अङ्गों में सम्प्रदाय सिद्ध श्री रक्त श्री शुक्ल श्री विन्दु श्री गुप्त श्री प्रभृति तिलक करें तथा कण्ठी अर्थात् तुलसी काष्ठनिर्मित माला का धारण करना भगवान् श्रीरामजी के जन्मादि सम्बन्धी कथाओं का कथन करना । एवं मोक्ष को देनेवाला जो भगवान् श्रीरामजी का शुभ श्रीरामनाम है उसका निरन्तर उच्चारण करना अर्थात् श्रीरामनाम का जप सतत करना । ये ही ऊर्ध्वपुण्ड्र तिलक विगेरे श्रीवैष्णवों का विशेष लक्षण है ऐसा शास्त्र का मत है श्रीवैष्णव तिलकमीमांसा में

Scanned by CamScanner ankurnagpal108@gmail.com

तिलक विषयक विशिष्ट विवेचन किया हूँ अतः विशेषार्थी वहीं देखें ॥२॥

सीतापतेः संश्रृणुयान्निरन्तरं कथां च गायेत्सुयशोऽङ्कितां मुहुः ।
रूपं तदीयं च चराचरात्मकं पश्यन् सतां सङ्गमुदारधीश्चरेत् ॥३॥

श्रीसीतापतेर्दशरथतनयस्य सुयशोऽङ्कितम् शोभनैर्यशोभिरङ्कितां संयुक्तां कथं कीर्तिसंवलितां पुण्यकथां मुहुर्मुहुर्वारंवारं संश्रृणुयात् तत्कथाश्रवणं सर्वदा कुर्यात् । तथा भागवतीयां कथां स्वयमपि गायेत् अन्यान् श्रावयेत् अन्येभ्यः श्रृणुयाद्वा ।तथोदारधीः उदारा धीर्बुद्धिर्यस्य तादृशो भक्तः चराचरात्मकं सकल स्थावरजङ्गमात्मकं तदीयं भगवत्सम्बन्धिरूपं तदीयं श्रीविग्रहं पश्यन्, अर्थात्स मस्तं जगत् भगवदात्मकं पश्येत् पश्यन् च तदीयरूपं तद्भक्तेन सह सङ्गमं सत्सङ्गतिं कुर्वंश्चरेदितिशास्त्रविधानमिति संक्षेपः ॥३॥

हे सुरसुरानन्द ! उदार मन वाले श्रीवैष्णवगण समस्त जगत् का परम कारण भगवान् श्रीसीतापति मर्यादापुरुषोत्तम के सुन्दर यश समुदाय से युक्त जन्म कर्मादिकों का निरन्तर श्रवण करें तथा भगवान् की कथा का स्वयं गान करके लोगों को सुनावें तथा भगवान् श्रीरामजी के जड़चेतनात्मक जो श्रीविग्रह हैं तादृश श्रीविग्रहों का दर्शन तथा सत्सङ्गति करते हुए विचरण करें ॥३॥

चापादिपञ्चायुधचिह्नताङ्कः समीक्ष्य हृष्टश्च हरिप्रियानथ ।
तथा विधान् भक्तिपरः प्रपूजयेत् सुवैष्णवान् जन्मफलादिसंस्तुवन् ।४।

चापादिपञ्चायुधचिह्नताङ्कः-चापवाणादिभिः पञ्चभिः संख्याकायुधैः शस्त्रैः चिह्नितान्यङ्कितानि अङ्गानि शरीराणि यस्य तादृशः, तथाविधान् चापाद्यङ्कितदेहान् हरिप्रियान् श्रीरामप्रियान् अपरान् श्रीवैष्णवान् समीक्ष्य दृष्ट्वा हृष्टः भक्तिपरः सन् स्वकीयजन्मफलादिसंस्तुवन्, श्लाघमानस्तान् श्रीरामप्रियान् सुवैष्णवान् प्रपूजयेत्, तेषां यथासाध्यमातिथ्यादिकं कुर्यात्, श्रीवैष्णवान्तरानर्च येन्नतुस्थानान्निष्काशयेदितिभावः ॥४॥

भगवच्चापबाणादि पाँच आयुधों से चिह्नित शरीरवाले श्रीवैष्णव भगवान् श्रीसीतानाथजी की भक्ति करने में सदा तत्पर एतादृश चिह्नाङ्कित स्वेतर श्रीरामभक्तों को देखकर प्रसन्न होते हुए स्वकीय जन्म ग्रहण करने के फल की प्रशंसा करते

Scanned by CamScanner ankurnagpal108@gmail.com

हुए दूसरे वैष्णवों का जो कि उसके स्थान में आये हुए नवागत श्रीवैष्णव हैं पूजन करें अर्थात् यथा साध्य भोजनादि से सेवा करें ॥४॥

पञ्चायुधाङ्काङ्कितवैष्णवा ये विप्रा अथ क्षत्रियवैश्यशूद्राः ।
स्त्रियस्तथान्येऽपि च विष्णुरूपा जगत्पवित्रप्रपवित्रिणस्ते ॥५॥
ते सर्वतीर्थाश्रयभूतदेहा देशे महाभागवता वसन्ति ।
यस्मिन् स तद्दर्शनसंस्थितिभ्यां सूते सुपुण्यं निखिलाघशून्यम् ।६।

गतप्रकरणेन श्रीवैष्णवानां लक्षणानि प्रदर्श्य सम्प्रति तादृशवैष्णवानां महत्वं दर्शयितुमुपक्रमते पञ्च इत्यादि । हे सुरसुरानन्द ये पञ्चायुधाङ्कितावैष्णवाः विप्रा ब्राह्मणाः अथ क्षत्रियवैश्यशूद्राश्च तथास्त्रियोऽपि भगवदायुधाङ्किता श्रीवैष्णव्योः भवन्ति अथ च संकरविशेशा निषादादयोऽपि यथाविधिपञ्चायुधाङ्किता श्रीवैष्णवा भवन्ति ते सर्वेऽपि सदा सर्वदा विष्णुरूपा एव भवन्ति नात्र सन्देहलेशोऽपि । ते एते कीदृशाः पुनः जगत्पवित्रप्रपवित्रिणः जगत् चराचरात्मकं विश्वं ये पवित्रयन्ति सर्वथा पापहीनं कुर्वन्ति, ये गंगादिकास्तीर्थास्तानपि एते साधवः पवित्रयन्ति । कुतः ? यतः सर्वतीर्थाश्रयदेहभूताः अर्थात् सर्वतीर्थशरीरधारकाः सर्वं विश्वं गङ्गादिप्रमुखाः पवित्रयन्ति, इमे तु साधवस्तान् तीर्थानपि पवित्रयन्ति । इत्थं भूता विष्णुरूपाः साधवः पञ्चायुधाङ्किता यत्र देशे प्रदेशे वसन्ति, तद्दर्शनस्थितिभ्यां तस्य देशस्य साक्षात्कारेण तत्र निवासेन च द्रष्टुर्निखिलाघशून्यं सर्वपापरहितं सुपुण्यं सूते समुत्पादयति । सविधिगृहीतदीक्षश्रीवैष्णवनिवासस्थानं सकलपापविनाशकं भवतीति ज्ञातव्यम् । श्रीवैष्णवविधिना भगवतः पञ्चायुधाङ्कनेन ब्राह्मणा भवन् तदन्ये वा निषादपर्यन्ता वर्णाश्रमाचारविवर्जीता अपि विष्णुतुल्यतां धारयन्तः सर्वतीर्थस्यापि पवित्रकाः श्रीवैष्णवा यत्र वसन्ति तद्देशस्य दर्शनं कुर्वतां तत्र वसतामपि दर्शनवसतिभ्यां यत् सर्वातिशायिपुण्यं भवति, पापविनाशकञ्च भवति तादृशसाधोर्दर्शनं तु कैमुतिकन्यायेन सर्वपापविनाशकं जायते इत्यर्थवादः ॥५-६॥

श्रीवैष्णवीय विधि से जो कोई द्विजोत्तम ब्राह्मण क्षत्रिय वैश्य शूद्र तथा स्त्री जातीयक और तदितर वर्णसंकर निषादादिक इन भगवान् के पञ्चायुध से अङ्कित होते

Scanned by CamScanner ankurnagpal108@gmail.com

हैं अर्थात् तप्तमुद्रा से मुद्रित होते हैं। वे समस्त वैष्णव तीर्थों का निवास स्थान होने के कारण स्थावरजङ्गमात्मक समस्त संसार को सर्वत्र पवित्र करनेवाले जो गङ्गा नदी ब्रह्मपुत्रादि नदात्मक जितने तीर्थ जगत् में हैं एतादृश उन गङ्गादिक तीर्थों को भी पवित्र करनेवाले होते हैं। तथा विष्णु स्वरूप ही पूर्वोक्त श्रीवैष्णव लोग होते हैं। एतादृश महात्मा श्रीवैष्णव जिस अयोध्यादिक देशों में निवास करते हैं। उस देश का दर्शन तथा तादृश पवित्र पवित्रीकृत देश में निवास करने से समस्त पापों का नाश करनेवाला पुण्यपुञ्ज की उत्पत्ति होती है ॥५-६॥

तदर्चनात्तत्पदनीरपानात्तत्सङ्गतेस्तत्प्रणतेर्विधानात् ।
नृणां हि तच्छिष्टसुभोजनाच्च स्यात्कोटिजन्मार्जितपापनाशः ॥७॥

तदर्चनात्तेषां पूर्वकथितचापायुधादिचिह्नरूपलक्षणलक्षितानां भागवतश्री वैष्णवानामर्चनात् पूजनकरणात् तत्पदनीरपानात्, अर्थात् पूर्वोक्तभागवतपादोदकपानकरणात्, एवं तत्सङ्गतेस्तादृशवैष्णवैः सह सत्सङ्गकरणात् तथा तत्प्रणतेर्विधानात्, तेषां यथोक्तवैष्णवानां यत् भुक्तावशिष्टं फलादिकं तस्य साक्षाद्विष्णोरेव प्रसाद इति कृत्वा प्रसादरूपेण स्वीकारतः नृणामर्चनादिकर्तृपुरुषाणाम् यत् कोटिभिरनेकभवपरम्परया समुपार्जितं तादृशपापानाम्, अशुभकर्मसमूहानां विनाशः स्यात्। अर्थात् यो हि यथोक्तलक्षणलक्षितं महाभागवतं पूजादिविविधप्रकारेण सन्तोषयति, तादृशार्चकस्य यदनेकभवोपार्जितं पापं तद्भस्मसाद्भवतीति सारः।

तदत्रानुसन्धेयाः-

ते मय्यपेताखिलचापलेऽर्भके दान्तेऽधृतक्रीडनकेऽनुवर्तिनि ।
चक्रुः कृपां यद्यपितुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि ॥
उच्छिष्टलेपाननुमोदितोद्विजैः सकृत्स्म भुञ्जे तदपास्तकिल्बिषः । इति १।५-२५ (भागवते) तथैवान्यत्रापि-

मद्रूपो वैष्णवो नाम तुलसीकाष्ठभूषणः ।
शङ्खचक्रगदापद्मैश्चिह्नितो यस्य विग्रहः ॥
ऊर्ध्वपुण्ड्रधरो भक्तस्तुलसीकर्णकण्ठयोः ।
पञ्चायुधाङ्कितो यो वै स एव मम वल्लभः ॥

Scanned by CamScanner ankurnagpal108@gmail.com

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव तथैव च ।
पञ्चायुधाङ्किता देवि ? मद्रूपा नात्र संशयः ॥
दीक्षिताश्च चतुर्वर्णाः स्त्रियश्च श्वपचास्तथा ।
धारयन्त्यूर्ध्वपुण्ड्रं ये देवानामपि वन्दिता ॥
तुलसीकाष्ठजामाला यस्य कण्ठे हि मण्डिता ।
चिह्नितः शङ्खचक्राभ्यां स मद्रूपो न संशयः ॥
एवं हि कथितं रूपं वैष्णवानां वरानने ? ।
बहूनि सन्ति रूपाणि किमन्यच्छोतुमिच्छसि ॥

卐 श्रीपार्वत्युवाच 卐

वैष्णवानां दर्शने देव ! कीदृशं फलमुच्यते ।
पुष्कराद्यानि तीर्थानि तेषु वै कतमोऽधिकः ॥

Ψ श्रीभगवानुवाच Ψ

तिस्रकोट्योऽर्द्धकोटी च सन्ति तीर्थानि सर्वतः ।
दर्शनाद्वैष्णवानां च न तुल्यं हि वरानने ॥

卐 श्रीपार्वत्युवाच 卐

काष्ठपाषाणधातूनां तवांशानां हि केशव ! ।
एतेषां दर्शनं देव ! साधूनामपि कीदृशम् ॥

Ψ श्रीभगवानुवाच Ψ

वैष्णवा हि ममांशाश्च लोके नाऽन्यस्य वै क्वचित् ।
गायन्ति मम कर्माणि विचरन्ति मदात्मकाः ॥

卐 श्रीपार्वत्युवाच 卐

यानि चान्यानि धर्माणि पुराणानीह केशव ? ।
स्पर्शने वैष्णवानां च धर्माणामपि किं फलम् ॥

Ψ श्रीभगवानुवाच Ψ

नारायणायुधैश्चिह्नं कुर्वन्ति बाहूमूलयोः ।
तेषां संस्पर्शनाद्देवि ! हन्ति पापं पुराकृतम् ॥
यदा यदा विचरन्ति लोकपावनवैष्णवाः ।

Scanned by CamScanner
ankurnagpal108@gmail.com

तदा तदा तीर्थभूताः पवित्रीकृतनामकाः ॥
निष्कामश्चैव मद्भक्तः सकामोलोक उच्यते ।
सकामान्पद्भ्यां यच्छामि निष्कामान्मुर्ध्नि चराम्यहम् ॥
महाभागवता यत्र वसन्ति विमलाशयाः ।
तद्देशो मङ्गलं प्रोक्तं यथा विष्णुपदं शुभम् ॥
निमिषं निमिषार्धं वा यत्र तिष्ठन्ति वैष्णवाः ।
तदेव परमं स्थानं तत्तीर्थं तत्तपोवनम् ॥
वैष्णवः परमो धर्मो वैष्णवः परमं तपः ।
वैष्णवः परमाराध्यो वैष्णवः परमागतिः ॥
वैष्णवा विष्णुवत् पूज्या मम मान्या विशेषतः ।
तेषां कृतेऽवमाने तु विनाशो जायते ध्रुवम् ।
नातः परतरं तीर्थं वैष्णवाङ्घ्रिजलाच्छुभात् ।
तेषां पादोदकं नित्यं गङ्गामपि पूनाति हि ।
रामभुक्तानुशेषं तु योहि भुङ्क्ते दिने दिने ।
सिक्थे सिक्थे भवेत्पुण्यं चान्द्रायणशताधिकम् ॥
कोटिजन्मार्जितं पापं ज्ञानतोऽज्ञानतोऽपि वा ।
सद्यः प्रणश्यते नृणां वैष्णवोच्छिष्टभोजनात् ॥
अर्चावतारोपादानं वैष्णवोत्पत्तिचिन्तनम् ।
मातृयोनिपरीक्षायास्तुल्यमाहुर्मनीषिणः ॥' इति ॥७॥

पूर्वकथित चापबाणादि चिह्नचिह्नितमस्तकादि द्वादश स्थानों में ऊर्ध्वपुण्ड्रादिक जगत को पवित्र करनेवाले इन विष्णु स्वरूप महाभागवत श्रीवैष्णवों का पूजन, दण्डवत् नमस्कार जोकि सम्प्रदायानुमत है, तादृश प्रणाम चरणोदक का पान तथा आदरपूर्वक उनको दिया हुआ फलादिक नैवेद्यों का प्रसाद रूपसे ग्रहण करनेवाले पुरुष का हजारों जन्म जन्मान्तर सञ्चित पापकर्म का अग्नि स्पृष्ट इषिका तूलवत् नाश होता है ॥७॥

कार्पासकैः सप्तभिरद्भूतैर्गुणैः सुनिर्मितं तत्कटिसूत्रमुत्तमम् ।
काषायकं वस्त्रयुगञ्च धारयेत्तथोर्ध्वपुण्ड्रादिकमेव वैष्णवः ॥८॥

इत्यानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्ययतिराजप्रणीते श्रीवैष्णवमताब्जभास्करे श्रीवैष्णवलक्षमनिरूपणात्मकः सप्तमप्रश्नोत्तराख्यः सप्तमः परिच्छेदः ॥७॥

Scanned by CamScanner ankurnagpal108@gmail.com

गतप्रकरणेन महाभागवतश्रीवैष्णवानां स्वरूपलक्षणमाहात्म्यादिकं प्रदर्श्य तदनुतद्धार्यकर्तव्याचरणमपि दर्शयितुमुपक्रमते 'कार्पासकैः' इत्याद्यष्टमश्लोके न। महाभागवतः श्रीवैष्णवः कार्पासकैः कार्पासकेननिर्मितानि इति कार्पासकैः कार्पासाज्जायमानैः । अद्भूतैर्विलक्षणैः सप्तभिर्गुणैः सप्तसंख्याकगुणैः स्थूल कृशत्वादिरहितैः सुनिर्मितं स्वहस्तेनरचितं तदुत्तमं दर्शनस्पर्शने मनोहरम् कटि सूत्रम् कट्यांपरिधातुं योग्यं न न्यूनम् नापि प्रमाणाधिकम् । एतादृशं सर्वश्रेष्ठं कटिसूत्रं तथा कषायदूषकं कषायरङ्गरञ्जितं काषायकं वस्त्रं चकारग्राह्यं कौपीन कमपि धारयेत्, कौपीनं नाम धौतवस्त्राभ्यन्तरे कट्यां धारणयोग्यं वस्त्रखण्ड लक्षणकम् । तथा वस्त्रयुगम्, एकं धौतवस्त्रं स्वच्छजलेन प्रक्षालितं श्रीवैष्णवी यविधानानुसारेण गृहीतविरक्तदीक्षकाणां कृते महर्षिश्रीबोधायनादिविहीत काषायवस्त्रं सोत्तरीयं च धारयेदित्यर्थः 'काषायाम्बरश्वेतादिहरिन्नीलं विनाम्व राः' श्रीवशिष्ठसंहिता 'काषायवासाः सततं ध्यानयोगपरायणः' श्रीवाल्मीकिसं हिता 'धौतकाषायवसनः' काषायवासाः सततं ध्यानयोगपरायणः' पद्मपुराणादि खण्डः 'काषायवासाः' श्रीबोधायनः 'काषायकर्पटः कौपीनाच्छादनार्थं वासो बिभृयात्' श्रीगालवः 'काषायमेव कार्पासं वासः' श्रीलिखितः 'काषायमात्र वेषेण यतिः पूज्यो युधिष्ठिरः' श्रीजमदग्निः 'काषायमेव कार्पासं वासः' श्रीजा वालिः प्रभृतिभिर्विरक्तश्रीवैष्णवानां कृते विहीतकाषायवस्त्रस्य धारणं कुर्यादि तिभावः । यतो 'मञ्चकं शुक्लवस्त्रं च स्त्रीकथा लौल्यमेव च । दिवास्वापं च यानं च यतीनां पतनानि षट्' अत्रिस्मृतिः 'न वा तदूर्ध्वं शुक्लाम्बरं विभृयात्' महर्षिश्रीबोधायनः 'बीजघ्नं तैजसं पात्रं शुक्लोत्सर्गः सिताम्बरम् । दिवास्वापो वृथा जल्पो यतीनां पतनानि षट्' श्रीक्रतुः 'मञ्चकं शुक्लवस्त्रं च स्त्रीकथा लौल्यमेव च । दिवास्वापं च यानं च यतीनां पातकानि षट्' महर्षिश्रीवाल्मीकिः 'रात्र्यध्वानं च यानं च स्त्रीकथा लौल्यमेव च । मञ्चकं शुक्लवस्त्रं च यतीनां पतनानि षट्' श्रीमेधातिथिः प्रभृतिभिः श्रीवैष्णवीयविधानानुसारेण संगृहीत विरक्तदीक्षाकश्रीवैष्णवयतीनां कृते शुक्लवस्त्रस्य निषेधात् ।

तदत्र 'सहदण्डत्रयेणान्त्या काषायाम्बरधारकाः' इतिब्रह्मर्षिश्रीवशिष्ठवच नात् त्रिदण्डिश्रीवैष्णवयतीनां कृते काषायम्बरमनिवार्यं 'काषायम्बरश्वेतादि'

Scanned by CamScanner
ankurnagpal108@gmail.com

इति च तेषामेव वचनात् त्रिदण्डरहितविरक्तश्रीवैष्णवयतीनां कृते काषायम्बरे संकोचो विधीयते 'हरिन्नीलं विनाम्बराः' इतिवचनेन च हरिन्नीलवस्त्राणां प्रस ज्यप्रतिषेधः कृतः श्रीवैष्णवविरक्तदीक्षादीक्षितयतीनां ततश्च हरिन्नीलं विना काषायश्वेताम्बरधारकाः श्रीवैष्णवसंन्यासिनो भवन्तीति विवेकः । श्रीवैष्णवी याचारादिविधायकागमादिशास्त्रेषु पीतवस्त्रस्य विधिनिषेधानुपलब्धेरशिष्टाप्रति षेधत्वेन व्यवहरन्ति केचित् परन्त्वन्यरङ्गरञ्जितवस्त्रव्यवहारस्तु प्रकृतश्लोकादर्शे सर्वथा त्याज्यः । भाष्यकारेण मुण्डकोपनिषदः ३।२।४ मन्त्रस्थलिङ्गशब्दव्या ख्याने 'लिङ्गं वर्णाश्रमसूचकचिह्नविशेषः शिखासूत्रतिलकतुलसीकण्ठमालि का त्रिदण्डकाषायादिः' समुल्लिख्यविरक्तश्रीवैष्णवानां कृते काषायाम्बरस्य विधानं सुस्पष्टतया बोधितमस्तीति ज्ञेयम् । तथा ऊर्ध्वपुण्ड्रादिकमेव श्रीवैष्णवः सर्वत्र व्यापकतया समवस्थितभगवतो रामस्य भक्तिकारकः धारयेत् यथा भगव तो रामस्य भक्तिमात्रसम्पादनकामनया वस्त्रादिकं धारयेत्तथैव तदीयभक्तिकाम नया सम्प्रदायसिद्धमस्तकादिद्वादशस्थानेषु ऊर्ध्वपुण्ड्रमेव प्रतिपादयेद्वैष्णव इति भावः ॥८॥

भगवान् श्रीरामजी में उत्तम अनन्याभक्ति का सम्पादन करनेवाले भागवत श्रीवैष्णगण कपास रुई के समानाकार सर्वत्र एक रूपसे कते हुए सात सूत्रों से यथो चित रूपसे निर्मित अतएव अत्युत्तमकोटि में धारण करने योग्य कटिसूत्र आडवन को धारण करें । तदनन्तर काषाय कौपीन लंगोटी को धारण करें तथा एक धोती और एक चादर वा एक साफी अङ्गोछा को भी धारण करें अपने पूर्वाचार्य महर्षि श्रीबोधायनजी तथा श्रीवशिष्ठजी आदि से विरक्त दीक्षा से दीक्षित श्रीवैष्णव यतियों के लिये विहीत काषाय रंग से रंगा काषाय वस्त्र हो उसका धारण करें । विरक्त श्रीवैष्णवों के लिये महर्षि श्रीअत्रिजी महर्षि श्रीबोधायनजी ब्रह्मर्षि श्रीवशिष्ठजी महर्षि श्रीगालव जी महर्षि श्रीजमदग्निजी महर्षि श्रीवाल्मीकिजी प्रभृति अनेक महर्षियों ने काषाय वस्त्र का ही विधान किया है । श्रीसम्प्रदाय-श्रीरामानन्दसम्प्रदाय के पाँचवें आचार्य ब्रह्मर्षि श्रीवशिष्ठजी ने अपने आश्रम धर्मनिरूपण में स्पष्ट किया है कि त्रिदण्डधारक श्रीवैष्णव संन्यासी को काषाय वस्त्र धारण करना अनिवार्य है त्रिदण्ड रहित विरक्त श्रीवैष्णव संन्यासी श्वेताम्वर भी धारण कर सकता है पर हरे नीले वस्त्र

Scanned by CamScanner ankurnagpal108@gmail.com

का कथमपि धारण नहीं करना चाहिये । आनन्दभाष्यकार जगद्गुरु श्रीरामानन्दाचार्यजी ने मुण्डकोपनिषद् ३।२।४ मन्त्र के अपने आनन्दभाष्य में लिङ्ग चिह्न वेषभूषा शब्द के व्याख्यान में शिखासूत्र तिलक तुलसीकण्ठमालिका त्रिदण्ड काषाय आदि लिखकर विरक्त श्रीरामानन्दीय श्रीवैष्णवों के लिये काषाय वस्त्र का ही विधान किया है अतः आचार्य श्री की आज्ञा पालन श्रीवैष्णवों का कर्तव्य होने से काषाय वस्त्र धारण करना चाहिये। एवं द्वादश स्थानों में ऊर्ध्वपुण्ड्र तिलक लगावें । यह श्रीवैष्णवों का पालनीय आचरण है । तथा सम्प्रदायोचित भजन पूजनादिक कार्य यावज्जीवन करे श्रीरामानन्दीय तिलक स्वरूप के विषय में श्रीवैष्णवतिलकमीमांसा हमारा अलग निबन्ध छपा है विशेष जानकारी के लिये उसे देखें तथा इसी सद्ग्रन्थ के परिच्छेद चार श्लोक दो के प्रभा-किरण टीका से भी अनुसन्धान करें ।

卐 श्रीवैष्णववपनमीमांसा 卐

सामान्यतः जनता की जिज्ञासा रहती है कि श्रीवैष्णवों का स्वरूप कैसा होता है भद्र-मुण्डित पञ्चकेश-जटा जुटवाला कौनसा शास्त्र सम्मत नियत रूप है । जिज्ञासा होना स्वाभाविक भी है क्योंकि भद्र पञ्चकेश या जटावाला श्रीवैष्णवों का स्वरूप देखा जाता है । विरक्त श्रीवैष्णव समाज में भी यह चर्चा का विषय है अपना स्वरूप कैसा शास्त्र सम्मत है एवं अपने सम्प्रदाय के प्रधान आचार्यजी का श्रीविग्रह भद्र-मुण्डित पञ्चकेश या जटावाला कौनसा शास्त्र सम्मत है । अपने सत् शास्त्र की बहुलता के कारण इस विषय में बहुत कुछ विवेचनीय है पर यहाँ अतिसंक्षिप्तसार मात्र की मीमांसा की जाती है-

प्रस्थानत्रयानन्दभाष्यकार जगद्गुरु श्रीरामानन्दाचार्यजी की ७०२ वीं जयन्ती समारोह हेतु श्रीजनकपुरधाम-नेपाल जाते समय दिनाङ्क २९।०१।२००२ मंगलवार को त्रिवेणीवांध पर स्थित जगद्गुरु श्रीरामानन्दाचार्यमठ में रात्री आवास किये । मठ के संस्थापकाध्यक्ष श्रीमहन्त श्रीरामानन्ददासजी महाराज हैं उन दिनों परम्परागत कल्पवास मेला का प्रसङ्ग था अतः श्रीमहन्तजी ने मेला क्षेत्र में ही अपने विशाल शिविर में धर्मसभा का आयोजन किया उस सभा में श्रीसम्प्रदाय तत्त्व सम्बन्धी कईएक प्रश्न उपस्थापित किये उन्हीं में से एक आनन्दभाष्यकारजी के श्रीविग्रह के विषय में भी था । सामान्यतः सर्वसाधारण साधकों के वपन के विषय में पद्मपुराण

Scanned by CamScanner ankurnagpal108@gmail.com

पातालखण्ड अध्याय १९।२१ में ऐसा उल्लेख मिलता है-'**अत्र तिर्थादिषु स्नात्वा क्षौरं कुर्यात् विधानवित्। मनुष्याणां च पापानि तीर्थानि प्रति गच्छताम्।**' अर्थात् तीर्थ स्थान के प्रति जाते हुए साधक के शरीर में रहे हुए पाप कम्पित होने लगते हैं। अन्ततः केश को आश्रय करके रहते हैं अतः उन पापों के आश्रय स्थान केशों को तीर्थ स्थान में मुण्डन करके पापरहित हो जाना चाहिए। यह सर्वसाधारण मानव के लिए विधान है।

अपनी शुद्धि की कामना करनेवाले या भक्ति या मुक्ति की इच्छा करनेवालों को दीक्षा-दान-यज्ञ प्रभृति सत्कर्मों के पूर्व में वपन कराना चाहिए। इसप्रकार का श्लोक तत्त्वसारसंग्रह एवं निर्णयसिन्धु में प्राप्त होता है-

'आत्मनः शुद्धकामो वा भक्तिमुक्त्यादिहेतवे।
दीक्षादानादियज्ञेषु प्राक् वपनं हि कारयेत्।'

इसका तात्पर्य है-अपनी शुद्धि की कामना करनेवाले, भक्ति एवं मुक्ति की इच्छा रखनेवाले, साधक को दान-यज्ञ एवं सद्गुरु से दीक्षा ग्रहण करने से पूर्व क्षौर कराना चाहिए। इस श्लोक में सामान्य विधान के साथ दीक्षा शब्द का विशेष विधान है। दीक्षा ग्रहण से पूर्व वपन अवश्य कराना ही चाहिए। यह विधान श्रीसम्प्रदाय-श्री रामानन्दसम्प्रदाय में अक्षुण्य रूपसे प्रचलित है। विरक्त दीक्षा ग्रहण करनेवाले साधक के विषय में श्रीसम्प्रदाय-श्रीरामानन्दसम्प्रदायीय विरक्त दीक्षा जो सम्प्रदायीय रीतिरिवाज के अनुसार ग्रहण की गई हो, उसकी गणना संन्यास आश्रम में होती है। वेद एवं धर्म शास्त्र तथा स्मृतिशास्त्रों के विधानानुसार ब्रह्मचर्य-गृहस्थ-वानप्रस्थ एवं संन्यस्त चार ही आश्रम हैं। श्रीसम्प्रदायीय विधानानुसार चारों आश्रमों में दीक्षा लेने की प्रथा है। विरक्त श्रीवैष्णवीय संन्यासी दीक्षा में अन्तर इतना ही है कि संन्यस्त दीक्षा ग्राही को आठ प्रकार के श्राद्धों विरजाहोम प्रक्रिया को सम्पन्न करते हुए **लोकैषणाय स्वाहा वित्तैषणाय स्वाहा पुत्रैषणाय स्वाहा सर्वस्मात् व्युत्थितोऽहं सर्वेभ्यः मत्तः अभयं स्वाहा** प्रभृति वाक्यों से आबद्ध होना पडता है। जिन साधकों ने श्रीरामानन्दीय विधानानुसार विरक्त दीक्षा ली है, उन विरक्त दीक्षा से दीक्षित श्रीरामानन्दीय सन्त की गणना संन्यास आश्रम में होती है। उसका कुटीचक बहूदक हंस एवं परमहंस चार प्रकार हैं। इन सबों का कृत्य अलग अलग है। कुटीचक्र

ankurnagpal108@gmail.com
Scanned by CamScanner

के लक्षण एवं कृत्य प्रभृति के विषय में निम्न प्रकार से विधान प्राप्त होता है लघु विष्णु स्मृति में-

चतुर्विधाभिक्षिकाः स्युः कुटीचकबहूदकौ ।
हंसः परमंसश्च पश्चाद्योः यः स उत्तमः ॥

इसप्रकार विभाग करके उत्तरोत्तर श्रेष्ठ का निरूपण हुआ है। कुटीचकों को निम्न प्रकार से जानना चाहिए-

卐 कुटीचक 卐

'कुटीचकशिखायज्ञोपवीति दण्डकमण्डलुधरः कौपीनशाटीकन्थाधरः, पितृमातृगुर्वाराधनपरः, पिठरखनित्रशिक्यादिमात्रसाधनपरः एकत्रान्नादनपरः श्वेतोर्ध्वपुण्ड्रधारी त्रिदण्डः' इति संन्यासोपनिषद् ।

त्यक्त्वा सर्वसुखास्पदं पुत्रैश्वर्यसुखं त्यजेत् ।
अपत्येषु वसेन्नित्यं ममत्वं यत्नतस्त्यजेत् ॥
नान्यस्यगृहे मुञ्जीत भुञ्जानोदोषभाग्भवेत् ।
कामं क्रोधं च लोभञ्च तथेर्ष्यां सत्यमेव च ॥
कुटीचकस्त्यजेत्सर्वं पुत्रार्थं चैव सर्वतः ।
भिक्षाटनादिकेऽशक्तो यतिः पुत्रेषु संन्यसेत् ॥

'कुटीचक इति ज्ञेयः परिव्राट्त्यक्तबन्धवः' निर्णयसिन्धुतृतीयपरिच्छेदेऽपि-

'कुटीचकः कुटीं कारयित्वा तत्र वसन् कषायवासाः शिखोपवीतत्रिदण्ड वान् स्वगृहे भूञ्जान आत्मज्ञोभवेत्'

कुटीचक संन्यासी शिखा एवं यज्ञोपवीत धारण करते हैं, वे दण्ड कमण्डलु कौपीन एवं कन्था (एक प्रकार का वस्त्र) धारण करते हैं। माता पिता एवं गुरु की आराधना में तत्पर होते हैं। पिठर (पात्र विशेष) खनती तथा थैला आदि से युक्त होकर यात्रा करते हैं। तथा सतत मन्त्र साधना में अपने आपको समर्पित किए रहते हैं। उन्हें एक स्थान पर ही भोजन करने का विधान है। कुटीचक संन्यासी ऊर्ध्वपुण्ड्र धारण करते हैं, तथा ये त्रिदण्ड धारण करते हैं।

कुटीचक संन्यासी समस्त सुखों को त्यागकर पुत्र के समृद्धि सुख को भी छोड़ दें। अपने पुत्रों के साथ प्रतिदिन रहते हुए भी मोह ममता से अपने आपको सतत

Scanned by CamScanner ankurnagpal108@gmail.com

पृथक् कर दे। दूसरे के घर में भोजन करने से दोष की प्राप्ति होती है इस कारण किसी अन्य व्यक्ति के घर में भोजन नहीं करें। कुटीचक संन्यासी काम, क्रोध, ईर्ष्या, मिथ्या आदि को छोड दें। उक्त संन्यासी सम्पूर्ण वस्तु पुत्र के लिए त्याग दें। कुटीचक संन्यासी को भिक्षाटनादि में जब अशक्त हो जाए तो उसे स्वशरीर को भी पुत्र को ही समर्पित कर देना चाहिए। इन सभी गुणों से युक्त होकर उपर्युक्त विधान से नियमपूर्वक जो कार्य करता है वह कुटीचक कहलाता है।

निर्णयसिन्धु के तृतीय परिच्छेद में कहा गया है कि-कुटीचक संन्यासी कुटी का निर्माण करवाकर उसमें निवास करे तथा काषाय वस्त्र, शिखा शुक्ल यज्ञोपवीत एवं त्रिदण्डी वने रहे साथ-साथ स्वगृह में भोजन करे और आत्मज्ञान को बढावें।

卐 बहूदक 卐

अथ बहूदको नाम त्रिदण्डकमण्डलुशिखायज्ञोपवीतकाषायवस्त्रधारिणो ब्रह्मर्षि गृहे मधुमांसं वर्जयित्वाष्टौ ग्रासान्भैक्षाचरणं कृत्वा योगमार्गे मोक्षमेव प्रार्थयन्ते। इति भिक्षुकोपनिषद्।

त्रिदण्डं कुण्डिकाश्चैव भिक्षाधारं तथैव च।

सूत्रं तथैव गृह्णीयान्नित्यमेव बहूदकः। इति लघुविष्णुस्मृतौ।

प्राणायामेऽप्यभिरतो गायत्रीं सततं जपेत्।

विश्वरूपं ह्यदिध्यायन्नयेत्कालं जितेन्द्रियः॥

बहूदक संन्यासी त्रिदण्ड, कमण्डलु शिखा, शुक्ल यज्ञोपवीत, काषाय वस्त्र से युक्त रहते हैं। मादक वस्तुओं और मांसादि हेय वस्तुओं को छोडकर ब्रह्मर्षि के घर में मात्र आठ ग्रास भिक्षा की याचना करते हुए योगमार्ग में जो स्थित मोक्ष है, उस मोक्ष की ही कामना करते रहते हैं। लघुविष्णु स्मृति में भी विवेचना किया गया है कि बहूदक संन्यासी त्रिदण्ड, कुण्डी, भिक्षापात्र एवं शुक्ल यज्ञोपवीत को सदा धारण करें। सतत प्राणायाम करते हुये गायत्री मन्त्र का भी जप किया करे। इसप्रकार बहूदक संन्यासी के लिए नियम विवेचित है।

卐 हंस 卐

'अथ हंसोनाम ग्राम एकरात्रं नगरे पञ्चरात्रं तदुपरि न वसेयुः। गो मूत्र

Scanned by CamScanner ankurnagpal108@gmail.com

गोमयाहारिणो नित्यं चान्द्रायणयोगमार्गे मोक्षमेव प्रार्थयन्ते' इति भिक्षुकोप निषद् ।

'त्यक्त्वा पुत्रादिकं सर्वं योगमार्गं व्यवस्थितः ।
इन्द्रियाणि मनश्चैव कर्षन्हंसोऽभिधीयते' इति लघुविष्णुस्मृतौ-
कच्छैश्चान्द्रायणैश्चैव तुलापुरुषसंज्ञकैः ।
अन्यैश्च शोषयेद्देहमाकांक्षन् ब्रह्मणः परम् ॥
यज्ञोपवीतं दण्डं च वस्त्रं जन्तुनिवारणम् ।
अयं परिग्रहो नान्यो हंसस्य श्रुतिवेदिनः ॥

हंस संन्यासी बहूदक संन्यासी के समान ही बाह्य वस्तु को धारण करते हुये ग्राम में एक रात्री निवास करे । नगर में पांच रात्री पर्यन्त एवं क्षेत्र में सप्तरात्रि पर्यन्त निवास करे । हंस संन्यासी समय समय पर पञ्चगव्य भक्षण करते हुये साथ-साथ चान्द्रायण व्रत करते हुए सदा योग मार्ग में स्थित मोक्ष की ही अभिलाषा करते हैं। लघुविष्णुस्मृति में कहा गया है कि हंस संन्यासी पुत्रादि को छोडकर योग मार्ग में व्यवस्थित होकर मन तथा इन्द्रिय को जो नियन्त्रण में रखे उसे ही हंस संन्यासी कहते हैं । इन संन्यासियों को कृच्छ चान्द्रायण तुलापुरुष आदि अन्य व्रतों से भी ब्रह्मपद की ही कामना करते रहना चाहिये । इन सभी व्रतों में लिप्त होते हुये शरीर के ममत्व को त्यागकर शरीर सुखा दें । हंस संन्यासी के लिये यज्ञोपवीत, दण्ड, मक्खी आदि जीवों के निवारण के लिए वस्त्र तथा वेद ज्ञाता, ही हंस संन्यासी उपयुक्त है। इससे पृथक् कुछ नहीं । इसप्रकार हंस संन्यासी के लिए उपर्युक्त नियम कहा गया है ।

卐 परमहंस 卐

'अथ परमहंसो नाम संवर्त्तकारुणिश्वेतकेतुजडभरतदत्तात्रेयशुकवामदेव हारीतकप्रभृतयोष्टौ ग्रासांश्चरन्तौ योगमार्गे मोक्षमेव प्रार्थयन्ते' इति भिक्षुकोप-निषद् ।

'आध्यात्मिकं ब्रह्मजपन् प्राणायामास्तथापरान् ।
वियुक्ता सर्वसंगेभ्यो योगिनित्यं चरेन्महीम्' इति लघुविष्णुस्मृतौ ।
आत्मनिष्ठः स्वयं युक्तस्त्यक्तसर्वपरिग्रहः ।

Scanned by CamScanner ankurnagpal108@gmail.com

चतुर्थोऽयं महानेषा ध्यानभिक्षुरुदाहृतः ॥
क्लृप्तकेशनखमश्रुः पात्रीदण्डी कुसुम्भवान् ।
विचरेन्नियतोनित्यं सर्वभूतान्यपीडयन् ॥' इति मनुस्मृतौ ।
'सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ।
एकारामः परिव्रज्यभिक्षार्थी ग्राममाश्रयेत् ॥'
इति याज्ञवल्क्यस्मृतौ यतिधर्मप्रकरणे ।
'चतुर्थाभिक्षवः प्रोक्ताः सर्वे चैव त्रिदण्डिनः'

अत्रेर्वाक्यम् ।

परमहंस संन्यासी भी बाह्यवस्तु बहूदक संन्यासी के सदृश धारण करते हुये ब्रह्मर्षि के घर में सात्विक आठ ग्रास ही भोजन करते हैं तथा योगमार्ग में अपने आपको स्थित करके मोक्ष की ही प्रार्थना करते रहते हैं । वे संवर्त्तक, आरुणि, श्वेत केतु, जडभरत, दत्तात्रेय, शुकदेव, वामदेव हारीत आदि इन परम्परा के ब्रह्मर्षि हैं।

परमहंस संन्यासी उसे कहते हैं जो आध्यात्मिक चिन्तन करते हुए ब्रह्म को जपते हुए प्राणायाम करते रहते हैं । गोष्ठी से रहित होकर सदा इस भूमण्डल पर पर्यटन करते हैं । आत्मनिष्ठ होकर जिसने पुत्र की अभिलाषा, धन की कामना तथा लोक की इच्छा को त्यागकर दिया है उतना ही नहीं सभी परिग्रहों को भी अपने से बहुत दूर हटा दिया है उसीको ध्यान भिक्षु परमहंस संन्यासी कहते हैं । वहीं सर्वश्रेष्ठ है । महर्षि मनु ने अपने स्वरचित ग्रन्थ मनुस्मृति में कहा है कि परमहंस संन्यासी को दीक्षाग्रहण से पूर्व शिखा छोडकर केश, नख, दाडी, मूँछ को कटवाकर त्रिदण्ड कमण्डलु काषाय वस्त्र धारण करना चाहिये । इन संन्यासियों को किसी भी प्राणियों को पीडा न देना चाहिये तथा सदा भ्रमण करना चाहिये ।

याज्ञवल्क्य स्मृति के यतिधर्म प्रकरण में भी कहा गया है कि परमहंस संन्यासी को सभी जीवों का हित करना चाहिये । त्रिदण्ड और कमण्डलु धारण करते हुए सभी को त्यागकर भिक्षा के लिए ग्राम में प्रस्थान करना चाहिए । यहां पर खयाल रहे आनन्दभाष्यकारजी प्रथम मन्त्र में लिखित श्रीशुकदेवजी के परम्परा के हैं क्योंकि श्रीशुकदेवजी श्रीसम्प्रदाय के ८वें आचार्य हैं श्रीआनन्दभाष्यकारजी उसी अक्षुण्ण परम्परा के २२वें आचार्य हैं ।

Scanned by CamScanner ankurnagpal108@gmail.com

चारों प्रकार के संन्यासियों के लिए बाह्य वस्तु समान ही है। उपर्युक्त चारों प्रकार के संन्यासी त्रिदण्डी तथा काषाय वस्त्रधारी होते हैं।

इन सभी प्रकार के संन्यासियों के हित श्रीवैष्णवीय विरक्त संन्यास दीक्षा से पूर्व वपन का विधान शास्त्रों में है। श्रीवैष्णव संन्यास दीक्षा से दीक्षित होने के बाद की व्यवस्था नारदपरिव्राजकोपनिषद् के ७ सातवें उपदेश प्रसङ्ग में निम्न वाक्य उपलब्ध होता है-

'कुटीचकस्य ऋतुक्षौरं ऋतुद्वयक्षौरं बहूदकस्य हंसस्य परमहंसस्य च न क्षौरम्' इन उपदेश आदेश वाक्यों से यह स्पष्ट होता है कि कुटीचक संन्यासियों को ऋतु अर्थात् दो माह में क्षौर करना चाहिए। बहूदक संन्यासियों को ऋतुद्वय अर्थात् चार माह में क्षौर कराना चाहिए। हंस और परमहंस संन्यासियों को क्षौर नहीं करना चाहिए। तो प्रस्थानत्रयानन्दभाष्यकार जगद्गुरु श्रीरामानन्दाचार्यजी का सम्प्रति आचार्यपीठों में प्रतिष्ठित श्रीविग्रह एवं प्रायः सभी श्रीरामानन्दीय स्थानों में दृश्यमान मुण्डित श्रीविग्रह एवं जगद्गुरु श्रीरामानन्दाचार्यपीठ अहमदाबाद एवं वि श्रामद्वारका से विसद् रूप से प्रचारित एवं प्रसारित दिव्य श्रीविग्रह श्रीभाष्यकारजी का सार्वभौम आचार्यपदाभिषेक प्रसङ्ग १३९५ का है तब का शास्त्रीय विधानानुसार वपन कालिक का दिव्य दृश्य है। स्मरण रहे आचार्यजी का अवतार १३५६ में हुआ विरक्त श्रीवैष्णवीय संन्यास दीक्षा १३८१ में आचार्यपदाभिषेक १३९५ में सदेह परधाम श्रीसाकेत गमन १५३२ में वही श्रीविग्रह समस्त श्रीरामानन्दीय विरक्त या गृहस्थों में प्रचलित है। पञ्चकेश वाला आचार्यश्री का श्रीविग्रह उपर्युक्त उपनिषद् वाक्य के सामञ्जस्य से प्रामाणिक है। क्योंकि आनन्दभाष्यकारजी की स्थिति परम हंस श्रीवैष्णव संन्यासी में है। अतः श्रीरामानन्दीय श्रीवैष्णव का एक वर्ग तपसियों में पूजित एवं आराधित आचार्यश्री के श्रीविग्रह को अशास्त्रीय नहीं कहा जा सकता है।

जटाजिनधराः काले वल्कलोत्तरवाससः।
ऋषयस्त्ववगाहन्ते नदीं मन्दाकिनीं प्रिये॥ (श्रीमद्रामायण अयो. ९५।६)

मर्यादापुरुषोत्तम सर्वेश्वर श्रीरामजी का सर्वेश्वरी श्रीसीताजी के प्रति मन्दाकिनी की शोभा वर्णन प्रसङ्ग में महर्षि श्रीवाल्मीकिजी द्वारा श्रीमद्रामायण २।९५।६ में प्रयुक्त

Scanned by CamScanner
ankurnagpal108@gmail.com

दह श्लोक है। प्रकृत श्लोक में ऋषयः बहुवचन का प्रयोग कर तपश्चर्या या आराधन में पारायण साधक ऋषि, मुनि लोग जटा एवं अजिन, मृग चर्म को धारण करते थे। एवं वल्कल (वृक्ष के खाल से बना वस्त्र) उत्तरीय के रूपमें धारण करते थे इससे यह स्पष्ट है तप परायण साधक जटा धारण करते थे। वह शास्त्र सम्मत है। वही परम्परा अभी भी श्रीरामानन्दसम्प्रदाय के तपसिवर्गों में प्रचलित है।

पञ्चकेशधराश्चाध्याः शिखिनो वा जटाधराः।
काषायाम्बरश्वेतादिहरिन्नीलं विनाम्बराः॥

श्रीवशिष्ठसंहिता आश्रमधर्म निरूपण प्रसङ्ग के ३२वें श्लोक में '**जटाधराः**' शब्द का प्रयोग है। अतः वेद, स्मृति, श्रीमद्रामायण, प्रभृति सद्ग्रन्थों से जटाधारण अनुमोदित है। अतः श्रीसम्प्रदायीय प्रचलित व्यवहार शास्त्रसम्मत एवं उपयुक्त है। इस प्रकृत विषय में क्षोदक्षेम करनेवाले की बुद्धि गहन शास्त्राभ्यास से बाह्य है यह स्पष्ट है।

शास्त्रों में यह विवेक उपलब्ध होता है कि संन्यास आश्रम में प्रवेश ब्रह्म चर्याश्रम से सीधे भी होता है यदि उत्कट वैराग्य हो तो-

'यदहरेवविरजेत् तदहरेवपरिव्रजेत्'

इसी वैदिक नियमानुसार श्रीआनन्दभाष्यकारजी ने ब्रह्मचर्याश्रम से ही संन्यास आश्रम में प्रवेश लिये थे। ब्रह्मचर्याश्रम में भी उपनयन संस्कार से पूर्व वपन कराने का विधान है। ब्रह्मचर्य पालनपूर्वक गुरु आश्रम में अध्ययन निवास काल में वपन का विधान नहीं है। यह ब्रह्मा, इन्द्र, एवं विरोचन के तत्व ज्ञान प्राप्ति सम्बन्धि छान्दोग्योपनिषद् के संवाद एवं स्मृति शास्त्रों से भी सम्बद्ध होने से प्रमाण की अपेक्षा नहीं रखता है। ब्रह्मचर्य के वाद गृहस्थाश्रम में प्रवेश कर उस धर्म का पालन के वाद वानप्रस्थ प्रवेश किए विना ही संन्यस्त आश्रम में प्रवेश का भी विधान उपलब्ध होता है। सम्प्रति श्रीरामानन्दीय श्रीवैष्णवीय समाज में उक्तकोटी के अनेक श्रीवैष्णव संन्यासी उपलब्ध होते हैं।

क्रमशः गृहस्थ आश्रम के वाद वानप्रस्थ आश्रम में प्रवेश कर यथानियम तुरियाश्रम अर्थात् संन्यास आश्रम में प्रवेश का विधान है। वानप्रस्थ आश्रम काल में वपन का विधान उपलब्ध नहीं होता है। गृहस्थाश्रम सेवियों को वैकल्पिक

Scanned by CamScanner ankurnagpal108@gmail.com

व्यवस्था है। मुण्डन भी करा सकते हैं पञ्चकेश भी रख सकते हैं। जो सम्प्रति समाज में यत्र तत्र दृष्टिगोचर हो रहा है।

विरक्ताश्रम किंवा तुरियाश्रम श्रीरामानन्दीय आचार्यपरम्परा में भद्र-मुण्डित एवं पञ्चकेश जटाधारी दोनों ही स्वरूपों का दर्शन आचार्य परम्परा चित्रावली में होता है। श्रीरामानन्दीय द्वाराचार्यों का भी दोनों स्वरूपों का दर्शन होता है द्वाराचार्य चित्रावली में। सर्वेक्षण से स्पष्ट विदित हो जाता है श्रीरामानन्दसम्प्रदाय में नियमित अक्षुण्ण परम्परागत चालीस आचार्य हो चुके हैं इकतालीसवें वर्तमान में आचार्य पदासीन हैं उनमें १, २, ३, ४, ५, ६, ७वें पञ्चकेशवाले हैं ८, ९, १०वें भद्र हैं ११, १२, १३वें पञ्चकेश जटावाले हैं १४वें भद्र हैं १५, १६वें पञ्चकेश जटा जुटवाले हैं १७, १८वें भद्र हैं १९वें जटावाले हैं २०, २१, २२, २३वें भद्र हैं २४ वें पञ्चकेशवाले हैं २५वें भद्र हैं २६, २७वें पञ्चकेशवाले हैं २८वें भद्र हैं २९वें पञ्चकेशवाले हैं ३०, ३१वें भद्र हैं ३२, ३३, ३४वें पञ्चकेशवाले हैं ३५वें भद्र हैं ३६वें पञ्चकेशवाले हैं ३७, ३८, ३९वें भद्र हैं ४०, ४१वें पञ्चकेशवाले हैं यों २३ पञ्चकेशवाले तथा १८ भद्र हैं।

श्रीरामानन्दीय ३६ द्वाराचार्यों में १, ३, ६, १९, २१, २६, २८, ३१वें यों आठ भद्र रूपमें हैं २, ४, ५, ७, ८, ९, १०, ११, १२, १३, १४, १५, १६, १७, १८, १९, २०, २२, २३, २४, २५, २७, २९, ३०, ३२, ३३, ३४, ३५, ३६वें यों २८ जटा पञ्चकेश के स्वरूप में हैं। आनन्दभाष्यकारजी के शिष्य जो द्वाराचार्य नहीं हैं उनमें से १, २ रे भद्र स्वरूप में हैं ३, ४ थे पञ्चकेश के स्वरूप मे।

श्रीरामानन्दसम्प्रदाय वैखानस पद्धति मूलक है अतः तपः प्रधानक एवं उसी प्रकार से सेवा पूजा आराधना परक था एवं अभी है इसलिये आचार्यों का स्वरूप भद्र-मुण्डित पञ्चकेश जटाजुट सभी स्वरूप समान रूपसे पूजनीय हैं ॥८॥

卐 अथाष्टमं कालक्षेपप्रकरणम् 卐

कार्यो महात्मभिर्नित्यं कालक्षेपो मुमुक्षुभिः ।
परमात्मपरैरित्थं वैष्णवैरिति वर्ण्यते ॥१॥

ननु यथोक्तलक्षणसम्पन्नः श्रीवैष्णवः केन प्रकारेण कालयापनं कुर्वीत इति जिज्ञासायां तादृशप्रश्नस्योत्तररूपमष्टमं कालक्षेपनिरूपणमारभमाण आह-

Scanned by CamScanner ankurnagpal108@gmail.com

'कार्यो महात्मभिर्नित्यं कालक्षेप' **इत्यादि । अथ लक्षणनिरूपणानन्तरम् पर मात्मपरैः श्रीसातारामसेवापरायणैस्तत्र व्यापृतमनोवाक्कायैर्मुमुक्षुभिर्मोक्षका मुकैर्महात्मभिः संयतबाह्याभ्यन्तरेन्द्रियैः श्रीवैष्णवैर्महाभागवतैरित्थं वक्ष्यमाण प्रकारेण नित्यं कालक्षेपः कार्यः इति वर्ण्यते हे सुरसुरानन्द ! तं त्वमवधार-येति ॥१॥**

अथ महाभागवत श्रीवैष्णवों का लक्षण स्वरूप और माहात्म्य कथन के अनन्तर यथोक्त महात्मा किस तरह से समय यापन करें ? इस बात को बतलाने के लिए कहते हैं-'**कार्योमहात्मभिरि**' त्यादि । हे सुरसुरानन्द ! सर्वदा परमात्मा श्रीरामजी की सेवा में तत्पर मोक्ष चाहनेवाले महात्मा श्रीवैष्णवगण इस तरह अर्थात् वक्ष्यमाण प्रकार से कालक्षेप अर्थात् कालयापन करें । वह प्रकार मैं तुमको कहता हूँ सावधान होकर के सुनो ॥१॥

प्रातर्मध्याह्नसायं कृतशुचिकृतिभिः राममभ्यर्च्यसम्यक्
श्रीमद्रामायणेन प्रतिदिनमखिलैर्भारतेन प्रपन्नैः ।
शक्तैरानन्दभाष्यैरथ च शुभतमाचार्यदिव्यप्रबन्धैः
कालक्षेपो विधेयः सुविजितकरणैः स्वाकृतेर्यावदन्तम् ॥२॥

तदेवाह-'प्रातर्मध्याह्न' इत्यादि । सुविजितकरणैःस्वायत्तीकृतबाह्याभ्यन्तरेन्द्रि यैः प्रपन्नैः श्रीवैष्णवैः प्रातर्मध्याह्नसायं प्रातःकाले मध्याह्नसमये सायंकाले च कृतशुचिकृतिभिः कृतस्नानादिक्रियावद्भिः शारीरिकबलयुक्तैश्च प्रपन्नैः अखि लैः सर्वेश्वरश्रीरामशरणागतैः प्रतिदिनं यथा भवेत् तथा श्रीरामं भगवन्तं श्रीसी तानाथम्, सम्यक् समीचीनरूपेणाभ्यर्च्य पूजादिकं कृत्वा, श्रीवाल्मीकीयश्री मद्रामायणेन भारतेन महाभारतप्रबन्धेन शक्तैः वेदवेदाङ्गज्ञानसम्पन्नैः आनन्द भाष्यैः प्रस्थानत्रयानन्दभाष्यैः तथाशुभतमाचार्यदिव्यप्रबन्धैः महर्षिश्रीवशिष्ठ महर्षिश्रीपुरुषोत्तमाचार्यप्रभृतिपूर्वाचार्यसम्पादितानेकोत्कृष्टतात्विकप्रबन्धैः भग वत्गीतापारायणेन कालक्षेपः कालयापनं कर्तव्यः । अर्थात् श्रीमद्रामायणादि-पुस्तकपारायणेन रात्रिं दिवं यापनीयं श्रीवैष्णवैरिति । कियत्पर्यन्तमयमनुसरणी यस्तत्राह-'स्वाकृतेरित्यादि यावत् स्वकृतकर्मफलभोगाय प्राप्तस्वशरीरस्यावसानं

Scanned by CamScanner ankurnagpal108@gmail.com

न भवेत् । अर्थात् यावज्जीवनमेतत्कुर्वन् समयो नेतव्यः श्रीवैष्णवमहाभागव तैरितिभावः ॥२॥

बाह्याभ्यन्तर इन्द्रिय के ऊपर जय रखनेवाला तथा वेदशास्त्र के ज्ञान से और शारीरिकबल सम्पन्न शरणागत श्रीवैष्णव प्रातःकाल मध्याह्नकाल और सायंकाल में सौच स्नानादि नित्य क्रिया से निवृत्त होकर प्रतिदिन भगवान् श्रीरामचन्द्रजी का षोडशोपचार के द्वारा पूजन करके श्रीमद्रामायण महाभारत भागवतादि ग्रन्थों का तथा प्रस्थानत्रयानन्दभाष्य और पूर्वाचार्य महर्षि श्रीवशिष्ठ महर्षि श्रीपुरुषोत्तमाचार्य प्रभृतिक महामुनि निर्मित दिव्य स्तोत्रादि के पाठ-पारायण द्वारा यावत्जीवन समय का क्षेप करें ॥२॥

स्नानादिकर्माणि विधाय नित्यं ग्रन्थानमून् संश्रृणुयादशक्तः ।
श्रीरामसन्नामसुकीर्तनं च द्वयानुसन्धानमथो विदध्यात् ॥३॥

शरीरस्य वार्द्धक्यात्कारणान्तराद्वा स्वयं श्रीमद्रामायणानन्दभाष्यादिग्रन्थानां पाठकरणे अशक्तः स्सामर्थ्यरहितः अर्थात् शारीरिकादिबलरहितः श्रीवैष्णवः यथा साध्यं स्नानादिकनित्यकर्माणि यथा समयं कृत्वा भगवन्तं च श्रीसीतापतिं यथालाभोपचारैः सम्यक् प्रपूज्य पूजां विधाय नित्यं प्रतिदिनममून् श्रीमद्रामायणानन्दभाष्यादिग्रन्थान् श्रीवैष्णवान्तरैः परिपठ्यमानान्नशक्तः श्रीवैष्णवः संश्रृणुयात् अर्थात् स्वयं पाठकरणेऽशक्तः परद्वारा पारणादिकं कारयित्वा भक्त्या श्रृणुयात् श्रवणमेव कुर्यात् । तदभावे स्वयमेवोपविश्य भगवतो रामचन्द्रस्य जगत्परमकारणस्य श्रीराम रामेति समीचीनसर्वश्रेष्ठनाम्न एव यथासाध्यं कीर्तनं विदध्यादर्थात् नामकीर्तनमेव कुर्यात् । तत्राप्यशक्तः अर्थात् नामकीर्तनकरणेऽपि असमर्थः श्रीरामद्वयमन्त्रस्य 'श्रीमद्रामचन्द्रचरणौ शरणं प्रपद्ये श्रीमते राम चन्द्राय नमः' इत्याकारस्य जपमात्रं कुर्यात् । तत्राप्यशक्तः द्वयमन्त्रस्यार्थानुसन्धानमेव कुर्यादिति ॥३॥

यदि भागवत श्रीवैष्णव शरीर के वृद्धत्व अथवा रोगादि कारणों से श्रीमद्रामायण भागवत आनन्दभाष्यादिक ग्रन्थरत्नों का स्वयं पारायण करने में अशक्त हो जाय तो विद्वान् श्रीवैष्णवों के द्वारा उपर्युक्त ग्रन्थों का पारायण करा करके प्रतिदिन उन ग्रन्थों का श्रवण करें । नित्य स्नानादिक क्रिया करके विधिपूर्वक भगवान् श्रीरामजी का यथा

Scanned by CamScanner
ankurnagpal108@gmail.com

मिलितोपचार से पूजन करके कथा का श्रवण करें। भगवान् की समीचीन कथाओं का कीर्तन करें। यदि स्वयं कीर्तन करने में भी अशक्त हो जाय अथवा मठ सम्बन्धी कार्यान्तर में अस्तव्यस्त रहें तो श्रीरामद्वय मन्त्र का जो अर्थ है उसका मन से ही अनुसन्धान स्मरण करें। अर्थात् समर्थ श्रीवैष्णव पूजनादि करके यथाकाल में स्वयं इन ग्रन्थों का पारायण करें यह प्रथम विधि है। स्वयं पारायणाभाव में अन्य द्वारा पारायण कराके उसका श्रवण करें। तदभाव में भगवान् के नाम का कीर्तन करें तदभाव में द्वयादि विशिष्ट मन्त्रार्थ का मन से ही अनुचिन्तन कर कालयापन करें ॥३॥

दिव्येषु देशेषु सतां प्रसङ्गं तदीयकैङ्कर्यपरायणः सन् ।
यावच्छरीरान्तमहर्दिवं तत् कथामुदारां शृणुयाद् भवघ्नीम् ॥४॥

अथ दिव्येषु श्रीरामभक्तिसम्पादकश्रीरामपदप्रचरिततयापुण्योत्पादकदेशेषु श्रीअयोध्याचित्रकूटपञ्चवटीप्रभृतिकपावनेषु यावत् शरीरान्तं मरणपर्यन्तं वासं कुर्वन् अहर्दिवमनिशं यथाभवेत्तथा सतां भागवतानां चिदचिदादितत्वत्रयविदुषां सङ्गं मोक्षसाधकसहवासं कुर्वन् सम्पादयन्नित्यर्थः । तदीयकैङ्कर्यपरायणः भागवतश्रीवैष्णवाचार्यस्य कैङ्कर्यं सेवा तत्परायणश्रीवैष्णवजनः अहर्दिवं उदारां चतुर्वर्गफलसम्पादिकां भवघ्नीं भवति समुत्पद्यते पुण्यापुण्यनिचयो यत्र स भवः संसारः तादृशसंसारविनाशिनीं तत्कथां तस्य भगवतो रामचन्द्रस्य कथां श्रीमद्रामायणादिचरित्रचित्रणरूपां श्रृणुयात् । अर्थात् यथोक्तप्रदेशे निवसन् श्रीवैष्णवजनसङ्गं कुर्वन् भगवतो रामचन्द्रस्य पापविनाशिनीं कथां वेदरहस्य श्रीमद्रामायणप्रभृतिकां प्रतिदिनं श्रृणुयात् तच्छ्रवणं कार्यमिति विधिः ॥४॥

भगवान् श्रीरामजी भागवत तथा आचार्य प्रभृतिक श्रीवैष्णवों के कैङ्कर्य-सेवा में निष्ठा रखनेवाले तदीय सेवा श्रद्धाशील श्रीवैष्णवगण दिव्य प्रदेश-अयोध्याजी, चित्र कूट, पञ्चवटी और जनकपुर प्रभृतिक भक्ति पोषक प्रदेशों में जीवन पर्यन्त अर्थात् यावत्पर्यन्त इस पाँच भौतिक नश्वर शरीर का पतन न हो तावत् इन प्रदेशों में निवास करते हुए तथा चिदचिदीश्वर रूप प्रधानतत्वत्रय के सपरिकर ज्ञानवान् विद्वानों का सहवास कहते हुए प्रतिदिन धर्म अर्थ काम और मोक्ष रूप फल को देनेवाली भक्ति को सिञ्चित करनेवाली अति उदार भगवान् श्रीरामजी की श्रीमद्रामायण आनन्दभाष्यादिक कथा का श्रवण करें। जो यह भगवान् की कथा अनेक जन्मोपार्जित संसार

Scanned by CamScanner ankurnagpal108@gmail.com

परम्परा है उस संसार का विनाश करनेवाली है अतः कथा का श्रवण करें ॥४॥

तत्राप्यशक्ता स्तु कुटीरमात्रं विधाय कुर्युस्त्वथ राघवाद्रौ ।
अन्यत्रवासं च गुरूपदिष्टान् मन्त्राञ्जपन्तो ह्यभिमानशून्याः ॥५॥

तत्र पूर्वकथितश्रीमद्रामायणभागवतानन्दभाष्यादिग्रन्थानां पारायणादिषु तथा चार्यादीनां सेवासु अशक्ताः सर्वथा शारीरिकसामर्थ्यरहिताः श्रीवैष्णवाः अभिमानशून्या अहङ्काररहितासन् स्वगुरूपदिष्टान् स्वकीयाचार्यतः प्राप्ततारकादि-मन्त्रान् जपन्तस्तन्मन्त्रस्य जापं कुर्वन्तः । राघवाद्रौ श्रीरामपर्वते चित्रकूटे कुटीर मात्रं ह्रस्वांकुटीं विधाय निवासं कुर्युः । अथवा तदन्यत्र प्रशस्ततीर्थे जनकपुर धामादिषु वासं कुर्वन्तु इतिसारः ॥५॥

आनन्दभाष्य श्रीमद्रामायण भागवतादि ग्रन्थों का स्वयं प्रतिदिन पारायण करने में असमर्थ श्रीवैष्णव महात्मागण राघवाद्रि चित्रकूट पर्वत पर अथवा श्रीअयोध्याजी जनकपुरधाम वगैरह प्रदेशों में छोटीसी कुटिया बना करके (कुटीर-झोंपड़ा) अभिमान शून्य होकर के आचार्य-गुरु के द्वारा उपदिष्ट जो तारकादि मन्त्रराज हैं उनका जप करता हुआ पुण्यक्षेत्र में निवास करें । जीवनपर्यन्त पुण्यक्षेत्र में वास करता हुआ जप करे ॥५॥

भक्त्यादियुक्तस्य तथाऽनहङ्कृतेर्महात्मनस्तस्य निदेशपालनम् ।
उपायमेनं चरमं निरन्तरं सुवैष्णवोऽयं विदधात्वतन्द्रितः ॥६॥

अनहङ्कृतेः सर्वथाहङ्कारपरिवर्जितस्य तथा भक्त्यादियुक्तस्य कर्मयोगज्ञान योगादिप्रकृष्टमोक्षसाधनयुक्तस्य तथा श्रीमद्रामायणानन्दभाष्यादिपारायणयुक्त स्य तादृशमहात्मनः श्रीवैष्णवस्य निदेशपालनमाज्ञापालनम् एनमेतादृशं चरममु पायं साधनं मुमुक्षुः सुवैष्णवः श्रीवैष्णवः अतन्द्रितः तन्द्रयाऽऽलस्येन सर्वथा रहितो निरन्तरं सर्वदा विदधातु करोतु इति ॥६॥

ज्ञानयोग, कर्मयोग तथा भक्तियोग रूप मोक्ष का अति महत्वास्पद साधनों से युक्त सर्वथा अहङ्कार-अभिमान विवर्जित जो महाभागवत श्रीवैष्णव हैं उनका जो उपदेश जिस अधिकारी के लिए जैसा कहा गया है उस आज्ञा का पालन आलस्य रहित होकर के करना चाहिए । इस अन्तिम उपाय-साधन को निरालसी मोक्षेच्छु

Scanned by CamScanner
ankurnagpal108@gmail.com

श्रीवैष्णव निरन्तर पालन करें ॥६॥

तदर्थपुष्पप्रचयेन सन्ततं तथैव तन्मन्दिरमार्जनादिना ।
~~तदीयनामाभ्यसनेन तन्मनाः~~ क्षिपेत्स कालं नितरां गतालसः ॥७॥

तदर्थपुष्पप्रचयेन तस्य भगवतो रामस्यार्थं प्रयोजनाय पुष्पप्रचयेन संग्रहेण सततं निरन्तरम् । अत्र पुष्पपदं तुलस्यादीनामपि सङ्ग्राहकम् ततश्च श्रीरामस्य पूजनार्थं पुष्पतुलस्यादीनां सञ्चयः कर्त्तव्यः, वनादुपवनाद्वापुष्पादिकमानीय तस्य पूजनं विधेयम् । तथैव तेनैव प्रकारेण मन्दिरस्यमठस्य मार्जनादिकं कर्तव्यम् । तथा तस्य यन्नाम तस्य सततं अभ्यसनं पुनः पुनरावर्तनं कर्तव्यम् । एतेषु पुष्प चयनमन्दिरमार्जनतन्नामभ्यसनेषु तदन्यद्वा तदुपयोगिकार्यं कुर्वन् सर्वदा आलस्य रहितः तन्मनाः श्रीवैष्णवः कालं समयं क्षिपेदतिवाहयेदित्युपदेशः ॥७॥

मोक्ष कामनावान् श्रीवैष्णवगण सर्वदा आलस्य वर्जित होकर के भगवान् श्रीराम जी के पूजन निमित फूल तुलसी प्रभृतिक पूजोपकरण का संग्रह करते हुए । तथा मन्दिर भगवान् के आलय को संमार्जित करता हुआ । एवं भगवान् श्रीरामजी के श्रीराम जय राम जय जय राम इत्यादि नाम का सर्वदा रटन करते हुए अहोरात्रात्मक काल का क्षेप करे ॥७॥

तीर्थेषु वासेन सतां महात्मानां समागमेनाथ तदर्चनेन ।
जिज्ञासया तद्यशसः श्रवेण तच्छ्रावणेन स्मरणेन तस्य ॥८॥

तीर्थेषु तरति संसारसागरमुत्सारयति यत्र निवासमात्रेण दर्शनावगाहनादिना सर्वपापं संसारकारणमपनयति यः स तीर्थोऽयोध्यामथुरामायाकाशीकांची अवन्तिका इत्यादिशास्त्रप्रतिपादितपवित्रस्थलेषु तीर्थविशेषेषु वासेन निवासकर णेन तथा सतां ज्ञाततत्वानां महाभागवतां समागमेन प्रत्यक्षीकृतचिदचिदीश्वर तत्वत्रयाणां श्रीवैष्णवजनानां समागमनेन तैः सह सत्सङ्गकरणेनेत्यर्थः । तदर्च नेन तस्य विदितवेदितव्यस्य श्रीवैष्णवस्यार्चनंपुष्पाक्षतमधुपर्कादिना पूजाकर णेन, जिज्ञासया परमकारणं तत्त्वं किमिति ज्ञातुमिच्छया, तद्यशसः श्रवेण तस्य जगतः परमकारणरूपस्य भगवतो रामस्य श्रीमद्रामायणादिकीर्त्तेः श्रवणेन श्रा वणप्रत्यक्षकरणेन । तत् श्रावणेन तस्य भगवद्यशसः श्रावणेन स्वयं श्रुत्वा

Scanned by CamScanner ankurnagpal108@gmail.com

स्वेतरेभ्यः तस्य प्रतिपादनेन कथनेनेति तस्य स्मरणेन अर्थात् अस्य चराचरस्य जगतो यत्परमकारणं श्रीरामस्तस्य स्मरणेन चिन्तनेन । समागतश्रीवैष्णवेभ्यो भगवतः श्रीरामस्य कीर्त्यादिश्रवणेन तथाऽन्येभ्यः श्रावणेन तदनन्तरं समाहित मनसा तस्य ध्यानकरणेन स्वकीयं रात्रिदिवात्मकं कालं महाभागवतश्रीवैष्णं वोऽतिवाहयेदितिभावः ॥८॥

पूर्वकथित अयोध्याधाम जनकपुरधाम काशी चित्रकूट मथुरा प्रभृतिक पवित्र तीर्थ स्थानों में भगवान् श्रीरामजी का यथा मिलीतोपचार से पूजन करके निवास करने से तथा ज्ञात तत्वत्रय महात्मा श्रीवैष्णवों का आगमन से, तथा आगत तादृश महात्माओं का अर्घ्यादि प्रदान द्वारा पूजन करने से, एवं जगत् का परमकारण भगवान् श्रीरामजी के जानने की इच्छा से भगवान् की श्रीमद्रामायणादिक कथाओं का श्रवण करने से अर्थात् स्वयं समागत श्रीवैष्णवों से सुनने तथा श्रुत कथा का श्रवण दूसरे को करावें । तथा कथादि द्वारा श्रुत जो जगत्कारणभूत भगवान् श्रीरामजी हैं उनका सतत चिन्तन अनुध्यान से तीर्थवासी श्रीवैष्णव अपने काल को वितावें ॥८॥

रामस्य साङ्गस्य सपार्षदस्य सीतासमेतस्य सहानुजस्य ।
कैङ्कर्यमीर्ष्यारहितः प्रकुर्वन् क्षिपेत् स्वकालं सततं सुभक्तः ॥९॥

इत्यानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्ययतिराजप्रणीते श्रीवैष्णवमताब्जभास्करे कालक्षेपनिरूपणात्मकोष्टमप्रश्नोत्तराख्योऽष्टमः परिच्छेदः ॥८॥

ईर्ष्या परोत्कर्षाऽसहनशीलता तद्रहितः सुभक्तोज्ञाततत्वत्रयो भगवतिश्रीरामे परां भक्तिं कुर्वाणोऽनन्यभक्तः सततमहर्निशम् रात्रिन् दिवमित्यर्थः । साङ्गस्य वायुपुत्रप्रभृतिश्रीरामोपनिषत् प्रतिपादिताङ्गयुक्तस्य तथा सपार्षदस्य पार्षदेन सहितस्य स्वाभिन्नस्वरूपस्य श्रीसीतासमेतस्य जगदुत्पादकशक्तिरूपविदेहजा-युक्तस्य सहानुजस्य तत्रानुजो भरतादिस्तैर्युक्तस्य भगवतः श्रीरामचन्द्रस्य कैङ्कर्यं सेवां कुर्वन् स्वकीयं कालं क्षिपेत् । भगवत्सेवापरायणः कालमतिवाहयेदिति । श्रीरामरहस्योपनिषदिप्रतिपादितान्यन्याङ्गानि तथाहि 'वायुपुत्रेणोक्तास्ते योगीन्द्रा ऋषयोविष्णुभक्तं हनुमन्तं पप्रच्छुः रामस्याङ्गानि नो ब्रुहीति हनुमान् प्रोवाच-वायुपुत्रं विघ्नेशं वाणीं दुर्गां क्षेत्रपालकं सूर्यं चन्द्रं नारायणं नारसिंहं वासुदेवं वाराहकं तत्सर्वान् समात्रान् सीतां लक्ष्मणं शत्रुघ्नं भरतं विभीषणं सुग्रीवमङ्गदं

Scanned by CamScanner
ankurnagpal108@gmail.com

जाम्बवन्तं प्रणवमेतानि रामस्याङ्गानि जानीथाः' इति ॥९॥

उपर्युक्त तीर्थादिक स्थानों में निवास करते हुए भगवान् श्रीरामजी के सुभक्तगण ईर्ष्या रहित होकर के अङ्ग देवता पार्षद सहित श्रीसीताजी तथा भरतादिक अनुजों से युक्त भगवान् श्रीरामजी का कैङ्कर्य को करते हुए कालक्षेप करें ।

विष्णु भक्त योगीलोग तथा ऋषियों ने श्रीहनुमानजी से पूछा कि श्रीरामजी के अङ्ग देवता कितने हैं ? तथा कौन-कौन हैं ? इस प्रश्न के उत्तर में श्रीहनुमानजी ने कहा कि वायुपुत्र, विघ्नेश, वाणी, दुर्गा, क्षेत्रपाल, सूर्य, चन्द्रमा, नारायणजी, नरसिंहजी, वासुदेवजी, वराहजी स्वशक्ति सहित ये सब श्रीसीताजी, श्रीलक्ष्मणजी, श्रीभरतजी, श्रीशत्रुघ्नजी विभीषणजी सुग्रीवजी अङ्गदजी जाम्बवान्जी और प्रणव-ये सब श्रीरामजी के अङ्गदेव कहे गये हैं श्रीरामरहस्योपनिषद् में ॥९॥

卐 अथ प्राप्यनिरूपणम् 卐

तथाविधैस्तैः परमार्थभूतं सुवैष्णवैः प्राप्यमथोच्यते यत् ।
जितेन्द्रियैरात्मरतैर्बुधाग्र्यैर्महत्तमैः स्वाभिमतार्थदोहम् ॥१॥

संसारदुःखनिवृत्तिपूर्वकनित्यनिरतिशयसुखप्राप्तिलक्षणमोक्षप्रदायकं कं तद्वस्तु इति नवमप्रश्नस्योत्तरं वक्तुकाम आचार्य उपक्रमते तथाविधैस्तैः' इत्यादि हे सुरसुरानन्द ! अथ कालक्षेपप्रकारकथनानन्तरं स्वाभिमतार्थदोहम्' स्वस्याभिमतं यद्वस्तु तं दोग्धीति स्वाभिमतार्थदोहम्, अभिलषितवस्तुप्रदायकं सकलवेदान्तैकवेद्यम् परमार्थभूतं सर्वोत्कृष्टं पारमार्थिकम् जितेन्द्रियैः वशीकृतबाह्याभ्यन्तरेन्द्रियग्रामैः' आत्मरतैः आत्मनि परमात्मन्येव रतिरारामो रमणं येषां तथाविधैः बुधाग्र्यैः बुधानां विदितशास्त्रतत्वानामग्रेसरैः महत्तमैः' अतिशयितमहद्भिर्महापुरुषैस्तथाविधैः परमपुरुषस्य भक्तौ निष्णातैः तै अनन्यभक्तैः प्रपन्नैरित्यर्थः सुवैष्णवैर्वैष्णवप्रवरैः श्रीवैष्णवैः प्राप्यं यत् किमपि विलक्षणसर्वातिशायि श्रीरामात्मकं तत्त्वराजं वस्तु तन्मया कथ्यते त्वञ्च सावधानमना श्रृणु ॥१॥

अथ अष्टम कालक्षेप प्रकरण निरूपण करने के वाद मुमुक्षुओं से प्राप्य पदार्थ क्या है ? इस नवम प्रश्न का उत्तर देने के लिए आचार्य उपक्रम करते हैं **तथाविधैरित्यादि** कालक्षेपनिरूपण के वाद स्वकीय मोक्षरूप अभिमत पदार्थ को देनेवाले पारमार्थिक अर्थात् सर्वापेक्षया अत्युत्कृष्ट जितेन्द्रिय चक्षुरादि बाह्यज्ञानकरण तथा आभ्य

Scanned by CamScanner ankurnagpal108@gmail.com

न्तर मन को अपने अधिकार में रखनेवाले मननशील पण्डितों में अग्रसर सर्वश्रेष्ठ तथा परमपुरुष परमात्मा भगवान् श्रीरामजी की भक्ति में श्रद्धा विश्वास रखनेवाले महा भागवत श्रीवैष्णवों से प्राप्य अर्थात् प्राप्ति करने के योग्य विलक्षण पदार्थ का मैं कथन करता हूँ। हे सुरसुरानन्द ! तुम इस बात का विश्वासपूर्वक श्रवण करो ॥१॥

श्रीमान् दिव्यगुणाब्धिरौपनिषदो हेतुः शरण्यः प्रभु
र्देवेशो जगतामनादिनिधनो ब्रह्मादिदेवार्चितः ।
तारार्कानलचन्द्रमोबहुमहः सौदामिनीभासको ऽ
जय्योवीरसपत्नशस्त्रनिचयैर्जेता च तेषां मुहुः ॥२॥
नित्यो ब्रह्मविधायकश्च पुरुषो वेदप्रदो ब्रह्मणे
नित्यानां शरणं तपः प्रभृतिभिः सद्योगिनां दुर्लभः ।
एकश्चेतनचेतनोभृतजगद्ध्येयः स्वतन्त्रोवशी
सप्राप्योस्तिमुमुक्षुभिः सुगुरुभिः सत्सङ्गिभिस्तत्परैः ॥३॥

अतः परं प्राप्यपुरुषस्वरूपमर्थापत्यादर्शयति श्लोकद्वयेन श्रीमानित्यादि । मुमुक्षुभिर्मोक्षकामैरधिकारिभिस्तथा सुगुरुभिराचार्यैः सत्सङ्गिभिर्भगवत्परायणै रन्यैरपिप्राप्योऽस्ति प्राप्यतया अभिमतो भवति । तत्र सः लोके वेदे च सर्वत्र प्रसिद्धः प्राप्यः पुरुषकीदृशस्तत्राह श्रीमानित्यादि विशेषणजातं श्रीमान् धन धान्यादिसकलप्रकारकसंपत्तिमान् यद्वा श्रीपदवाच्यस्वाभिन्नस्वरूपाश्रीसीताया नायकः सर्वप्रकारकशोभायुक्तो वा । तथा दिव्यगुणाब्धिस्तत्र दिव्यगुणानां हेय प्रत्यनीकानन्तवात्सल्यसुशीलत्वसौन्दर्यलावण्यसुवीर्यत्वसर्वज्ञत्वादि अपरि संख्येयगुणसमूहानाम् 'अब्धिः' समुद्रवत् अर्थात् यथा समुद्रेऽनन्तरत्ननिधानत्वं तथैव भगवति श्रीरामे अनन्तगुणाश्रयत्वम् 'औपनिषद उपनिषत् प्रमाणगम्य उपनिषत्स्वेवाधिगत अप्राकृतिकरूपादिमत्तयाऽनन्यभक्तव्यतिरिक्तमादृशपुरुषेण चर्मचक्षुषा ज्ञातुमशक्यतया, वेदजनितपरोक्षज्ञानविषयीभूतो भवनौपनिषद इति कथितो भवतीत्यभिप्रेत्याचार्य औपनिषद इति विशेषणं प्राप्यपुरुषेऽक्षिप दाचार्यः 'ब्रह्मसत्वे प्रमाणं च शास्त्रमेव सुनिश्चितम् । तन्त्वौपनिषदश्चैतच्छ्रुति

Scanned by CamScanner
ankurnagpal108@gmail.com

वाक्य प्रमाणतः' इतिजगद्गुरुश्रीपूर्णानन्दाचार्योक्तेः ।

तथा स प्राप्यः पुरुषः जगतां हेतुर्जगतः चराचरसर्वसंसारजातस्य कारणम् 'यतो वा इमानि भूतानि जायन्ते' 'जन्माद्यस्य यतः' इत्यादिश्रुतिसूत्राभ्याम् । एतावता अनेकश्रुतिस्मृतिपुराणसूत्रादिवर्णितजगत्कारणत्वं सर्वनायके परमपुरुषे श्रीरामे प्राप्येऽभिव्यञ्जितमाचार्येणेति ध्येयम् । तथा 'शरण्यः' सरणे साधुः शरण्यः शरणागतपालकः सकृदेव प्रपन्नायेति भगवद्वचनादिति तथा 'प्रभुः' जगत उत्पत्तिस्थितिप्रलयानामीशिता सर्वविधसामर्थ्यसंपन्नः । 'देवेशः' देवानां द्योतनात्मकतया विविधमाहात्म्ययुक्तानां चतुर्मुखादीनामपि ईशः ईशनकर्ता । 'अनादिनिधनः आदिः कारणं तद्रहितः निधनो विनाशस्तद्रहित उत्पादविनाश रहितः तत्र कारणाजन्यत्वादुत्पत्तिरहितः, अजन्यत्वाच्च विनाशरहितः, उत्पत्ति मतामेव विनाशस्यान्यत्र दर्शनात् सचोत्पादविनाशरहिततयाऽनादिनिधन इति । तथा 'ब्रह्मादिदेवार्चितः' हिरण्यगर्भप्रभृतिकदेवैरिन्द्रादिभिरर्चितः पूजितः 'यस्या मलं नृपसदस्सु यशोऽधुनापि गायन्त्यघघ्नमृषयो दिगिभेन्द्रपट्टम् । तं नाकपालव सुपालकिरीटजुष्टं पादाम्बुजं रघुपतेः शरणं प्रपद्ये' इतिश्रीव्यासोक्तेः लोके विधिकाण्डे च पूज्यतया प्रसिद्धा इन्द्रादय एव तैरप्ययं पूजनीय इति प्राप्य वस्तुनो महात्म्यातिशयः प्रदर्शितः । 'तारार्कानलचन्द्रमो बहुमहः सौदामिनी-भासकः' तत्र तारा सूर्यानलवह्निचन्द्राणाम् तथाऽतिकान्तिमत्याविद्युल्लेखाया अपि भासकः प्रकाशको भगवान् श्रीरामः । तथोक्तम् 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतो यमग्निः, तमेवभान्तमनुभाति सर्वं तस्य भासा जगदिदं विभाति' इत्यादिश्रुत्या जगत्प्रकाशकसूर्यादीनामपि भासकतया स्वप्रकाशरूपत्वं भगवतः श्रीरामस्य प्रतिपादितं भवतीति । 'वीरशपत्नशस्त्रनि चयैरजय्यः प्रवलशत्रुशस्त्रसमुदायेनापि जेतुं पराभवितुमशक्यः । मुहुस्तेषां जेता च पुनश्च शस्त्रनिचयैः शत्रुसमुदायानां विजेता ॥२॥ नित्यानां नित्ये जीवप्रकृत्या दीनांमुख्यः 'नित्यो नित्यानां चेतनश्चेतनानामेकोबहूनां यो विदधाति कामान्' इतिश्रुतेः नित्य उत्पादविनाशरहितः अकारणकत्वात् । 'ब्रह्मविधायकः' ब्रह्मपद वाच्यवेदराशेर्विधायकः सम्युत्पादकः । यो वै ब्रह्माणं विदधातिपूर्वम्' इतिश्रुत्या चतुर्मुखहिरण्यगर्भोत्पादको वा 'एकः' सजातीयद्वितीयरहितो मुख्यः । 'भूत

Scanned by CamScanner ankurnagpal108@gmail.com

भृद्' जगतः संरक्षकः ब्रह्मणे वेदप्रदः चतुर्मुखाय वेद दाता 'वेदांश्च प्रहिणोति तस्मै' इति श्रुतेः शरणमुपायः 'तपः प्रभृतिभिः सद्योगिनां दुर्लभो दुःखेन प्राप्तुं योग्यः । 'वशी' सर्वं यस्यवशेऽधिकारे तिष्ठति यद्वा अतिशयितकान्तिमान् । 'स्वतन्त्रः' न कस्यापि पराधीनः एतादृशपूर्वोक्तविशेषणवान् पुरुषाकारो भगवान् सर्वेश्वरश्रीरामः तत्परैर्भगवत्परायणैराचार्यैः सत्सङ्गिभिर्मुमुक्षुभिश्च ध्येयः प्राप्यः प्राप्तुं योग्यश्चेति । अत्र यद्वक्तव्यं तत्पूर्वप्रकरणे प्रतिपादितमितिदिक् ।३।

जो द्विभूजाकार हैं । सर्वान्तर्यामी होने से पुरुषपद वाच्य हैं श्रीमान् धन धान्यादिरूप श्री से सदा सम्पन्न हैं । अथवा श्रीपदवाच्य विदेह कन्या से नित्ययुक्त हैं, तथा हेयप्रत्यनीक सर्वज्ञत्व वात्सल्यादि अनन्त कल्याणगुणों का सागर रूप हैं। तथा स्थूल सूक्ष्म साधारण चराचर जगत् का अभिन्न निमित्तोपादानकारण हैं । तथा शरण्य हैं अर्थात् शरण में आये हुए प्रपन्न पुरुषों का पालक हैं । **'सकृदेवप्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम'** यह वचन श्रीकोसलेन्द्रसरकार का है । इससे सिद्ध होता है कि शरणागत पालक हैं । तथा समस्त जगत् का सर्ग करने की शक्ति से युक्त हैं । ब्रह्मादिदेवों का भी ईश्वर शासक हैं। सर्वोत्पादक होने से स्वयं उत्पादविनाश रहित हैं । तथा सुरोत्तम ब्रह्मा हिरण्यगर्भ तथा इन्द्रादिक देव श्रेष्ठों से भी पूजित हैं । तथा सूर्य चन्द्रमा तारागण विद्युत् तथा अग्नि के भी प्रकाशक हैं । श्रुति कहती है **'न तत्र सूर्योभाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासा जगदिदं विभाति'** इति । तथा जो वीर शत्रुओं के अनेक प्रकार के शस्त्रास्त्र समूहों से भी अजेय हैं । तथा जो उन शत्रुओं के ऊपर वारंवार विजय करनेवाले हैं । **'सर्वेषामव ताराणामवतारी रघूत्तमः'** इस आगमानुसार वराह नृसिंहावतार लेकर हिरण्याक्ष और हिरण्यकशिपु पर विजय प्राप्त किया । त्रेता में रावण कुम्भकर्णादि के ऊपर विजय प्राप्त किया । तथा जो चेतन वद्ध मुक्त नित्य मुक्तों के भी चेतन हैं-**'चेतनश्चेतनानाम्'** इत्यादि श्रुति कहति है । तथा नित्यों से भी नित्य हैं । अर्थात् नित्यरूप से प्रसिद्ध जो परमाणु आकाश और जीवराशि है इनमें भी नित्य है **'नित्योनित्यानां चेतनश्चेत नानामेको बहूनां यो विदधाति कामान्'** इत्यादि श्रुति कहति है । तथा जो एक हैं अर्थात् सजातीय द्वितीय रहित हैं । क्योंकि स्वकीय इच्छा मात्र से सर्ववस्तु का

Scanned by CamScanner
ankurnagpal108@gmail.com

साधक होने से सहायकान्तर निरपेक्षत्व हैं। तथा जो जगत् भृत् है जगत् का पोषण तथा रक्षण करनेवाले हैं। तथा जो बाह्य चतुर्मुख को सर्पादि में उत्पन्न करके उन्हें वेद पढानेवाले हैं। तथा जो बुध सर्वज्ञ हैं **'यः सर्वज्ञः स सर्वचित्'** इतिश्रुति कहति है। तथा जो तपस्या आदि से श्रेष्ठ योगियों को दुर्लभ हैं। तथा जो वशी हैं सबको अपने अधिकार में रखनेवाले हैं। यद्वा सर्व प्रकाशशील कान्तिमान् हैं और जो स्वतन्त्र हैं। एतादृश क्लेश कर्म विपाकाशयों से अपरामृष्ट पुरुषविशेष रूप जो सर्वेश्वर भगवान् श्रीरामचन्द्रजी हैं वे भगवत्परायण सत्सङ्गी-आचार्यवान् मुमुक्षुओं से ध्यान करने के योग्य तथा प्राप्य हैं। अर्थात् प्राप्त करने के योग्य हैं। उपर्युक्त लक्षण संक्षेप से प्राप्य तत्त्व श्रीरामजी का बतलाया गया है ॥२-३॥

तथाविधं प्राप्यमथो सुवैष्णवः सुचिन्तयन्नित्यमनुक्षणं प्रिय।
सदा सदाचाररतं गुरुं वरं ज्ञातं भजेताखिलसंशयच्छिदम् ॥४॥

प्रिय सुरसुरानन्द ! अथोऽनन्तरम् भगवतो जगदेककारणस्य श्रीसीताना यकस्य श्रवणमननध्यानकरणानन्तरम् सुवैष्णव एषणात्रयरहितः संसारासारता माकलयन् संसारं त्यक्तुमिच्छुः सदासर्वकालम् अनुक्षणं क्षणं क्षणंप्रति नित्यं सर्वदा प्राप्यं भगवन्तं श्रीरामम् ज्ञातस्वरूपगुणादिना साक्षात्कृततत्वमखिलसं शयच्छिदम् सर्वप्रकारकसंशयस्य त्रिविधमिथ्याज्ञानस्य छेत्तारं वरमतिश्रेष्ठम् 'गु शब्दस्त्वन्धकारः स्यात् रु शब्दस्तन्निवर्तकः। अन्धकारविरोधित्वाद् गुरुरित्यभि धीयते' इत्यादिलक्षणलक्षितम् संशयादिमिथ्याज्ञाननिरसनदक्षं गुरुम्, तथा 'सदा सदाचाररतम्' सर्वकाले सदाचारे निरतं विरक्तं गुरुम्, उपर्युक्तप्राप्यस्य ज्ञानाय भजेत, तदाश्रयं कुर्वीत, गुरुसमीपमागत्यतत्कुलेवसन् तस्य सेवां सदैव यावज्जीवनं कुर्यात्। यदुक्तम् 'यथा खनन् खनित्रेण नरो वार्यधिगच्छति। तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति' 'गुरुशुश्रूषया विद्या' इत्यादिवचनेन गुरुं सेवेत इति सारः ॥४॥

हे प्रिय सुरसुरानन्द ! अथ परमकारण भगवान् श्रीसीतारामजी के ध्यान श्रवणा दि के अन्तर श्रीवैष्णव संसार के असारता का आकलन करके लीलाविभूति को छोडने चाहनेवाला विरक्त शिष्य पूर्वकथित अनेक प्रकारक विशेषण विशिष्ट सर्वदा प्राप्ति योग्य सर्वेश्वर श्रीरामजी का प्रतिक्षण चिन्तन करता हुआ भगवान् श्रीरामजी को

Scanned by CamScanner ankurnagpal108@gmail.com

स्वरूप से तथा गुणों से जानने के लिए सर्वदा सदाचार से युक्त सर्वप्रकारक संशय विपर्ययादिक मिथ्याज्ञान का निवारक परमतत्त्व का ज्ञाता तथा परमतत्त्व में निष्ठा रखनेवाले परम पूजनीय विरक्त गुरु महाराज की सेवा करें। अर्थात् गुरु से तत्त्वज्ञान प्राप्त करने के लिए गुरु की सेवा करें। स्मृति में कहा है-'**यथा खनन् खनित्रेण नरोवार्यधिगच्छति। तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।**' जिस तरह पुरुष कोदाली से जमीन को खोदता हुआ जल को प्राप्तकर जाता है। उसी तरह सेवक शिष्यसेवा के द्वारा गुरुगत विद्या को जानता है। अतः गुरुसेवा परम आवश्यक है ॥४॥

सत्सङ्गतः सन्विगतस्पृहोमुहू रामं प्रपद्याथ गुरोर्मुखादसौ ।
कर्माखिलं संपरिभुज्य चात्मवान् प्रारब्धमेवं प्रहतान्यकर्म्मकः ॥५॥

असौ श्रीवैष्णवो मुमुक्षुः संसारपरित्यागमभिलषन् मुहुर्वारंवारम्, सत्सङ्गतः सतां संशीलिततत्वत्रयज्ञानवतां गुरुणां सङ्गात् संपर्कात् विगतस्पृहः गता विषयेभ्यः स्पृहायस्य तादृशः स परात्परवैराग्ययुक्तः आत्मवान् जातपरमात्मनिश्चयो यद्वा स्वरूपज्ञानवान् भवन्। गुरुमुखात् गुरोराचार्यस्य मुखात् भगवन्तं श्रीरामचन्द्रं प्रपद्य अर्थात् श्रीरामस्य प्रपत्तिं-शरणागतिं कृत्वा, अथ तदनन्तरम् शरणागतिसम्पादनानन्तरम्। एवं प्रहतान्यकर्मकः प्रकर्षेण हतानि अन्यानि कर्माणि प्रपत्त्यतिरिक्तकर्माणि येन स प्रहतान्यकर्मकः एवं प्रकारेण विनाशित सकलकर्म अखिलं भोगप्रदं प्रारब्धं सकलं कर्मतत्फलं च संपरिभुज्य अर्थात् सर्वकर्मफलभोगं कृत्वा। क्रमेणार्चिरादिमार्गमाप्नोतीत्यग्रेणान्वयः ॥५॥

संसार सागर परित्याग करने की इच्छावाले मुमुक्षु विरक्त श्रीवैष्णव पुरुष के वारंवार के सत्सङ्ग करने से वैराग्यवान् होकर परमात्मा परायण आचार्य के मुख से श्रीसीतानाथ श्रीरामजी की प्रपत्ति करने से दुरितादुरित प्रारब्ध कर्म से अतिरिक्त संचित तथा क्रियमाण सकल पापकर्म विनष्ट हो जाते हैं। एवं समस्त प्रारब्ध कर्म फल भोग करने के वाद अर्चिरादिमार्ग के द्वारा मुक्त हो जाते हैं ॥५॥

न्यासात्स्वतन्त्रेश्वरजातसद्दया निर्लूनमायान्वय एव दैशिकः ।
हार्दोत्तमानुग्रहलब्धमध्यसन् नाडीशुभद्वारबहिर्विनिर्गतः ॥६॥

Scanned by CamScanner ankurnagpal108@gmail.com

मार्गं ततस्सोऽर्चिरुपैति मुक्तकस्तथार्चिषोऽहो दिनतः सुरार्चितः ।
आपूर्यमाणं विविधैस्तुवासरैः पक्षं प्रभूतोत्तमशर्मविज्वरः ॥७॥

ततोन्यासात् स्वकीयजैवीयस्वतन्त्रतायाः परित्यागकरणादेव 'स्वतन्त्रेश्वरजातसद्दयानिर्लूनमायान्वयः, अर्थात् स्वतन्त्रो यः परमेश्वरः तस्य जाता समुत्पन्ना या सद्दया तया विनाशितमायासम्बन्धः । अतएव दैशिकः परमात्मनो यो निवासप्रदेशः श्रीसाकेतादिस्तल्लब्धुं योग्यः, अथवा दिशत्युपदिशतीति दैशिक आचार्यस्तेतानुशासितः । तथा 'हार्दोत्तमानुग्रहलब्धमध्यसन्नाडीशुभद्वारबहिर्विनिर्गतः' तत्र हृदिजातः समुत्पन्नो हार्दः स चासौ अत्युत्तमोऽनुग्रहः कृपा तेनानुग्रहेण प्राप्ता या सुषुम्ना वाच्या मध्यसन् नाडीशरीराद्विनिर्गमनभूतासन्नाडी सैव शुभं मोक्षप्रापकं द्वारं मार्गः, तन्मार्गद्वारा षाट्कौशिकपाँचभौतिकशरीराद् बहिर्विनिर्गतो मुमुक्षुः क्रमेण मार्गान्मार्गान्तरंगच्छन् सायुज्यमोक्षमाप्नोतीति ॥६॥

तदनन्तरं शरीराद्बहिर्निर्गमानन्तरम्, स एव विनिर्गतमुक्तको मुमुक्षुरर्चिनामकमार्गमुपैति प्राप्नोति ततोऽर्चिषः सकाशात्, अहन्नामकं मार्गं प्राप्नोति दिनतः तत्तन्मार्गस्थाने तत्तत्स्थानाभिमानिसुरैर्देवैरर्चितो भवति, मिष्टवचसा अर्घ्यपाद्याद्युपहारेण च । ततश्चानेकवासरात्मकदिवसैरापूर्यमाणं पञ्चदशदिनात्मकपक्षाख्यं मार्गं प्राप्नोति, तं पक्षात्मकमार्गं प्राप्य, तत्रामुक्तपुरुषैरप्राप्यं सुखमनुभूय प्रभूतोत्तमशर्मविज्वरो भवति सांसारिकतापात्मकं ज्वरं परित्यजतीतिभावः ॥७॥

तदनन्तर मुमुक्षुजीव स्वकीय स्वतन्त्रता का परित्याग कर देने के कारण सर्व शक्ति सम्पन्न सर्वथा सर्वस्वतन्त्र परमकारण भगवान् श्रीरामजी की समीचीन अहेतुक अकारण दया अनुकम्पा से माया सम्बन्ध को अर्थात् माया के परम्परा को सर्वथा विनाशित करके भगवान् श्रीरामजी के प्रदेश को प्राप्त करने के योग्य अधिकारी विरक्त श्रीवैष्णव पुरुषोत्तम भगवान् श्रीरामजी के अनुग्रह दया से प्राप्त जो सुषुम्ना नाडी तादृश शताधिक शुभ फल को देनेवाली सुषुम्ना नाडी के द्वारा इस पाँच भौतिक शरीर से निकल करके मुक्त के समान होता हुआ सर्वेश्वर श्रीरामजी के स्वरूप अर्थात् दिव्य अलौकिक स्वरूप का अनुभव से समुत्पन्न जायमान जो नित्यनिरतिशय दुःखामिश्रित सुख, तादृश प्राप्त सुख द्वारा संसार जनित सर्वपापों से विमुक्त छुटकारा

Scanned by CamScanner ankurnagpal108@gmail.com

प्राप्त करके तदनन्तर अर्चिरादिमार्ग अर्थात् देवयान उत्तर मार्ग को प्राप्त करते हैं। उत्तर मार्ग से एतादृश मुमुक्षु का गमन होता है। तथा तत्तत्मार्गाभिमानी देवताओं से वह श्रीसाकेत दिव्यधाम प्राप्तीच्छावाला पुरुष पूजित होता है। अर्थात् तत्तत्स्थान को प्राप्त किये पथिक का तत्रस्थित देवतालोग मिष्ट वचनों से स्वागत करके अग्रिम मार्गों का निर्देश भी करते हैं। तदनन्तर वह मोक्षपथिक दिवस में जाता है। अर्थात् दिवसाभिमानी देवों के स्थान को प्राप्त करता है। तथा तत्रत्यतदभिमानी देवों से सत्कृत पूजित होता है। तत्पश्चात् वह दिवसाभिमानी देव स्थान से प्रयाण करके शुक्लपक्ष का जो अभिमानी देव हैं उसको पाता है ।६।७।

पक्षादुदङ्मासमथो षडात्मकं तेभ्यश्च संवत्सरमब्दतो रविम् ।
चन्द्रं ततश्चन्द्रमसोऽथ विद्युतं स तत्र तत्राखिलदेवपूजितः ॥८॥

ततः स मोक्षपथिकः शुक्लपक्षाभिमानीदेवस्थानप्राप्तेरनन्तरम् तादृशदेव स्थानात्परम् षण्मासात्मकम् उदङ् उत्तरायणषण्मासाभिमानीदेवतास्थानं प्रा प्नोति, ततस्तेभ्य उत्तरायणषण्मासाभिमानिदेवस्थानेभ्यः संवत्सरम् अर्थात् संवत्सराभिमानिदेवस्थानमुपैति प्राप्नोति। ततोऽब्दतोरवि अर्थात् संवत्सरात्सूर्य स्थानमाप्नोति। ततः सूर्याच्चन्द्रं चन्द्रलोकमासादयति। अर्थात्सूर्यलोकाच्चन्द्र लोकं गच्छतीति। अथ चन्द्रलोकप्राप्त्यनन्तरं चन्द्रलोकाद्विद्युल्लोकं प्राप्नोति, सर्वत्र लोकपदं तदभिमानिदेवपरकमेवेतिवोध्यम् ततः स देहाद्विनिर्गतो मोक्षपथि कः, तत्र तत्र पूर्वकथितदेवस्थानेषु सर्वदेवपूजितो भवति तत्तद्देवैः पूजितः सत्कृ तश्च भवतीति ॥८॥

इसके वाद मोक्ष पथिक जीव शुक्ल पक्षाभिमानी देवताओं से पूजित होने के वाद उत्तरायण षड्मासाभिमानी देवस्थान को प्राप्त करते हैं। तब वहां भी तत्रत्य तत्स्थानाभिमानी देवों से पूजित होकर, तदनन्तर संवत्सराभिमानी देवस्थानों में जाते हैं। वहां भी उन देवों से पूजित सत्कृत होकर के तत्पश्चात् सूर्यलोक में जाते हैं। तथा सूर्यस्थ देवता से पूजित होकर चन्द्रलोक में पहुँचते हैं। वहां भी चन्द्रलोका भिमानी देवताओं से पूजित सत्कृत होने के वाद विद्युल्लोक में जाते हैं। विद्युल्लोक में तदभिमानी देवों से पूजित सत्कृत होते हैं ॥८॥

Scanned by CamScanner ankurnagpal108@gmail.com

परं पदं सोऽयमुपेत्य नित्यममानवं ब्रह्मपथेन तेन ।
सायुज्यमेव प्रतिलभ्य तत्र प्राप्यस्य सन्नन्दति तेन साकम् ॥९॥

सोऽयं मुमुक्षुः प्रसिद्धः श्रीवैष्णवब्रह्मपथिकः पूर्वप्रतिपादितसुषुम्ना-नाड्यादिमार्गेण अर्चिरादिब्रह्मप्रापकमार्गेण पांचभौतिकशरीराद्विनिर्गतः 'ब्रह्म पथेन' ब्रह्मणः श्रीरामस्य पन्थाः प्रापकमार्गो ब्रह्मपथस्तेन ब्रह्मपथेन प्राप्य सर्वे श्वरश्रीरामप्रापकस्वेतरसर्वविलक्षणमार्गेणनित्यमुत्पादविनाशरहितं शाश्वतं परं सर्वत उत्कृष्टमलौकिकत्वात् पदं पदनीयं प्राप्तुं योग्यममानवं मानवभोग्येभ्योभिन्न ममानवम् श्रीसाकेताख्यं भगवतो रामस्य निवासस्थानम्, उपेत्य संप्राप्य तत्र गत्वेत्यर्थः । प्राप्यस्य भगवतः परमकारणरूप सर्वाधारस्वरूपश्रीरामस्य 'सा युज्यमेवप्रतिलभ्य, नतु सामीप्यसारूप्यादिकमवाप्य मोक्षेतारतम्याभावात् मोक्षे तारतम्यमिति यन्मतं तत्तु पुरस्तादेव प्रतिषिद्धम् । मोक्षेऽपि यदि तारतम्यं स्वी क्रियेत तदा सातिशयस्वर्गादिवदेव मुक्तस्य पुनरावृत्तिप्रसङ्गात् । अर्थात् यथा सातिशयत्वात्स्वर्गस्यानित्यत्वं स्वर्गगतस्य पुनरावृत्तिर्भवतीति 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति इतिशास्त्रोक्तेः । तथैव स्वर्गविशेषरूपतारतम्यविशिष्टमोक्षा दपि मुक्तस्य पुनरावृत्तिप्रसङ्गात् 'यद्गत्वा न निवर्तन्ते' इतिस्मृतिविरोधः । तस्मा न्नमोक्षे तारतम्यप्रयुक्तो भेदोऽपितु तद्रहित एकरूप एव । तत्रेदमुक्तमाचार्येण 'सायुज्यमेव प्रतिलभ्येति । सायुज्यरूपंमोक्षं प्रतिलभ्य लब्धा संप्राप्येत्यर्थः एव कारेणान्यार्थो व्यवच्छिद्यते । ततश्च तत्राप्राकृतिके श्रीसाकेतनामके नगरवन्महा नगरे तेन भगवता परमप्राप्यत्वेन श्रीसाकेतपतिना श्रीरामेण साकम्-सह, सन्नन्दति विलक्षणमानन्दं प्रागननुभूतं तदानीमनुभवन् स्वात्मानं कृतार्थं मनुते । अर्थात् सत्समीचीनरूपेण साकेतसमृद्धिजनितस्वेतरसर्वविलक्षणसुखानुभव पूर्वको विहरति स मुक्तो जन इति भावः ॥९॥

वह मुक्त पुरुष जो कि सुषुम्नानाडी द्वारा इस पाँच भौतिक शरीर से निकला हुआ है । तथा पूर्वोक्त क्रम अर्चिरादिमार्ग से ब्रह्मपथ से परब्रह्म के लोक श्रीसाकेत धाम में पहुँचानेवाले मार्ग से गन्तव्य परम प्राप्य भगवान् श्रीसाकेतनाथजी के सायुज्य रूप मोक्ष को प्राप्त हुआ है । वह साकेतनगर में भगवान् श्रीसीतानाथजी के साथ नित्य निरतिशय अदृष्टाश्रुत विलक्षण सुख का भोग करता है ॥९॥

Scanned by CamScanner ankurnagpal108@gmail.com

सीमान्तसिन्ध्वाप्लुत एव धन्यो गत्वा परब्रह्मसुवीक्षितोऽथ ।
प्राप्यं महानन्दमहाब्धिमग्नो नावर्त्तते जातु ततः पुनः सः ॥१०॥

इत्यानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्ययतिराजप्रणीते श्रीवैष्णवमताब्जभास्करे प्राप्यनिरूपणात्मको नवमप्रश्नोत्तराख्यो नवमः परिच्छेदः ॥९॥

सीमान्तसिन्ध्वाप्लुतः 'प्रकृतिमण्डलस्य संसारस्यान्तेऽवसाने सिन्धुर्नदी विरजानाम्नी सैव प्रकृतिमण्डलस्य सीमानभूता । अर्थात् 'विरजायाः पूर्वपारे संसार उत्तरपारे साकेतः' इतिताद्दशनद्यां विमलशीतलत्वतापहत्वादिगुणविशिष्टायाम् आप्लुतस्तत्रावगाहनेन सुस्नातः । अथ च परब्रह्मसुवीक्षितः परब्रह्मणा समस्तजगत्कारणेन ब्रह्मणा सर्वव्यापकेन श्रीरामेणाहेतुककृपया सुवीक्षितः सम्यगवलोकितः ततश्च श्रीरामावलोकनादेव धन्यतां जातः स एव जनः प्राप्यं प्राप्यभूतं सर्वाधारंश्रीरामं प्राप्तुं योग्यम् गत्वा प्राप्य ज्ञात्वा वा स्वचक्षुषा साक्षात्कृत्येत्यर्थः । महानन्दो महाब्धिमग्नः तत्र महानन्दस्य त्रिविधपरिच्छेदरहितस्यानन्दस्य सुखविशेषस्य महाब्धौ महासागरे अर्थात् नित्यनिरतिशयसुखसागरे निमग्नः ओतप्रोतोजनः जातु कदाचिदपि, ततः प्राप्यस्थानात्साकेतादानन्दस्वरूपात् पुनः नावर्त्तते । यथा कर्म कृत्वा तत्फलोपभोगाय दक्षिणमार्गेण चन्द्रलोकमवाप्य भोगेन कर्मक्षयानन्तरं पुनरिमं मानवलोकमावर्तते कर्मकरणाय आवर्ततेऽत्रा गच्छति । तथा भगवत्कृपया श्रीसाकेतं प्राप्त उक्तपूर्वगत्या मानवः स प्रेत्य न तत्स्था नादागच्छति । तदुक्तं भगवतावासुदेवेन 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' इति । तथा 'न स पुनरावर्तते' इत्यादिश्रुतिभ्यां ब्रह्मप्राप्तस्य पुनरागमनं न स्यात् । तदयं श्लोकस्य संक्षिप्तार्थः स ईदृशः पूर्वोक्तो मुमुक्षुर्धन्य एव सीमान्तसिन्ध्वाप्लुतः जन्ममरणजरादिसंसारताप विनाशकामृतजलपूर्णब्रह्मात्मकमहार्णवनिष्णातोऽहर्निशं निरन्तरकृपाकटाक्षेण परब्रह्मणा श्रीसाकेताधिपेन सुवीक्षितो दृष्टः सन् प्राप्यं प्राप्तियोग्यं श्रीरामं गत्वा प्राप्य ज्ञात्वा वा अपरिमितानन्दलक्षणमहासमुद्रे निमग्न ओतः प्रोतः तादृशानन्दरूपसाकेतान्नपुनः कदाचिदपि सांसारिकदुःखाद्यनुभवाय ततः पुनरागच्छतीति ।

भगवत्कृपया गुरूपदेशेन संप्राप्तब्रह्मज्ञानवतां श्रीसाकेतगमनप्रकारमित्थं छान्दोग्योपनिषदि प्रतिपादितम् । तथा हि 'तेऽर्चिषमभिसंभवन्ति अर्चिषोऽहः

Scanned by CamScanner ankurnagpal108@gmail.com

अन्ह आपूर्यमाणपक्षम् आपूर्यमाणपक्षाद्यान् षडुदङ्तिमासान् मासेभ्यः संवत्स रम् संवत्सरादादित्यम्, आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्मगमयति एष देवपथो ब्रह्मपथ एतेन प्रतिपाद्यमान इमं मानवमावर्तं नावर्तन्ते' इति तदत्र श्रीमन्त आनन्दभाष्यकारा आनन्दभाष्ये 'ततश्चायं क्रमः सम्पन्नः नाडिरश्मिप्रवेशानन्तरमर्चिषमर्चिषोऽहरह आपूर्यमाणपक्षमापूर्यमाणप क्षादुत्तरायणमासास्तेभ्यः सम्वत्सरं सम्वत्सराद्वायुं वायोरादित्यमादित्याच्चन्द्रमसं चन्द्रमसो वैद्युतं वैद्युताद्वारुणं वारुणादैन्द्रमैन्द्राद्धातृलोकं धातृलोकाद्विरजां तत्र स्नात्वा श्रीसाकेतलोकद्वारमिति (आनन्दभाष्यम् ४।३।३) अस्मिन् विषये साटो पमीमांसा गीतार्थचन्द्रिकाया अष्टमाध्यायस्य त्रयोविंशतिश्लोके कृताऽस्मत्परम गुरुभिरिति तत एवानुसन्धेयो विस्तारभयान्नोल्लिख्यते तथाप्यत्रानुसन्धेयाः सार स्वतसार्वभौमजगद्गुरुश्रीरामेश्वरानन्दाचार्यानुगृहीताः श्लोकास्तथाहि-

दुःखार्णवे निमज्जन्तं दृष्ट्वा जीवमहेतुकः ।
करुणासिन्धुरामस्य जायते कोऽप्यनुग्रहः ॥
पुण्यं भवति चाज्ञातं रामस्यानुग्रहेण हि ।
अभावो जायते तस्माद् विद्वेषप्रतियोगिकः ॥
श्रीरामरामभक्तानामाभिमुख्यस्य कारणम् ।
तज्जन्यादाभिमुख्याद्धि जिज्ञासा समुदेति च ॥
सम्बन्धिनी विभागस्य सङ्ग्रहासङ्ग्रहार्हयोः ।
श्रीमद्रामस्य भक्तानां सम्बादो जायते ततः ॥
भवत्यनन्तरं तस्मात् सदाचार्यसमाश्रयः ।
सदाचार्याश्रयेणाथ हेयोपादेयनिश्चयः ॥
रामेतरेऽथ वैराग्यं रामे प्रीतिश्च जायते ।
निवृत्ते रामभिन्नानां रामप्राप्तेश्च कारणम् ॥
अङ्गीकरोति तत्पश्चात् सिद्धोपायञ्च चेतनः ।
श्रीरामप्राप्तये सोऽथ त्वरते भृशमुत्सुकः ॥
रामः स्मरति तं चाथ स्वसम्प्राप्तिसमुत्सुकम् ।
यथा स्वाप्त्युत्सुकं वत्सं धेनुर्वात्सल्यवारिधिः ॥

Scanned by CamScanner ankurnagpal108@gmail.com

अश्लिष्टे च विनष्टे स्तस्ततस्तत्पुण्यपापके ।
भोगेनाथ विनष्टे स्तस्तत्प्रारब्धात्मके च ते ॥
मनस्चेन्द्रियसंयुक्तं प्राणेन तस्य युज्यते ।
प्राणो जीवेन संयुक्तो भूतसूक्ष्मैस्तु युज्यते ॥
सर्वेश्वरस्य रामस्य संसर्गो जायते ततः ।
तन्मार्गस्य प्रकाशोऽथ हार्दरामानुकम्पया ॥
नाड्या मूर्द्धन्यया चाथोत्क्रामति हृदयात् किल ।
शरिरान्निर्गतो भक्त ऊर्ध्वं याति च रश्मिभिः ॥
निदाधे चोष्मता सत्त्वान्निशायाञ्चापि रश्मयः ।
अर्चयन्त्यर्चिरादिस्थं बुधा श्चातिवाहिकाः ॥
दिनं तत्रार्चिषोऽह्नश्च शुक्लं पक्षं च गच्छति ।
समेति शुक्लपक्षात् स उत्तरायणमेवहि ॥
तस्मात्संवत्सरं तस्माद्वायुं वायोश्च भास्करम् ।
सूर्याद्विधुं विधोश्चाथ विद्युतं वरुणं ततः ॥
ततश्चेन्द्रं ततो धातृलोकं गच्छत्युपासकः ।
अतिक्रामति पश्चाद् भूम्याद्यावरणसप्तकम् ॥
उल्लङ्घ्य प्रकृतिं सोऽथ विरजामवगाहते ।
ततः सूक्ष्माच्छरीराद् हि विश्लिष्टश्च भवत्यसौ ॥
प्रादुर्भवत्यथो चास्यानघत्वादि गुणाष्टकम् ।
अमानवकरस्पर्शो भवत्यस्य ततः परम् ॥
श्रीमद्रामस्य शङ्कल्पाद्दिव्यदेहो भवत्यसौ ।
कालकाल्येतरे दिव्ये देशे प्राप्तो भवत्यथ ॥
सरस्यैरंमदीयेऽथ दिव्ये स्नानं करोति सः ।
भवत्यनन्तरं चासौ दिव्यभूषरणभूषितः ॥
दिव्यं चाथ विमानं हि समारूढो भवत्ययम् ।
तिल्यारण्यप्रवेशोऽस्य विमानारोहणादनु ॥
अप्सरोभिश्च दिव्यैर्हि भव्या चास्य सुसत्कृतिः ।

Scanned by CamScanner ankurnagpal108@gmail.com

तिल्यगन्धप्रवेशोऽस्य तादृश्याः सत्कृतेः परम् ॥

तिल्यगन्धं प्रविश्याथ ब्रह्मगन्धं विशत्ययम् ।
सम्प्राप्नोति ततश्चायं प्राकृतेतरगोपुरम् ॥

वैकुण्ठनगरस्यासिर्भवत्यस्यं ततः परम् ।
भवत्ययं च तत्र श्रीनारायणाभिनन्दितः ॥

गोलोकस्याथ सम्प्राप्तिर्भवत्यस्य महात्मनः ।
भवत्यसौ हि तत्राथ श्रीकृष्णेनानुमोदितः ॥

ततः साकेतलोकस्य प्राप्नोत्ययञ्च गोपुरम् ।
ब्रह्मविष्णुमहेशाद्यैर्देवैः स्तुतं च वन्दितम् ॥

वेदैर्निवेदितं चाथ श्रीरामेणाभिनन्दितम् ।
समृद्धं परमं दीप्तं सर्वथा चाथ सर्वदा ॥

परात्परमयोध्यं च सुषमासागरं शुभम् ।
अयोध्यानगरं चासौ सम्प्राप्नोति ततः परम् ॥

यत्रास्ति सरयूरस्या प्रमोदाख्यं च काननम् ।
लीलास्पदं च रामस्य रत्नाचलः सुशोभितः ॥

पूर्वद्वारे च यस्यास्ति सुग्रीवो हि कपीश्वरः ।
द्वारे तु पश्चिमे श्रीमान् राक्षसेन्द्रो विभीषणः ॥

उत्तरे तु महावीरो बालिपुत्रस्तथाऽङ्गदः ।
दक्षिणे करुणासिन्धुर्मारुतिश्च महबलः ॥

दिव्यसूरिसदः प्रत्युद्गच्छत्ययं समुत्सुकः ।
राजमार्गं ततो याति ब्रह्मतेजो विशत्यथ ॥

दिव्यस्य गोपुरस्याथ प्राप्तिर्भवति चास्य हि ।
ब्रह्मवेश्मप्रवेशोऽथ भवत्यस्य महात्मनः ॥

कल्पवृक्षतले चास्ति साकेते ब्रह्मवेश्मनि ।
सुवर्णमण्डपे यत्र भासुरा रत्नवेदिका ॥

रत्नसिंहासनं यत्र वर्त्तते सूर्यसन्निभम् ।
विशालं कमलं दिव्यं सहस्रदलशोभितम् ॥

Scanned by CamScanner ankurnagpal108@gmail.com

अधः स्थिते वितानस्य तत्र सिंहासने वरे ।
आसीनं परमं रम्यं श्रीरामं सीतया सह ॥
दिव्यायुधान्वितं चाथ दिव्यपार्षदसंयुतम् ।
दिव्यभूषणवस्त्रैश्च भूषितं वीक्ष्यते ह्यसौ ॥
नमस्करोति साष्टाङ्गमभ्यासं समुपैति च ।
कोऽसी त्वमिति पृष्टेऽथ श्रीरामेण परात्मना ॥
शेषोऽहं शेषिणो नाथ ? तवैव सकलेशितुः ।
इत्येवं निगदन्तं च श्रीरामः करुणार्णवः ॥
स्वीयोत्सङ्गसमारूढमालिङ्ग्यं विदधाति हि ।
सर्वान् कामानवाप्नोति रामेणायं सह ततः ॥
गुणानां विग्रहादेश्च स्वरूपरूपयोस्तथा ।
प्रत्यक्षाज्जायते प्रीतेः प्रकर्षोहि ततः परम् ॥
अनेकविग्रहाणाञ्च जायतेऽथ परिग्रहः ।
कामचारे च लोकानां समर्थोऽपि भवत्ययम् ॥
अवस्थासु च सर्वासु सर्वयोर्देशकालयोः ।
कैङ्कर्येषु च सर्वेषु याति चायं प्रसन्नताम् ॥
छान्दोग्ये मुक्तजीवस्य पुनरावृत्तिवर्जनात् ।
भगवताऽपि गीतायां बोधयता धनञ्जयम् ॥
भगवन्तमुपेतस्य पुनर्जन्मनिषेधनात् ।
श्रीरामं समवाप्तोऽयं कर्मयोनिं न गच्छति ॥
आनन्दी नाथ जीवोऽयं रामं प्राप्य रसात्मकम् ।
समिच्छति पुनर्जन्म दुःखालयमशाश्वतम् ॥
सत्यसन्धः प्रतिश्रुत्य प्रपन्नायाभयं स्वयम् ।
निवर्त्तयेद् भये नैनं श्रीरामः श्रितवत्सलः' इत्यादिकाः ॥१०॥

सत्व रजस्तमो रूप प्रकृति तथा महत्तत्व से लेकर महापृथिव्यन्त जो प्रकृति मण्डल है उसके सीमान्त पर स्थित अर्थात् जहाँ प्रकृति मण्डल समाप्त होता है तथा जिसके आगे मोक्ष प्रदेश श्रीसाकेतधाम प्रारम्भ होता है इन दोनों के बीच में शास्त्र

Scanned by CamScanner ankurnagpal108@gmail.com

पुराणादि प्रसिद्ध विरजा नदी बह रही है। यह रजोगुण तथा तमोगुण के सम्बन्ध से सर्वथा अस्पृष्ट है शुद्ध सत्वमय ही है। इसलिए शास्त्रकारों ने इसका नाम विरजा रखा है। 'विरजा' विगत रजोगुणवती प्रायः प्रत्येक नदी वर्षाकाल में सरजस्का हो जाती है इसलिए वर्षा काल में स्नान तर्पणादिकों का गङ्गादि व्यतिरिक्त नदियों में निषेध है। यह तो गङ्गा से भी उत्कृष्ट होने से सर्वदा विरजा है। इस विरजा नदी के पूर्व किनारे में संसार है। उत्तर किनारे पर दिव्य श्रीसाकेतधाम है तो मोक्षधाम में जानेवाले मध्य में स्थित विरजा में स्नान करने के बाद ही प्राप्य श्रीरामजी का दर्शन करते हैं। इसलिए आचार्यश्री ने कहा है प्रकृति मण्डल के सीमान्त पर अवस्थित विरजा में समीचीन रूपसे अवगाहन करनेवाले परब्रह्म श्रीरामजी के अहेतुक कृपा कटाक्ष से दृष्ट होने के कारण जो धन्य हैं वे निरन्तर प्राप्त करने के योग्य भगवान् श्रीरामचन्द्रजी को प्राप्त करके, अर्थात् साक्षात्कार करके नित्य निरतिशय आनन्दात्मक महासागर में निमग्न हो जाते हैं पुनः कभी भी उस स्थान् से लौटकर इस मानव महावर्त में नहीं आते हैं। **'न स पुनरावर्तते' 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन। मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते'** इत्यादि श्रुति स्मृतियों में ऐसा कहा है।

ब्रह्म प्राप्ति का मार्ग छान्दोग्यादि श्रुतियों में बतलाया है कि-**'तेर्चिषमभिसंविशन्ति, अर्चिषोऽह अह्न आपूर्यमाणपक्षम् आपूर्यमाणपक्षाद्यान् षडुदङेतिमासान् मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरषोऽमानवः स एतान् ब्रह्मगमयति, एष देवपथोब्रह्मपथ एतेन प्रतिपाद्यमान इमं मानवमावर्तं नावर्तन्ते' इति**। (तदयमर्थः सुषुम्नानाडी के द्वारा पाँच भौतिक शरीर से बाहर निकलने वाले महापुण्यशाली मानव शरीर से निकल करके अर्चिरभिमानी देव को प्राप्त करते हैं वहां से चलकर दिवसाभिमानी देव को अर्थात् दिवस को प्राप्त होते हैं। तदनन्तर पक्षाभिमानी देव को प्राप्त करते हैं। तदनन्तर छ उत्तरायण मासों में प्रवेश करते हैं। तदनन्तर मास में मासाभिमानी देवों से चलकर संवत्सर में अर्थात् संवत्सराभिमानी देवों के लोक में जाते हैं। वहां देवों से यथायोग्य पूजित होकर तदनन्तर संवत्सर से आदित्यलोक में जाते हैं। आदित्यलोक में पूजित सत्कृत होकर के वहां से चन्द्रलोक में जाते हैं। चन्द्रलोक से भी प्रस्थान करके विद्युदभि

Scanned by CamScanner ankurnagpal108@gmail.com

मानी देवों के लोक में पुण्यात्मा जाते हैं वहाँ से आगे उनको एक अमानव पुरुष ब्रह्मलोक श्रीसाकेतलोक में पहुँचाता है इसीका नाम देवपथ अर्थात् देवयान है। यही ब्रह्मपथ कहलाता है। अर्थात् ब्रह्मप्रापक मार्ग। इस मार्ग के द्वारा ब्रह्मलोक प्राप्त करनेवाले व्यक्ति कभी भी मानव आवर्त में लौटकर नहीं आता है। **'न स पुनरावर्तते'** ब्रह्म लोक को प्राप्त किया हुआ पुरुष पुनः वहाँ से लौटता नहीं। इस विषय का विशेष विवरण आनन्दभाष्य के अर्चिरादि प्रकरण तथा जगद्गुरु श्रीरामेश्वरानन्दाचार्यजी देशि केन्द्र प्रणीत श्रीरामप्राप्तिपद्धति और जगद्गुरु श्रीरामानन्दाचार्य श्रीरघुवराचार्यजी प्रणीत गीतार्थचन्द्रिका के आठवें अध्याय में है अतः विशेषार्थियों को वहीं देखना चाहिये निबन्धकाय वृद्धिभय से नाम निर्देश मात्र किया है, विशेष चर्चा वहीं करुँगा तत्त न्निबन्ध विवरण में ॥१०॥

卐 अथ श्रीवैष्णवनिवासस्थाननिरूपणम् 卐

महामते प्रोच्य तदीयमाप्यं तेषां निवासस्तु निरूप्यतेऽथ ।
मोक्षप्रदः शास्त्रसुसंमतश्च जिज्ञासुबोध्यो भव सावधानः ॥१॥

श्रीवैष्णवप्राप्यस्य भगवतो रामचन्द्रस्य स्वरूपलक्षणादिकं नवमप्रकरणे न निरुप्य, तदनु तेषां कुत्र कार्योनिवासः ? **इतिदशमप्रश्नस्योत्तरं दातुमाचार्य** उपक्रमते–महामते प्रोच्य तदीयमाप्यम्' इत्यादि। **हे महामते विशुद्धबुद्धिशालिन् सुरसुरानन्द ! तदीयमाप्यम् तेषां श्रीवैष्णवानां यत् परमतत्त्वम् आप्यं प्राप्यं तत् नवमप्रकरणे प्रोच्य प्रकर्षेण तदीयगुणस्वरूपादिकथनपूर्वकं श्रीरामात्मकं परम तत्त्वमेवाप्यम् तत्प्राप्तिरेव सायुज्यमोक्ष इति प्रोच्य कथयित्वा, अथ प्राप्यवस्तुनः कथनानन्तरम् तेषां श्रीवैष्णवानाम् निवासो निवासस्थानं वासकरणयोग्यं स्थलं निरूप्यते प्रतिपादयामि। यत्र स्थितः प्रतिबन्धकमन्तरेणैव भगवतोरामस्यानुध्या नं मननं निरायासेन सम्पादितं स्यात्। समे शुचौ सर्करावह्निवालुका विवर्जिते' इत्यादिना दोषरहितस्वच्छपवित्रप्रदेशगुहादिदेशस्यानुध्यानकरणस्थानतया शास्त्रे विधानात्। स च तेषां श्रीवैष्णवानां निवासः मोक्षप्रदः नित्यनिरतिशयसुखात्म कमुक्तेः साक्षात् परम्परया वा साधकः। न केवलं मोक्षप्रद एव अपितु शास्त्र सुसम्मतः। अर्थात् तादृशनिवासस्थानस्य मोक्षकारणता शास्त्रप्रमाणसिद्धः। अतएव जिज्ञासुबोध्यः विरक्तश्रीवैष्णवैः सर्वथाज्ञातुं योग्यः अतः हे सुरसुरा-**

Scanned by CamScanner ankurnagpal108@gmail.com

नन्द ! त्वं समाहितचिन्तो भव अहं ते तादृशनिवासस्थानं प्रतिपादयामि त्वं चाव धारय अर्थात् तादृशनिवासयोग्येषु स्थानेष्वन्यतमस्थानमध्यास्य तत्र भगवतोऽनु ध्यानं कुरु ततस्ते परमप्राप्यस्य भगवतः श्रीरामस्य प्राप्तौ सत्यां करतलस्थिता मलकवत् मोक्षस्तेस्यादिति निवासस्थानं मत्तो जानीहीतिभावः ॥१॥

हे महामते विलक्षण बुद्धिशालिन् ! श्रीवैष्णवों से प्राप्त करने के योग्य परम कारण परमतत्त्व का निर्वचन करके तदनन्तर महात्मा श्रीवैष्णवों का निवासस्थान जो कि शास्त्र प्रमाण सिद्ध है । तथा साक्षात् परम्परया मोक्ष प्राप्ति करने में सहकारी है। तथा जिज्ञासु व्यक्तियों से जानने के योग्य है । तादृश निवास स्थान का अव मैं निरूपण करता हूँ, तुम सावधान होकर के सुनो । स्थान का पूर्ण महत्व है वह मुक्ति प्राप्ति में अर्थात् विरक्तों श्रीवैष्णवों को मोक्ष प्राप्ति में निवासस्थान सहायक होता है। अतः निवास स्थान का कथन करता हूँ । तुम स्थिर बुद्धि होकर के इन बातों को सुनो और समझो ॥१॥

अशेषतीर्थेषु वसेत् प्रपूजयन् स यत्र यत्राविरभूद् यथा यथा ।
तथा तथा तत्र रघूत्तमं जगत्पत्तिं चतुवर्गफलप्रदं हरिम् ॥२॥

सः सर्वचराचरजगत्सु प्रसिद्धो भक्तस्य दुःखजनकसर्वपापहारको हरि र्भगवान् श्रीरामचन्द्रः यत्र यत्र यादृश यादृश तीर्थेषु यथा यथा येन येन रूपेण श्रीकृष्णवामनादिरूपेण आविरभूत् आविर्भूतो भक्तदुःखापनोदनाय लीलाभूमौ समागतः तादृशाशेषतीर्थेषु तादृशसमस्तपुण्योत्पादकायोध्यादिप्रदेशविशेषेषु तथा तथा तेन तेन प्रकारेण तत्तद्रूपस्थानोचितोपायनाद्युपहारेण चतुर्वर्गफलप्र दम् धर्मार्थकाममोक्षफलप्रदायकं हरिं सकलपापविनाशकं, रघूत्तमं रघुकुले सर्वत उत्तमं सर्वावतारित्वात् 'सर्वेषु अवतारेषु अवतारी रघूत्तमः' इत्युक्तेः । जगत्पतिं लीलादिभूमेर्नायकं भगवन्तं श्रीरामं मनोवाक् कायैः प्रपूजयन् सर्व भावेन प्रपत्तिमासाद्य पूजां कुर्वन् अशेषतीर्थेष्वन्यतमतीर्थे वासं कुर्यात् । सा-मान्यरूपेण सर्वतीर्थस्थानमेव निवासयोग्यमिति मत्वा श्रीसीतानाथस्य भक्तिं कुर्वन् वक्ष्यमाणतीर्थेषु सर्वविरक्तो भागवतश्रीवैष्णवस्तत्र कुटीरादिकं निर्माय वसेदिति सारः ॥२॥

सर्वभक्तों के दुःख जनक पापों को विनाश करनेवाले श्रीहरि परेश श्रीरामजी

Scanned by CamScanner ankurnagpal108@gmail.com

जिन जिन तीर्थ स्थानों में जिन जिन रूपों से भक्त के कार्य को सिद्ध करने के लिए आविर्भूत हुये हैं । अर्थात् यादृश कार्य विशेष को सम्पादन करने के लिए लीलाविभूति में श्रीरामजी ने अवतार लिया है उन उन अशेष तीर्थों में रघुकुलोत्तम समस्त चराचर का पालक भक्त को स्वाभितम धर्म अर्थ काम और मोक्ष पर्यन्त फल के प्रदाता सर्व पापहारक भगवान् श्रीरामचन्द्रजी का प्रपत्तिनिष्ठ होकर मनोवाक् काय से यथा मिलित उपचार से पूजन करते हुए उन तीर्थों में प्रपन्न श्रीवैष्णवगण यथा सुख यथा काल निवास करें । प्रत्येक तीर्थस्थान निवास करने योग्य हैं इसलिये श्रीवैष्णवगण अशेष तीर्थों में निवास करें ॥२॥

वैकुण्ठदेशे खलु वासुदेवमामोदसंज्ञेत्वथ कर्षणाह्वम् ।
प्रद्युम्नमब्जाक्षमपि प्रमोदे संमोद ईशन्तु तथाऽनिरुद्धम् ॥३॥

यत्र स्थाने श्रीवैष्णवसन्तैर्निवासः कर्तव्यस्तेषां सामान्यत 'अशेषतीर्थेषु' इत्यादिना कथितम् तेषामेव स्थानानां प्रातिस्विकरूपेण तत्तन्नामविशेषरूपेण दर्शयितुमुपक्रमते 'वैकुण्ठदेशे खलु वासुदेवम्' इत्यादि श्रीवैष्णवोत्तमैः शुभार्थिभिर्वैकुण्ठादिदेशे स्थानविशेषे आराधयद्भिः सकलार्थदायिनं वैकुण्ठादिस्थानान्तदेशविशेषेषु निवासः कार्य इत्यग्रिमश्लोकेन सम्बन्धो ज्ञातव्यः ।

'हे सुरसुरानन्द ! मोक्षेच्छावद्भिः श्रीवैष्णवैः वैकुण्ठदेशे वैकुण्ठनामक तीर्थविशेषे सर्वप्रकारकदुःखरहितप्रदेशविशेषस्य वैकुण्ठेतिनाम एतत् तीर्थ विशेषे, भगवन्तम् वासुदेवनामकमाराधयन् विरक्तो निवसेत् निवासं कुर्यात् । अत्र वैकुण्ठनामप्रदेशविशेषे सर्वदा भगवान् वासुदेवः सन्निहितो भवती ति तत्र वासुदेवस्य पूजनादिकं सम्पादयन् निवसेदिति । आमोदसंज्ञेत्वथ कर्षणाह्वमथानन्तरम् अमोदसंज्ञके आमोदनामकतीर्थविशेषे संकर्षणनामको भगवान् तिष्ठतीति तत्रामोदे संकर्षणनामानं भगवन्तं यथामिलितोपचारेण भक्तिपूर्वकं पूजयन् श्रीवैष्णवो निवासं कुर्यादिति । 'प्रद्युम्नमब्जाक्षमपि प्रमोदे' प्रमोद नामतीर्थविशेषे कमलदलवदायतनेत्रो देवः प्रद्युम्ननामकस्तिष्ठति तत्रामोदतीर्थे प्रद्युम्नं प्रपूजयन् प्रपन्नश्रीवैष्णवो निवासं सर्वदा कुर्यादिति । तथा संमोदे संमोद नामकतीर्थविशेषे अनिरुद्धनामक ईशस्तिष्ठति तत्रानिरुद्धमीशं प्रपूजयन् विरक्त श्रीवैष्णवो निवासं कुर्यादिति ॥३॥

Scanned by CamScanner ankurnagpal108@gmail.com

अशेषतीर्थ स्थानों में विरक्त श्रीवैष्णव निवास करें। इसप्रकार सामान्य रूपसे निवास स्थान का कथन किया गया है। उन्हीं तीर्थों का अब विशेष रूपसे तत्तत् नामपूर्वक कथन करते हैं। अर्थात् कौन कौन देव किस किस तीर्थों में रहते हैं। इस बात को बतलाने के लिए श्रीआचार्यजी कहते हैं-'**वैकुण्ठदेशे खलु वासुदेवम्**' इत्यादि। वैकुण्ठ देश में अर्थात् वैकुण्ठ नामक प्रदेश में मोक्ष की अभिलाषा रखने वाले श्रीवैष्णवगण भगवान् श्रीवासुदेवजी का पूजन करते हुए जो भगवान् श्रीवासुदेव धर्म, अर्थ, काम और मोक्षरूप चतुर्वर्गात्मक फल को देनेवाले हैं उनकी आराधना करते हुए निवास करें। एवं आमोद नामक तीर्थ विशेष में श्रीसंकर्षण नामक भगवान् का पूजन करते हुए जो कि सकल पुरुषार्थ का दायक हैं उनका पूजन आराधन करते हुए आमोदतीर्थ में निवास करें।

एवं प्रमोद नामक तीर्थ में भगवान् कमलनयन श्रीप्रद्युम्नजी का निवास स्थान है तो मोक्षाभिलाषी भक्तगण इस तीर्थ में स्थित प्रद्युम्न भगवान् का पूजनाराधन करते हुए प्रमोद नामक तीर्थ में निवास करें। और संमोद नामक तीर्थ में सर्व समर्थ अर्थात् सबके ऊपर शासन करनेवाले भगवान् श्रीअनिरुद्धजी निवास करते हैं। तो मोक्ष कामना वान् भक्तलोग भगवान् श्रीअनिरुद्धजी का पूजन करते हुए संमोद तीर्थ में वास करें ॥३॥

विष्णुं तु लोके वरसत्यसंज्ञके पद्माक्षमित्थं त्वथ सूर्यमण्डले ।
क्षीराब्धिमध्ये शुभशेषशायिनं श्वेते तथा द्वीपवरे च तारकम् ॥४॥

वरे श्रेष्ठतमे सत्यनामकलोके विष्णुनामकं परमात्मानं सर्वान्तर्यामितया सर्वव्यापकम् भगवन्तमाराधयन् श्रीवैष्णवः सत्यलोकाख्यतीर्थे सदा निवासं कुर्यादिति। अथानन्तरम् इत्थमनेनैवक्रमेण सूर्यमण्डले-सूर्यमण्डलनामकक्षेत्र विशेषतीर्थे पद्माक्षं तन्नामकपरमात्मानं भक्त्या पूजनादिकं कुर्वन् प्रपन्नोभक्तः यथोक्ततीर्थविशेषे निवसेत्। तथा क्षीराब्धिमध्ये-क्षीरसागरनामकतीर्थविशेषे शुभशेषशायिनम् मनोज्ञशेषान्तलक्षणशय्यायामास्तरणे समासीनं भगवन्तं पूजा दिना संतोषयन् भक्तस्तादृशक्षीरसागरतीर्थे निवासं कुर्यात्। तथा पूर्वोक्तप्रकारे णैव श्वेते श्वेतनामकद्वीपश्रेष्ठतीर्थे तारकं तारनामकम् परमात्मानमाराधयन् मोक्ष कामुको निवासं कुर्यादिति ॥४॥

Scanned by CamScanner ankurnagpal108@gmail.com

सत्यलोक नामक तीर्थ में भगवान् विष्णु रहते हैं उस सत्यलोक तीर्थ में भगवान् विष्णु का पूजन करते हुए श्रीवैष्णवगण निवास करें। एवं सूर्यमण्डल नामक तीर्थ में पद्माक्ष भगवान् विराजते हैं। उस क्षेत्र में पद्माक्षजी की भक्ति करते हुए श्रीवैष्णव गण निवास करें एवं क्षीरसागर नामक तीर्थ में भगवान् श्रीशेषशायीजी रहते हैं उस क्षेत्र में निवास करते हुए महात्मागण श्रीशेषशायीजी का पूजनादिक करें। तथा श्वेत द्वीपनामक क्षेत्र में तारक भगवान् रहते हैं उनका पूजन करते हुए श्रीवैष्णव वहाँ निवास करें ॥४॥

तथा बदर्याभिध आश्रमे वरे सुरर्षिराजर्षिमहर्षिसेविते ।
नारायणं लोकनमस्कृताङ्घ्रिकं मुनीशसेव्ये त्वथ नैमिषे हरिम् ॥५॥

यथाश्वेताख्यद्वीपवरे संस्थितं तारकनामानं भगवन्तं स्थितं प्रपूजयन् मुमुक्षुः संसारंपरित्यक्तुमिच्छन् वसेत् तथैव तेनैव प्रकारेण सुरर्षिराजर्षिमहर्षिसेविते नारदादिऋषिसंघैः संसेविते बदरीनामकवरे शुभे आश्रमे हिमालयैकदेशे बदरीनारायणनाम्नाप्रथितक्षेत्रे लोकनमस्कृताङ्घ्रिकं सर्वजनार्चितचरणकमलं नारायणनामकं भगवन्तं प्रपूजयन् निवासं कुर्यात् अर्थात् तथाभूते बदर्याश्रमे श्रीनारायणं पूजयन्तमेव तत्रावस्थानं कुर्यादिति। नैकोभक्तः सर्वत्र तीर्थे उषित्वा तत्तद्देवं पूजयेदपितु यथारुचिप्रदर्शितान्यतमक्षेत्रे वसेत् स्वेष्टं ध्यायन्निति। अथानन्तरम् मुनिनामीशोमुनिश्रेष्ठस्तैः संसेविते नैमिषनामकतीर्थे नैमिषारण्ये इत्यर्थः। तत्र हरिनामकं भगवन्तं प्रपूजयन् निवसेदिति ॥५॥

जिस तरह श्वेत द्वीप में तारक भगवान् का पूजनादि करता हुआ निवास करे उसी तरह बदरीनामक आश्रम में देवर्षि राजर्षि तथा महर्षियों से सेवित जो श्रीनारायण नामक भगवान् हैं उनका पूजनादिक करते हुए श्रीवैष्णवगण सर्वदा निवास करें। तथा नैमिषनामक क्षेत्र में जोकि मुनिश्रेष्ठ द्वारा सर्वदा सेव्य है उस तीर्थ में हरिनामक भगवान् का पूजादिक करते हुए निवास करें ॥५॥

शालग्राममघमोघदिव्यफलदं देवं हरिक्षेत्रतोऽ
योध्यायां रघुपुङ्गवं गुणनिधिं श्रीरामचन्द्रं प्रभुम् ।
सत्स्थाने मथुराभिधाश्रमवरे श्रीबालकृष्णं परम्

Scanned by CamScanner
ankurnagpal108@gmail.com

मायायां मधुसूदनं सुरनरध्येयाङ्घ्रिपद्मं सदा ॥६॥

हरिक्षेत्रतो हरिक्षेत्रे अत्र सार्वविभक्तिकस्तसिल्प्रत्ययः सप्तम्यर्थे, तेन हरिक्षेत्रनामकक्षेत्रे इत्यर्थः 'अमोघदिव्यफलप्रदं शालग्रामदेवम्' सकलमनन्तदिव्यविलक्षणफलप्रदायकं भगवन्तं शालग्रामनाम्ना प्रथितं परमात्मानम् प्रपूजयन् निवसेत् अर्थात् भक्तेभ्यः फलसमर्पकः शालग्रामभगवान् हरिक्षेत्रे प्रतिवसति, तत्र स्थितोभक्तः शालग्रामं प्रपूजयन् हरिक्षेत्रतीर्थे सर्वदानिवासं कुर्यादिति। तथा अयोध्यायां तन्नामकसाकेतापरपर्यायकतीर्थविशेषे रघुकुलेऽतिशयेन श्रेष्ठम्, गुणनिधिं गुणानां वात्सल्यादिसकलकल्याणगुणानां निधिं, हेयप्रत्यनीकसकलगुणाधारभूतम्, प्रभुं सर्वस्य जड़चिदात्मकजगतो नियामकम् श्रीरामचन्द्रं श्रीसीतालक्षणशक्तिसमन्वितम्, भगवन्तं प्रपूजयन् प्रपन्नोभक्तः सर्वदाऽयोध्यायामेव निवासं कुर्यात्। तदशक्तौ प्रदर्शिततत्तत्तीर्थे तदीयाधिष्ठातृपरमेश्वरं प्रपूजयन् तत्र तत्र निवासं कुर्यादिति। तथा मथुरानामकाश्रमतीर्थे, तत्सतां प्रपन्नानां स्थितियोग्यं स्थानं तस्मिन् सत्स्थाने मथुरानामकतीर्थविशेषे परं परमात्मानं जगतामेककारणं श्रीबालकृष्णं मनुष्यक्रीडां कुर्वन्तम् तत्र तं पूजयन् निवसेदिति।

एवम् मायायां मायाख्यनगरे हरिद्वारनामकतीर्थे सदासर्वदा 'सुरनरध्येयाङ्घ्रिपद्मम्' मनुष्यैर्देवैश्चध्येयं ध्यातुं योग्यमङ्घ्रिपद्मं यस्य तादृशम् देवमनुष्यादिपूजितं मधुसूदननामकं भगवन्तं प्रपूजयन् तत्र प्रतिवसेदिति ॥६॥

हरिक्षेत्र में अर्थात् हरिक्षेत्र नामक तीर्थस्थान में अमोघ दिव्यफल को देनेवाले भगवान् शालग्रामजी निवास करते हैं। इस क्षेत्र में शालग्राम भगवान् का पूजनादिक करते हुए भक्त श्रीवैष्णव निवास करें। अयोध्या अर्थात् साकेत नामक तीर्थक्षेत्र में रघुकुल में श्रेष्ठ अनन्तकल्याण गुणों का समुद्र सर्वसमर्थ श्रीसीतापति भगवान् श्रीरामचन्द्रजी निवास करते हैं। इस अयोध्या तीर्थ में भगवान् श्रीरामजी का अर्चन पूजन करते हुए श्रीवैष्णवलोग सर्वदा निवास करें।

तथा साधु महात्माओं के समूहों से सेवित मथुरानामक तीर्थ में रुक्मिणी सहित भगवान् श्रीबालकृष्ण निवास करते हैं। तो इस मथुरातीर्थ क्षेत्र में भगवान् श्रीबालकृष्ण का सेवन पूजन करते हुए निवास करें। तथा माया तीर्थ में अर्थात् हरिद्वार नामक गङ्गा तट पर विराजमान पुण्य तीर्थ है उसमें देवता मनुष्यों से ध्यान

Scanned by CamScanner ankurnagpal108@gmail.com

करने के योग्य चरणकमलवाले भगवान् श्रीमधुसूदन परमात्मा सदा निवास करते है । तो इसमें भगवान् श्रीमधुसूदनजी का अनुध्यान करते हुये निवास करें ॥६॥

काश्यां भोगिशयं सनातनमथावन्त्यामवन्तीपतिम्
श्रीमद्द्वारवतीति नाम्निशुभदे श्रीयादवेन्द्रं मुदा ।
रम्ये श्रीव्रजनामके सुरनुतं गोपीजनानां प्रियम्
ब्रह्मेशादिकिरीटसेवितपदाम्भोजं भुजङ्गाश्रयम् ॥७॥

एवं काश्यां वाराणस्यामर्थात् काशीनामकतीर्थक्षेत्रे सनातनं सदावर्तमान मुत्पादनिधनरहितं भोगिशयं भोगिशयनामकं देवं पूजयन् श्रीवैष्णवो निवसेत् । तथा अवन्त्यामवन्तीनगरे अवन्तीपतिं प्रपूजयन् निवसेत् । तथा 'श्रीमद्द्वारवती ति नाम्निशुभदे सर्वदा सर्वशोभासमन्वितद्वारिकेति नाम्ना लोकशास्त्रप्रसिद्धेऽति कल्याणप्रदे तीर्थे रुक्मिण्यादिसहितो भगवान् यादवेन्द्रो नित्यं सन्निहितः तादृश द्वारिकेति प्रसिद्धपुण्यक्षेत्रे भगवन्तं यादवेन्द्रं प्रपूजयन् निवासं कुर्यात् । अत्रैव भगवदायुधानां धनुर्बाणादीनामङ्कनं भवतीति श्रीवैष्णवलोकप्रसिद्धिरिति तत्र विश्रामद्वारकाभिधपुण्यक्षेत्रे 'मध्ये मार्गपरिश्रान्तो विश्रामं प्राप्य श्रृङ्गिणः । आश्रमे परमारामे कृष्णो वचनमब्रवीत् । त्वया संस्थापितां मूर्तिं विश्रामद्वारका पतेः । अदृष्ट्वा द्वारकायात्रा नराणां निष्फला भवेत् । यथा व्यासमनालोक्य का शीयात्रा हि निष्फला । तथैव द्वारकायात्रा ऋतेऽत्रागमनाद्भवेत् । इत्यादिपौराणि कमाहात्म्यप्रसिद्ध्या यथासुखं नित्यं निवसेदिति । तथा रम्येऽतिरमणीये व्रज नामकतीर्थविशेषे गोपीजनानां प्रियं गोपीजनवल्लभनामकं भगवन्तम् पुनः की दृशं ब्रह्मेशादिकिरीटसेवितपदाम्भोजम् हिरण्यगर्भमहादेवेन्द्रादिदेवानां शिरोभूष णैः सेवितचरणकमलम् तथा भुजङ्गाश्रयम् शेषनागासनकं सुरनुतं देववन्दितम् प्रपूजयन् व्रजे वसेत् इति ॥७॥

काशी वाराणसी नामक क्षेत्र में सनातन भोगिशयन नामक भगवान् सदा निवास करते हैं उन भोगिशय का सेवन पूजन करते हुए काशीतीर्थ में निवास करें। तथा अवन्ती नामक पुण्यतीर्थ में अवन्तीपति भगवान् निवास करते हैं । तो अवन्ती पति का पूजन करता हुआ अवन्ती तीर्थ में निवास करें । सर्वशोभा समन्वित कल्याण

Scanned by CamScanner ankurnagpal108@gmail.com

प्रद द्वारिका नामक तीर्थ में यादवेन्द्र भगवान् निवास करते हैं। तो उनका सेवन करते हुए द्वारिका में निवास करें। अत्यन्त रमणीय व्रजनामक तीर्थ में गोपीजन प्रियनामक भगवान् रहते हैं वहां जो भगवान् हिरण्यगर्भादिक देवसमुदायों से सेवित हैं तथा शेषासनासीन हैं उनका सेवन पूजन करते हुए श्रीवैष्णव सन्तलोग निवास करें ॥७॥

वृन्दावने सुन्दरनन्दसुनुकं गोविन्दमेवं त्वथ कालियह्रदे ।
गोवर्धने गोपसुवेषधारिणं तथा भवघ्नेऽपि च पद्मलोचनम् ॥८॥

अथ वृन्दावने वृन्दा तुलसी तस्या वने अर्थात् वृन्दावननामकतीर्थविशेषे अद्यापि वृन्दावननाम्नैवलोकप्रसिद्धे सुन्दरनन्दसुनुकम् नन्दनामककश्चित्प्रसिद्धो यो गोपालस्तस्य पालितपुत्रं मनोहारिणं भगवन्तं श्रीकृष्णचन्द्रम् तत्र तीर्थे वसन्तं विरक्तश्रीवैष्णवो नतिपूजनादिना तं प्रसादयन् वसेदिति । अथ कालियह्रदे-वृन्दावनपरिसरे यमुनातटे कालियह्रदनामकतीर्थे वसन्तं गोविन्दं तदाख्यं भगवन्तं परमात्मानं पूजयन् तत्र वसेदिति । तथा गोवर्धने गोवर्द्धननामकातीव पुण्यजनकतीर्थे गोपसुवेशधारिणमर्थात् गोपवेषधारिनामकं भगवन्तं पूजना दिना प्रसादयन् श्रीवैष्णवोगोवर्द्धनतीर्थे वसेदिति । अथ भवघ्ने भवं हन्ति जन्म जरामरणादिलक्षणसंसारनामकभवघ्नाख्यतीर्थविशेषे पद्मलोचनं पद्मलोचनना मकं भगवन्तं प्रपूजयन् तादृशतीर्थे वसेदिति ॥८॥

वृन्दावननामवाला तीर्थ में जो आज भी वृन्दावन नाम से प्रसिद्ध है नन्द सुनु नाम से प्रसिद्ध (नन्द नाम के एक गोपश्रेष्ठ हुए। उनका पालित पुत्र भगवान् श्रीकृष्ण कहलाते) भगवान् नन्दसुनु का उपासन करते हुए महात्मा लोग निवास करें। और काली ह्रद नामक तीर्थ में जोकि वृन्दावन के समीप यमुना तटपर विराजित है उस तीर्थ में भगवान् सदा विराजते हैं अतः उस तीर्थक्षेत्र में भगवान् श्रीगोविन्दजी का भक्तिभाव करते हुए निवास करें। और गोवर्द्धन नामक पुण्यतीर्थ में गोपवेष को धारण करनेवाले गोपवेषधारी नामक भगवान् विराजते हैं अतः वहां गोपवेषधारी का पूजन करते हुए श्रीवैष्णवलोग इस तीर्थ में निवास करें। एवं संसार का विनाशक होने से भवघ्न भवनाशक नामक तीर्थ में भगवान् पद्मलोचनजी निवास करते हैं तो वहां उनका पूजन करते हुए श्रीवैष्णव इस तीर्थ में निवास करें ॥८॥

शारिं तथा गोमत एव पर्वते तथा हरिद्वार ऋजुं जगत्पतिम् ।

Scanned by CamScanner ankurnagpal108@gmail.com

तीर्थे प्रयागे वत माधवाभिधं तथा गयायां तु गदाधरं परम् ॥९॥

यथेतः पूर्वं प्रतिपादितं तथा तेनैव प्रकारेण गोमताख्यपर्वते शारिं शारि नामकभगवन्तं स्थितं पूजयन् मुमुक्षुः निवासं कुर्यादिति क्रियान्वयः। तथा तथैव हरिद्वारे हरिद्वारनामकप्रसिद्धतीर्थे ऋजुसरलस्वभावकं जगत्पतिं जगत्पति नामकभगवन्तं पूजयन् प्रतिवसेत्। तथा प्रयागे गङ्गायमुनयोः संगमे तीर्थराजे माधवनामकं भगवन्तं संस्तुवन् निवासं कुर्यात्। तथा गयायां गयाख्यतीर्थे पितृणामुद्धारके गदाधरं गदाधरनामकं परमात्मानं पूजयन् तत्र वसेदिति ॥९॥

गोमत नामक पर्वत पर अर्थात् गोमत तीर्थ में शारि नामक भगवान् निवास करते हैं, वहाँ भगवान् श्रीशारीजी का पूजनादिक करते हुए निवास करें। तथा हरिद्वार तीर्थ में सरल स्वभाव वाले भगवान् जगत्पतिजी रहते हैं वहाँ भगवान् जगत्पतिजी का पूजनादिक करते हुए श्रीवैष्णव निवास करें। और त्रिवेणी सङ्गम पर स्थित प्रयाग राज तीर्थ में भगवान् वेणीमाधवजी निवास करते हैं वहाँ श्रीमाधव भगवान् का पूजन करते हुए निवास करें। और मगधदेश में स्थित गया नामक तीर्थ विशेष में जो कि पितरों का उद्धारक क्षेत्र है उस गया तीर्थ में भगवान् गदाधर का निवास है। वहाँ गदाधरजी का पूजन में तत्पर श्रीवैष्णवलोग निवास करें ॥९॥

गंगासागरसङ्गमेति शुभदेविष्णुंतथाराघवम्-
शश्वद्भूरिगुणालयेमुनिवृते श्रीचित्रकूटे विभुम्।
नन्दिग्राम उदारकीर्तिनिकरे श्रीराक्षसघ्नं प्रभुम्-
रम्ये श्रीमतिविश्वरूपिणमथोक्षेत्रेप्रभासेऽमले ॥१०॥

अतिशुभप्रदे गङ्गासागरसङ्माख्यतीर्थे भगवन्तं सर्वव्यापकं विष्णुपरमात्मानं भजन् निवासं कुर्यात्। तथा मुनिवृते मननशीलसाधुभिः सर्वथाऽवृते श्री चित्रकूटाख्यमुव्यतीर्थे भूरिगुणालये समस्तकल्याणगुणसागरे विभुं सर्वव्यापकं सर्वनियन्तारं रघुकुलोद्भवं जीवसमूहनियन्तारं शश्वत् निरन्तरं पूजयन् निवसेदिति। तथा उदारकीर्तिनिकरे, अतिप्रभूतकीर्तिसमुदायस्याधारभूते नन्दिग्रामाख्य तीर्थविशेषे राक्षसघ्नं राक्षसविनाशकं प्रभुं भगवन्तम् अर्थात् राक्षसघ्ननामकं श्री रामं पूजयन् तत्र निवसेत्। तथा रम्ये रमणीये मनोज्ञे श्रीमति सर्वशोभास्पदे

Scanned by CamScanner
ankurnagpal108@gmail.com

प्रभासक्षेत्रे अमले प्रभासनामकतीर्थविशेषे विश्वरूपिनामकं भगवन्तम् आराध यन्निवसेत् ॥१०॥

गङ्गासागर तीर्थ में जोकि गङ्गा तथा पूर्व समुद्र का सङ्गम स्थान है में सकल ऐहिक पारलौकिंक कल्याण को देनेवाले श्रीविष्णु तथा मननशील महात्माओं से संकुलित सकल कल्याण गुणों का आधार चित्रकूट नामक पुण्यतीर्थ में श्रीराघवेन्द्र सरकार स्वयं विराजमान रहते हैं तथा उदार कीर्तियुक्त नन्दिग्राम तीर्थ में राक्षसघ्न नामक प्रभु विराजते हैं। और प्रभास नामक क्षेत्र में अतिसुन्दर श्रीविश्वरूपी भगवान् विराजमान रहते हैं। इन सभी तीर्थों में विराजमान उन उन भगवान् का पूजन करते हुए श्रीवैष्णवगण निवास करें ॥१०॥

श्रीकूर्माचल उत्तमे च सदयं कूर्मं सुरेशेडितम्
नीलाद्रौ पुरुषोत्तमं त्वथ महासिंहं च सिंहाचले ।
श्रीमन्तं तुलसीवने तु गदिनं सर्वार्थदं तत्प्रिये
क्षेत्रे श्रीकृतशौचके तु सततं पापापहंचेश्वरम् ॥११॥

उत्तमे श्रीकूर्मेऽचले कूर्मनामकपर्वते सुरेशेडितमिन्द्रस्तुतं श्रीकूर्मनामकं भगवन्तम् तथा नीलाद्रौ नीलनामकपर्वते पुरुषोत्तमनामकं भगवन्तम् अथ सिंहाचले एतन्नामके पर्वते यत्र भगवान् नृसिंह आविर्भूयतिरोभूतस्तस्मिन् पर्वते महासिंहं नृसिंहनामकं भगवन्तम् । तथा तत्प्रिये भगवत् प्रियें क्षेत्रे तुलसीवने सर्वार्थदातारं गदिनं गदिनामकं भगवन्तम् । तथा कृतशौचके कृतशौचनामक पर्वते, ईशं सर्वस्येशितारम् पापापहम्, सर्वपापनिवारकम् पापहरनामकं भगवन्तं प्रपूजयन्निवसेदिति ॥११॥

कूर्माचल में परमदयावान् श्रीकूर्म भगवान् हैं जोकि इन्द्रादि सकल देव तथा मनुष्य प्रभृतिकों से पूजित हैं। तथा नीलाद्रि पर्वतनामक तीर्थ में श्रीपुरुषोत्तमजी विराज मान हैं। तथा सिंहाचल नामक पुण्यतीर्थ में श्रीमहासिंह भगवान् विराजित हैं। तथा तुलसीवन नामक तीर्थ में श्रीगदी भगवान् रहते हैं। जो भक्तों का सकल मनोरथ को सिद्ध करनेवाले हैं। और '**कृतशौचक**' नामक तीर्थ में श्रीपापापह नामक भगवान् हैं। जो भक्तों के सकल पाप को विनष्ट कर देते हैं अतः उन उन

Scanned by CamScanner ankurnagpal108@gmail.com

क्षेत्रों में उन उन देवों का पूजन करते हुये निवास करें ॥११॥

श्वेताद्रौत्वथ सिंहरूपिणमथो श्रीधर्मपुर्यां तथा
योगानन्दमशेषदेवसुनतं श्रीकाकुले तु प्रभुम् ।
देवैर्वन्द्यमथान्ध्रनायकमिह श्रीदं तथाऽहोबले
तस्मिन् श्रीगरुडादिसंज्ञ उचिते देवं हिरण्यार्दनम् ॥१२॥

अथानन्तरम् श्वेताद्रौ-श्वेतनामकपर्वतीयतीर्थे सिंहरूपिणं सिंहप्रकृतियुक्तं भगवन्तं पूजनीयम् । अथोतथा धर्मपुर्याम् धर्मपुरीनामके तीर्थविशेषे अशेषदेव सुनतं, समस्तेन्द्रादिदेवसमूहैर्नमस्कृतम् श्रीयोगानन्दनामकं भगवन्तम् । अथ श्री काकुले श्रीकाकुलनामकतीर्थे देवैर्वन्द्यं सकलदेवादिभिः स्तुतं स्तूयमानम् आन्ध्रनायकम् आन्ध्रप्रदेशस्यनायकं पालकं प्रभुं भगवन्तम् । तथा यथापूर्वं स्थानं तदधिष्ठितदेवस्यनामादिकञ्च कथितं तथैव अहोबलनाम्नाप्रसिद्धे गरुडना मकतीर्थविशेषे पर्वते हिरण्यार्दनं हिरण्यासुरनामकदैत्यविनाशकं प्रभुमाराध यन्निवसेदिति ॥१२॥

श्रीश्वेताचल नामत तीर्थ में भगवान् श्रीसिंहरूपी निवास करते हैं । और श्री धर्मपुरी नामक तीर्थ में श्रीयोगानन्द नामक भगवान् नित्य सन्निहित रहते हैं । तथा श्रीकाकुल नामक तीर्थ विशेष में सर्व इन्द्रादिक देवों से सतत वन्दित श्रीआन्ध्रनायक भगवान् सर्वदा निवास करते हैं । एवं अहोबल नाम से लोकशास्त्र प्रसिद्ध श्रीगरुडाद्रि नामक पर्वत पर हिरण्यासुर का विनाशक भगवान् हिरण्यार्दनजी रहते हैं । इन उपर्युक्त तीर्थों में विद्यमान देवों की आराधना करते हुए मुमुक्षु विरक्त श्रीवैष्णव श्रद्धा विश्वासपूर्वक धर्मबुद्धि से निवास करें ॥१२॥

श्रीविठ्ठलं तं किल पाण्डुरङ्गे श्रीवेङ्कटाद्रौ तु रमा सखं च ।
नारायणं श्रीमति यादवाद्रौ नृसिंहमित्थं घटिकाऽचलेऽपि ।१३।

पाण्डुरङ्गे महाराष्ट्रस्थितपाण्डुरङ्गनामकतीर्थविशेषे किलेति निश्चितम् तं सर्वत्र सर्वदा प्रसिद्धं श्रीविठ्ठलनामकं भगवन्तम् । तथा वैङ्कटाद्रौ वेङ्कटनामके पर्वतात्मकतीर्थे रमासखं रमालक्ष्मीः सखा विद्यते यस्य तादृशं भगवन्तम् तथा श्रीमति यादवाद्रौ सर्वदाशोभाधनधान्यादियुक्ते यादवनामकपर्वततीर्थे श्रीनाराय

Scanned by CamScanner ankurnagpal108@gmail.com

णनामकं भगवन्तम् तथा घटिकाचले-एतन्नामके पर्वते श्रीनृसिंहं सर्वदा पूज यद्भिरेवनिवासः कर्तव्यः । एतेषु तीर्थविशेषेषु समुपदिष्टभगवत्पूजनादिकं कुर्वन् निवासं कुर्यादिति भावः ॥१३॥

पाण्डुरङ्ग में अर्थात् पाण्डुरङ्ग नामक तीर्थ में भगवान् श्रीविठ्ठलेशजी रहते हैं। तथा वेङ्कटनामक पर्वत पर भगवान् श्रीनिवासजी रहते हैं । तथा सकल शोभा सम्पन्न यादवाद्रि यादवपर्वत पर श्रीनारायण भगवान् एवं घटिकाचल पर्वत पर भगवान् श्रीनृसिंहजी रहते हैं। इन सबका पूजनादिक करते हुए इन सब स्थानों में निवास करें ॥१३॥

सुरेन्द्रवन्द्यं वरदं त्वहर्दिवं सुनिर्मले श्रीशुभवारणाचले ।
काञ्च्यां तथा श्रीकमलायताक्ष्यं समर्चनीयं बुधवैष्णवोत्तमैः ॥१४॥

तत्र श्रीशुभे श्रिया सर्वदा शोभायमाने वारणाचले वारणनामकपर्वते तथा निर्मले सर्वथादोषात्मकमलरहिते यद्वा तत्र निवसतां सर्वदा पापहारके अहर्दिवमहोरात्रं प्रतिदिनम् सुरेशवन्द्यम् इन्द्रादिभिः सर्वदापूजनीयम् वरदं भक्ता य वरं मनोभिलषितफलप्रदातारम् वरदनामकं भगवन्तम् । तथा काञ्च्यांपुर्याम् काञ्चीनामतोलोकप्रसिद्धनगरे वसन्तम् श्रीकमलायताक्षम् प्रफुल्लितकमलवत् वि कसितनेत्रकमललोचननामकं भगवन्तं बुधवैष्णवैः बुधैः पण्डितैर्वैष्णवश्रेष्ठैः स मर्चनीयं पूजनीयम् तत्र तत्र तं तं देवविशेषं पूजयद्भिरेव तत्तत्स्थाने सर्वदा निवासः करणीय इति सारः ॥१४॥

सर्वपापात्मक दोष से रहित होने के कारण अतिनिर्मल तथा सर्वप्रकारक शोभा से युक्त श्रीवारण नामक पर्वत पर इन्द्रादि सकल देवों से पूजित वरदनामक भगवान् निवास करते हैं । तथा काञ्चीपुर में अर्थात् काञ्चीनाम से लोक में प्रसिद्ध नगर में विद्वान् वैष्णवों से पूजा करने के योग्य विकसित कमल के समान नेत्रवाले कमलनयन नामक भगवान् निवास करते हैं । इन सब क्षेत्रों में उपर्युक्त भगवान् का पूजन सेवन करते हुए श्रीवैष्णवलोग निवास करें ॥१४॥

तोताद्रिसंज्ञादिषु वैष्णवोत्तमैरेवं ततौं तुङ्गशयादिकं प्रभुम् ।
कार्यो निवासो नितरां शुभार्थिभिरारा धयद्भिः सकलार्थदायिनम् ।१५।

इत्यानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्ययतिराजप्रणीते 'श्रीवैष्णवमताब्जभास्करे' श्रीवैष्ण वनिवासस्थाननिरूपणात्मको दशमप्रश्नोत्तराख्यो दशमः परिच्छेदः ॥१०॥

Scanned by CamScanner ankurnagpal108@gmail.com

एवं पूर्वकथितप्रकारेण तोताद्रिसंज्ञादिषु तोताद्रिनामकतीर्थविशेषेषु सकलार्थदायिनं समभिप्सितसकलपदार्थदातारम् तुङ्गशयादिकं प्रभुम् तुङ्गशयनामकं प्रभुं सर्वसमर्थंभगवन्तम् आराधयद्भिः प्रपूजयद्भिराराधकैः, नितरांशुभार्थिभिर्मोक्षकामनावद्भिः वैष्णवोत्तमैः प्रपत्तिनिष्णातैः श्रीवैष्णवैः पूर्वोक्तप्रकारेण प्रदर्शिततत्तत्तीर्थे निवासः कर्त्तव्यः । अर्थात् यथोक्ततीर्थेषु स्थितं पूर्वोक्तं भगवन्तं पूजादिकं कुर्वन् श्रीवैष्णवः सर्वदा निवशेत् इति भावः ।

अत्रान्तिमश्लोके तीर्थबोधक 'तोताद्रिसंज्ञादिषु' इत्यत्र तथा 'तुङ्गशयादिकम्' इत्यत्र देवबोधकपदे आदिपदं प्रक्षिप्तं तेन कामिशिकी तीर्थे नृसिंहबलिपुरेमहाबलमिति बलिपुरम् प्रभृतिकतीर्थेषु महाबलप्रभृतिदेवानामाराधनपूर्वको निवासः कर्त्तव्य इति सङ्गृहीतो भवति । एवञ्च मुमुक्षुः श्रीवैष्णवो वैकुण्ठादिदेशेषु श्रीरामादनन्यत्वेनवासुदेवप्रभृतीन् सम्यक् पूजयन् तत्तत्तीर्थे निवासं कुर्यादिति संक्षेपः ॥१५॥

एवं पूर्वोक्तक्रम से तोताद्रिक्षेत्र में स्थित सर्वार्थप्रद तुङ्गशायी भगवान् की आराधना करते हुये शुभेच्छु उत्तम श्रीवैष्णवों को सन्नियतचित्त होकर उस पुण्य क्षेत्र में निवास करना चाहिये । श्लोक स्थित आदि शब्द से अन्य तीर्थों का सङ्ग्रह होता है वे अन्य साम्प्रदायिक दिव्य प्रबन्धों से जान लेना चाहिये विस्तारभय से सङ्ग्रह नहीं कर रहे हैं ॥१५॥

卐 ग्रन्थफलश्रुतिः 卐

सदानुसन्ध्येयमिमं त्रिकालं मुमुक्षुभिस्तत्परमार्थमित्थम् ।
ज्ञात्वा नचैवास्ति सुवेदनियं जिज्ञासुभिस्तैरवशिष्यमाणम् ॥१॥

ग्रन्थफलश्रुतिं प्रदर्शयत्याचार्यः-'सदानुसन्धेयम्' इत्यादिचतुर्भिः । इत्थं पूर्वोक्तप्रकारेण प्रदर्शितं तन्महार्थजातमिमं परमार्थभूतमनेकशास्त्रसागररूपत्वान् मोक्षसाधनं मुमुक्षुभिस्त्रिकालं सदानुसन्धेयम् । तैर्जिज्ञासुभिः पूर्वप्रतिपादितं सर्वं ज्ञात्वा सुवेदनीयमवशिष्यमाणं नचैवास्ति ज्ञेयं नावशिष्यते किञ्चिदित्यर्थः ॥१॥

पूर्वोक्तक्रम से दशों प्रश्नों के उत्तर देने के वाद आचार्य प्रवर फलश्रुति का उपदेश करते हैं-'**सदानुसन्धेयम्**' इत्यादि चार श्लोकों से । सर्वशास्त्र साररूप से समुपदिष्ट इस दिव्यप्रबन्ध का मुमुक्षुओं को त्रिकाल अनुसन्धान करना चाहिये

Scanned by CamScanner ankurnagpal108@gmail.com

तत्वज्ञान प्राप्त करने के लिये । क्योंकि इसमें प्रतिपादित तत्वों को जानने के वाद जानने योग्य संसार में कुछ भी नहीं रहेगा ॥१॥

गुरुद्रुहे नो न सठाय चेदं न नास्तिकायोपदिशेत् कदाचित् ।
नावैष्णवायापि रहस्यमेतन्न चाथ दैन्याहतवेदनाय ॥२॥
जितेन्द्रियः प्रपन्नः सन् बुधः श्रीजानकीपतिम् ।
अनुष्ठाय मतं चेदं परमं स्थानमाप्नुयात् ॥३॥

इदं पूर्वोपदिष्टमेतद्रहस्यं गुरुद्रुहे गुरुद्रोहनिरते शठाय नास्तिकाय तथा दैन्याहतवेदनायातिमन्दबुद्धित्वादुपदेशधारणाक्षमाय तथैवावैष्णवाय साम्प्रदायि करीत्या सदाचार्यतोऽगृहीतदीक्षाकस्य कदाचिदपि नोपदिशेत् 'विष्णुदीक्षाविही नस्य नाधिकारः कथाश्रवे' इतिमहर्षिव्यासोक्तेः ॥२॥ पूर्वोदीरितदिशा बुधो जिते न्द्रियः श्रीवैष्णवः प्रपन्नसन् श्रीजानकीपतिमनुष्ठाय सम्यगाराध्येदञ्च परमवैदिक **श्रीवैष्णवोत्कृष्टमतं समनुष्ठीय परमं श्रीसाकेताख्यं दिव्यधाममाप्नुयात् ॥३॥**

इस परमरहस्यभूत दिव्यादेश को गुरुद्रोही शठ नास्तिक मन्द बुद्धि तथा विधि पूर्वक सदाचार्य श्रीवैष्णव से जिन्होंने दीक्षा न लिया हो उन्हें कभी भी उपदेश न करें **'विष्णु दीक्षा विहीनस्य नाधिकारकथाश्रवे'** ऐसा श्रीसम्प्रदाय (श्रीरामानन्दसम्प्रदाय) के सातवें आचार्य भगवान् बादरायण व्यासजी ने कहा हैं, अतः अदीक्षितों को उपदेश फलप्रद नहीं होता है । इसलिये मुमुक्षुओं को सदाचार्य श्रीवैष्णव से सविधि दीक्षा लेकर सदुपदेश श्रवण तथा आचरण द्वारा परमपद का भागी बनना चाहिये ॥२॥

श्रीसीतारामजी के शरणापन्न जितेन्द्रिय होकर इस उत्तम श्रीवैष्णवमत का अनुसरण करने से मनुष्य परमपद श्रीसाकेताख्य दिव्यधाम को प्राप्त कर लेगा अर्थात् मुक्त होगा ॥३॥

रामानन्दप्रोक्तः श्रीवैष्णवमताब्जभास्करो भवतु ।
आनन्दभाष्यसोदर एषोऽन्तस्तमो विनाशाय ॥४॥

इत्यानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्ययतिराजप्रणीतः

श्रीवैष्णवमताब्जभास्करः समाप्तः

卐 श्रीरामः शरणं मम 卐

Scanned by CamScanner ankurnagpal108@gmail.com

'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च मङ्गलयुक्ताः स्युः' इतिमहर्षिपतञ्जलिप्रोक्तेः ग्रन्थान्ते स्वग्रन्थानामनिदर्शनपूर्वकमाशीर्वचनं वितनोति-'रामानन्दप्रोक्तः' इत्यादि । एषो निखिलशास्त्रसाररूपेणसंगृह्योपदिष्टो दिव्यप्रबन्ध आनन्दभाष्य सोदरो येनाचार्यचूडामणिप्रस्थानत्रयानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्येण प्रोक्तो जगद्गुरुश्रीसुरसुरानन्दाचार्यायोपदिष्टस्तत्त्वं किमिति दशप्रश्नोत्तररूपेण श्रीवैष्णवमताब्जभास्कर एतदाख्यातिप्रथितसर्वकृत्योपदेशनपरप्रबन्ध एतेनानन्दभाष्यश्रीवैष्णवमताब्जभास्करस्यैककर्तृत्वं सूचितम् अध्येतृवर्गाणामन्तस्तमो जन्मजन्मान्तरीयकर्मबन्धरूपहृद्ग्रन्थिविनाशाय भवतु ।

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥'

इति महर्षिबादरायणव्यासोक्तेः । एतेन प्रकृतग्रन्थसमनुशीलनपरो जनो सायुज्य मुक्तिभाग् भवतीति सूचितम् ॥४॥

इत्यानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्यपीठप्रधानपीठाचार्यजगद्गुरुश्रीरामानन्दाचार्यश्रीराम-
प्रपन्नाचार्ययोगीन्द्रसमाश्रितस्वामिआनन्दभाष्यसिंहासनासीनजगद्गुरुश्रीरामानन्दाचार्यश्री
रामेश्वरानन्दाचार्यकृताश्रीवैष्णवमताब्जभास्करस्यप्रभाख्याटीका
शं भवतु सर्वजगतः

यह प्रस्थानत्रयानन्दभाष्यों के उपदेश के वाद जगद्गुरु श्रीरामानन्दाचार्यजी यतिसम्राट् के द्वारा जगद्गुरु श्रीसुरसुरानन्दाचार्यजी को उपदिष्ट श्रीवैष्णवमताब्जभास्कर नामक श्रीवैष्णवों का सर्वस्वभूत दिव्यप्रबन्ध अध्ययन-अनुशीलन करनेवालों के हृदय स्थित अन्धकारों को दूर करनेवाला अर्थात् सायुज्यमुक्ति देनेवाला हो ॥४॥

जगद्गुरुश्रीरामानन्दाचार्यश्रीरामप्रपन्नाचार्ययोगीन्द्रकृपापात्र आनन्दभाष्यसिंहासनासीन जगद्गुरु
श्रीरामानन्दाचार्यश्रीरामेश्वरानन्दाचार्यकृतः श्रीवैष्णवमताब्जभास्कर किरणः समाप्तः

श्रीरामार्पणमस्तु

मायादिकुतर्कजालरचितव्याख्यानसंमूर्छितां
यो व्याख्यासुधया त्रयीं भगवतीं सञ्जीवयन् राजते ।
तस्याचार्यशिरोमणेर्विजयिनो वादाहवे श्रीमतो
रामानन्दमुनेर्वचोऽखिलजगत्क्षेमाय सञ्जायताम् ॥

Scanned by CamScanner ankurnagpal108@gmail.com

卐 जगद्गुरुश्रीरामानन्दाचार्यश्रीरघुवराचार्यानुगृगीताः 卐

जायामा मैथिलीतः स्मितशुचिवदनोहासभासाभिरामः
श्यामः सीता सखीनां हृदिरतिसुकरः कासते यश्च कामः ।
वामः श्रौतारिशिष्टौ दशमुखवदनोद्दामशोभाभिरामः
श्रीरामः शं तनोतु श्रुतिरतिमुनिभिर्मन्यते मानकामः ॥

औद्धत्याधूतधर्मश्रुतिरतिरहितक्रूरकर्मप्रहारी
हारीकामारिबेधोमुनिजनमनसा जानकीहृद्विहारी ।
वारिक्लेशाग्निकाण्डे रघुकुलतिलकः कीर्त्यते योऽसुरारि
र्धारी मुक्तिप्रसादं शुभमिह तनुतां मारुतीशः खरारिः ॥
प्रथितभानुकुलाम्बुजभास्करं जनकाजा हृदयैकविभूषणम् ।
शिवविरञ्चिनुताङ्घ्रिसरोरुहं रघुपतिं सततं प्रणमाम्यहम् ॥
सव्याङ्के च विभाति भूतलसुता धृत्वा करे पङ्कजं
ग्रीवायां स्थलपद्मनिर्मितमहाहारं दधानासती ।
पादाग्रे नतमस्तकः कपिवरः पार्श्वे स्थितो लक्ष्मणो
यस्यायं स रघूत्तमः श्रुतिनुतः पायात्सदा स्वाश्रितान् ॥
यज्ञानामवरोधतः श्रुतिपथप्रध्वंसनात्तत्क्षणे
पापाचारचणैरियंखलगणैर्व्यासाक्षितिर्दुःखिता ।
दुखाद्येनविमोचिता गुरुरसौप्राचार्यवर्यो महान्
रामानन्दयतिर्जगत्त्रयगुरुर्वोऽव्यात्सुरेन्द्रार्चितः ॥
अज्ञानाम्बुधिमग्नमानवकृते वेदान्तसूत्रे व्यधान्
मायिध्वान्तनिराकरिष्णुविशदं स्वानन्दभाष्यं शुभम् ।
येनार्येण कृतं समोपनिषदि प्रेम्णा च भाष्यं बृहद्
रामानन्दयतिर्जगत्त्रयगुरुर्वोऽव्यात्सुरेन्द्रार्चितः ॥
जैनारण्यगजेन्द्रदारणपटुः कण्ठीरवो भीषणो बौद्धानां बलहारकोद्विजगणानान्धर्मसंयोजकः ।
गीताभाष्यकृदेषदैशिकपतिर्योगीन्द्रचूडामणी रामानन्दयतिर्जगत्त्रयगुरुर्वोऽव्यात्सुरेन्द्रार्चितः ॥
यं ब्रह्मेति गदन्ति वेदनिपुणा वेदान्तिनः सर्वदा सांख्यज्ञैः पुरुषस्तथाक्षचरणैः कर्तेति यो गीयते ।
भाट्टैः कर्म च काव्यकोविदचयैर्मुख्योरसः कीर्तितो विश्वेस्मिन्सुजनान्स एव भगवान् पायाद्रघूणांपतिः ॥
श्रीरामेण तदात्म्यतामुपगतां कल्याणधामां शुभां सर्वैश्वर्ययुतां गुणैकनिलयां लीलाजगद्धारिणीम् ।
आम्नायान्तविभावनीयचरितां ब्रह्मादिभिर्वन्दितां श्रीदेवीं मिथिलाधिराजतनयामम्बां किशोरीं भजे ॥
प्राप्योपायपरां पूर्णां प्रपन्नामरवल्लरीम् । श्रीरामाऽभिन्नरूपां तां श्रियं शश्वत्समाश्रये ॥

Scanned by CamScanner ankurnagpal108@gmail.com